काव्यमाला ९१.

श्रीपिङ्गलाचार्यविरचित

छन्दःशास्त्रम् ।

श्रीहलायुधभट्टविरचितया मृतसञ्जीवन्याख्यया वृत्त्या
समेतम्, समीक्षाचक्रवर्त्तिराजपण्डितश्रीमधुसूदन-
विद्यावाचस्पतिरचितछन्दोनिरुक्ति-
सनाथः

जयपुरमहाराजाश्रितेन महामहोपाध्यायपण्डितश्रीदुर्गाप्रसाद-
तनयेन पण्डितकेदारनाथेन, मुम्बापुरवासिना पण्डित-
करोपाह्वलक्ष्मणशर्मतनुजतुपा वासुदेवशर्मणा च
संशोधितम् ।


द्वितीय संस्करणम् ।

तथा
मुम्बय्याम्
पाण्डुरङ्ग जावजी,
इत्यनेन
निर्णयसागरयन्त्रालय्याधिपतिना मुद्राक्षरैरङ्कयित्वा प्राकाश्यं नीतम् ।

१९२७

मूल्य पादोनरूप्यकद्वयम् ।

छन्द शास्त्रस्य भूमिका ।



तत्र छन्द गर्मीक्षाण्यछन्दमास्यपाद —

अथ किमिद छन्द इति पृच्छामः ?

"मनु च भो यदि कश्चिद्ब्रात् क गच्छ ब्राह्मण इति गोऽय त्रिविध पयनुयोगो भवति—लक्ष्यापेक्षो, लक्षाप्यापेक्ष , लक्षणापेक्षश्च । तदतद्विविध समाधिर्भवति—असौ वेयदत्तो ब्राह्मण इति लक्ष्यापेक्ष कश्यपाद्विरामृग्यत्रियगिष्ठविभामित्रागस्त्याद्या सप्तैव ब्राह्मणजातया भवन्ति इति लक्षाप्यापेक्ष , यदक्षरपरिमाण तच्छन्द' 'मात्रा क्षरसङ्ख्यानियता वाक् छन्द ' इति लक्षणापेक्षश्च ।

एवमेवेदं यदद पयनुयुज्यते किमिद छन्द इति गोऽयं त्रिविध पयनुयोगो भवति—लक्ष्यापेक्ष लक्षाप्यापेक्ष , लक्षणापेक्षश्च । तदतद्विविध समाधिर्भवति—

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्यिजम् । होतारं रत्नधातमम्' । (ऋ १ अ १ अ १ व) इतीद छन्द इति लक्ष्यापक्ष , गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्या ख्या सप्तैव छन्दोजातयो भवन्तीति लक्षाप्यापेक्ष यदक्षरपरिमाण तच्छन्द' 'मात्रा क्षरसङ्ख्यानियता वाक् छन्द ' इति लक्षणापेक्षश्च ।

तत्रित्थं सिद्धं प्रतिवचनमिदं छन्द इति चेन्न सिद्धम् । कुत एतत् । यदक्ष रपरिमाणं तच्छन्द इति हि लक्षणमुच्यते तत्तावदपयाप्तं भवति । पृथिवी गायत्री, अन्तरिक्षं त्रैष्टुभम् द्यौर्जागती । अग्निर्गायत्र , इन्द्रस्त्रैष्टुभः विश्वेदेवो जागत । तेजो वै ब्रह्मवर्चसं गायत्रम्, ओजो वा इन्द्रियं वीर्यं त्रिष्टुप्, पशवो जागता । ब्रह्म गायत्रम्, क्षत्र त्रैष्टुभम् विड् जागतम् । ब्राह्मणो गायत्र, क्षत्रियस्त्रैष्टुभ , वैश्यो जा गत । चतुर्विंशत्यक्षरा भुग्गायत्री, चतुश्चत्वारिंशदक्षरा वाक् त्रैष्टुभी, अष्टचत्वारिंशद

क्षरा वाग् जागती । इत्येवमनेकधा लक्षण्या श्रूयन्ते । ताश्च सर्वा एवैता गायत्र्य-ष्णिहुभो जगत्यश्च लक्षणमर्हन्ति । तत्र यदुच्यते—'अक्षरपरिमाणं छन्द इति'; वाचिकेष्वेवैतदवकाशं लभते नान्यत्रेत्यनैकान्तिकं भवति । न चानैकान्तिके लक्षण-शब्द प्रवर्तते । तस्मादलक्षणमेतत् । स्यादेव तु तेषु तेषु सर्वेष्वनुगत कश्चन विल-क्षणो धर्मो यदनुरोधेन छन्द शब्द प्रवर्तते । तमेतं धर्मं पृच्छाम —किमिदं छन्द इति ॥

अथ लक्षण्योपपरीक्षा—

यान्येतानि गायत्र्यादीन्यभिधानानि श्रूयन्ते, किमेते यदृच्छाशब्दा , उत रूढा , योगरूढा , यौगिकरूढा , यौगिका वा । अथवा क्वचिन्मुख्या , अपरत्र भक्त्या प्रयु-ज्यन्ते । तत्र तावत्—'गायतो मुखादुदपतत्' इति गायत्र्या , 'गायत्रीमेव त्रिपदा सतीं चतुर्थेन पादेनानुष्टोभति' इत्यनुष्टुभश्च निर्वचनश्रवणात्, 'गायन्तं त्रायते यस्मा-द्गायत्रीत्युच्यते बुधै ।' इत्यादिस्मरणाच्चावयवार्थस्फोटाच्च नैते यदृच्छाशब्दा इति शक्यं वक्तुम् । नाप्येते रूढा भवितुं युज्यन्ते । तदाहु —"यदन्यानि छन्दांसि वर्षीयांसि भूयोऽक्षरतराणि, अथ कस्मादेता बृहतीत्याचक्षते' इति । एतया हि देवा इमाल्लो-कानाश्नुवत । ते वै दशभिरेवाक्षरैरिमं लोकमाश्नुवत, दशभिरन्तरिक्षम्, दशभिर्दिवम्, चतुर्भिश्चतस्रो दिश , द्वाभ्यामेवास्मिन् लोके प्रत्यतिष्ठन्, तस्माद्वेना बृहतीत्याचक्षते ॥" इत्येवमादिभि श्रुतिभिरेषामवयवार्थसापेक्षत्वावगमात् । न चाप्येते योगरूढा भवन्ति । "सप्तधा वै वागवदत्, । 'त्र्यक्षरेण मिमते सप्तवाणी' इत्येवमादिश्रुतिसिद्धेषु वाग्विच्छित्तिविशेषेष्वेव तु भवानिदानीं गायत्र्यादीन् शब्दानाचष्टे । तत्र नैतेषु गाय-त्र्यादीनामवयवार्थसमन्वय स्वारस्येन शक्यते कर्तुम् । शुद्धं यौगिकत्वमप्यत एव प्रत्याख्यातं भवति । द्रव्यशब्दत्वगुणशब्दत्वक्रियाशब्दत्वानामन्यतमस्याप्यत्र दु स्थ-त्वात् तत्तर्हि स्यादेवम् । न केवलं वाग्विशेषा एवैतेषा गायत्र्यादिशब्दानां विषया भवन्तीति, कि तर्हि सन्त्येव केचिदन्येऽपि साध्यदेवादयो द्रविणादयो वा वेदप्रसिद्धा गायत्र्यादिशब्दप्रतिपाद्या , अथ वाग्विशेषाश्च । तेषु क्वचिदिमे यौगिका , अपरत्र रूढा स्यु । अथवा क्वचिन्मुख्या अपरत्र भक्ता स्यु । तत्र न ज्ञायते कुत्र कीदृशा इति ।[2] किंच भूयसा श्रूयते गायत्र्यादीनामाच्छादकत्वाच्छन्दस्त्वमस्तीति । तत्र न ज्ञायते कथमेषा वाग्विशेषाणा साध्यदेवाना द्रविणानामन्येषा वा किमाच्छादकत्व-मस्तीति ।[2] आच्छादकत्वमेवैतच्छन्द शब्दस्य प्रवृत्तिनिमित्तमुत गायत्र्यादिशब्द-सबन्धमात्रमथवान्यदेव किंचित् ।[2] तस्मादुत्तिष्ठते जिज्ञासा—किमिदं छन्द इति ॥

अथाप्येतदन्यथान्यया बहुधा श्रूयते वेदे—तथाहि—

(१) "एते वाव देवा प्रातर्यावाणो यदग्निरुषा अश्विनौ ।
त एते सप्तभि सप्तभिश्छन्दोभिरागच्छन्ति ।" इति ।

तदेतन्न ज्ञायते—कथं ते सप्तभिश्छन्दोभिरागच्छन्ति, कानि वा तत्र छन्दांसि ॥

(२) "छन्दासि वा अन्योन्यस्यायतनमभ्यध्यायन् । गायत्री, त्रिष्टुभश्च जगत्यै

चायतनमभ्यध्यायत्। त्रिष्टुप्, गायत्र्यै च जगत्यै च। जगती गायत्र्यै च त्रिष्टुभश्च। ततो वा एतं प्रजापतिर्व्यूढ्यच्छन्दसं द्वादशाहमपश्यत्, समाहरत्, तेनायजत। तेन स सर्वान् कामान् छन्दांस्यगमयत्।" इति श्रूयते।

तत्र न ज्ञायते—कथं द्वादशाहेन छन्दसामन्योन्यायतनसंसिद्धिः। कानि वा तत्र छन्दांसि॥

(३) 'अहर्वै देवा अभयन्त रात्रीमसुराः। ते समावद्वीर्या एवासन्। न व्यावर्तन्त। सोऽब्रवीदिन्द्रः—कथाहं यमानितोऽसुरान् रात्रीमन्वयेयमिति। स दर्भेषु न प्रत्यविन्दत्। स यं छन्दांस्यमान्वपायन्। तस्मादिन्द्रश्च छन्दांसि च रात्रीं यन्ति॥' इति श्रूयते।

तत्र न ज्ञायते—कथमेतानि छन्दांसि तमिन्द्रमन्वपायन् कानि वा तत्र छन्दांसि॥

(४) "देवा वा असुरयुद्धमुपप्रायन् विजयाय। तानग्निनान्वक्रामयन्तुम्। तं देवा अब्रुवन्—अपि त्वमेहि, अस्माकं यं त्वमेकोऽसीति। स त्रिभेणिभूत्वा व्यनीको ऽसुरान् युद्धमुपप्रायद् विजयाय। त्रिभेणिरिति—छन्दांस्येष भेणीरुच्यते। व्यनीक इति—सवनान्येषानीकानि। तानसंभाव्यं पराभावयत्॥ इति श्रूयते।

तत्र न ज्ञायते—कथं छन्दांसि भेणयोऽभूवन् कानि वा तत्र छन्दांसि॥

(५) सवाणि छन्दांस्येतद्यज्ञप्रलाप इत्याम्नायते। एतशो त्वर्यं सूयाश्च संज्ञायते।

उदुत्यद्धर्तं वपुर्दिव एति प्रतिह्वरे।
यदीमाशुबृहति रेव एतशो विश्वस्मै पक्षसे भरम्॥'

(ऋ ५ अ ५ अ १० व)

इत्येषमादिमन्त्रव्याख्याने तथैव प्रतिपत्तेः।

तथा च न ज्ञायते—कथमेषां छन्दसामैतशप्रलापत्वम्, कानि वा तत्र छन्दांसि॥

अत्र निदर्शनतया। एवमादयो हि भूयांसश्छन्दसामुपाख्यानवादा श्रूयन्ते। तत्र न ज्ञायते—कथं कथमेते वादा उपपद्यन्ते कानि वा तत्र छन्दांसि। किमेकमेवैषां छन्दसां छन्दस्त्वमुत भिद्यते प्रत्यर्थमिति पृच्छाम—किमिदं छन्द इति॥

अथ यद्यप्युक्त ऋष्यापेक्ष प्रतिवचनं तदपि नैवोपपद्यते। अग्निमीळे पुरोहितम्' इत्यत्र हि किं नाम छन्दो विवक्षितं भवताम्। किं तावदृचं संपूर्णो मन्त्रश्छन्दः स्यात्। नेत्याह।

ऋचां दशसहस्राणि ऋचां पञ्चशतानि च।
ऋचामशीतिः पादश्च पारण संप्रकीर्तितम्॥'

इत्येवं हि दाशतयिके मन्त्रा संस्त्यायन्ते छन्दांसि पुनः सप्तैवेति विषयभेदो विज्ञायते॥ किं तर्हि यत्तावत्पदानि तच्छन्दः। नेत्याह।

शाकल्यदृष्टे पदलक्षमेकं सार्धं च वेदे त्रिसहस्रयुक्तम्।
शतानि पाद्ये दशकद्वयं च पदानि षट् चेति हि चर्चितानि॥

इत्येवं हि पदसंख्यानं स्मर्यते, छन्दांसि पुन सप्तैवेति विषयभेदो विज्ञायते । अथ किमेतान्यक्षराण्येव छन्द । नेत्याह ।

'चत्वारि वाव शतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि' इत्येवमक्षरसंख्यानं स्मर्यते । तस्मान्न तावदक्षराणि छन्द स्यात्। अथ किं यदमैते वर्णा श्रूयन्ते तच्छन्द । नेत्याह। वर्णा हि ते भवन्ति । व्यभिचरन्ति च ते ते वर्णा , अथाप्यनुवर्तते छन्दस्त्वमतो नैते वर्णाश्छन्द स्यात्। कि यदयं वर्णक्रमस्तच्छन्द । नेत्याह। क्रमो हि नाम पौर्वापर्यम्। न चानन्तर्भाव्यवर्णरूपं पौर्वापर्यं शक्यतेऽध्यवसातुम् । तथा च वर्णव्यभिचारे क्रमातिचार प्राप्नोति, अथाप्यनुवर्तते छन्दस्त्वमतो नैष वर्णक्रमश्छन्द स्यात्॥ अथ यदयं गुरुलघुक्रमस्तच्छन्द । नेत्याह । यत्रापि नैवं गुरुलघुक्रमस्तत्रापीष्यते छन्दोव्यवहार । स न स्यात् अथोच्येत । नोच्यते त्विदमित्थं गुरुलघुक्रमश्छन्द इति । किं तर्हि यथाकथंचित्क्रियमाणो गुरुलघुक्रमश्छन्द स्यात् । नैतदेवमपि शक्यं वक्तुम् । गद्यपद्यविवेकस्तत्तर्हि व्याहन्येत । यथाकथंचित्क्रमस्य छन्दस्त्वेऽभ्युपगम्यमाने तदवच्छेदकभेदासंभवात् सप्त छन्दासीति व्यवहारोऽपि न प्राप्नोति । तस्मान्नैषोऽपि गुरुलघुक्रमश्छन्दः स्यात् । अथ यदत्रत्यमक्षरपरिमाणं तच्छन्द इति चेन्नैतदपि शक्यं विज्ञातुम् । यत्रापि नैतदक्षरपरिमाणं तत्रापीष्यते छन्दोव्यवहार । स न स्यात् । अथ यथाकथंचिदक्षरपरिमाणं छन्द इति चेन्नैतदप्यस्ति । क्रमवादेन प्रत्युक्तत्वात् । अथ किमनेन मन्त्रेण यत्प्रतिपाद्यते सा विद्या छन्द । नेत्याह । विद्या हि नाम सा अर्थविषयिणी स्यात्, शब्दविषयं तु छन्द प्रतिपद्यते—इति विषयभेदो भवति । ननु च भो , न मन्त्रबोध्योऽर्थ एव विद्या स्यात् कि तर्हि मन्त्रस्यापीष्यते विद्याशब्देन व्यपदेश । तथा च मन्त्रत्रैविध्याद् ऋग्यजु सामानीति त्रैविद्यमुपदिश्यते। गद्यपद्यगानानि चैतानि ऋग्यजु - सामानि न छन्दसोऽतिरिच्यन्ते । पद्यादित्रैविध्येन छन्दस्त्रैविध्यस्य साम्प्रदायिकैरभ्युपेतत्वात् । सत्यमेतत् । यदि हि नाम पद्यमृक्, गद्यं यजु , गेयं साम—इत्येवाभिप्रेतं भवताम् । तत्तर्हि नूनमेषा भेदाभेदप्रयोजकधर्मानप्युदाहरिष्यति भवान् । किनिबन्धनोऽयं भेद —पद्यमितराभ्यामतिरिच्यते गद्यमितराभ्यामिति । अथ कस्मात् पुनः पद्यमपि छन्दो गद्यं च गेयं चेति । तदर्थमिदं पृच्छाम —किमिदं छन्द इति ॥

(इति छन्दस्तत्त्ववादे प्रश्नग्रन्थः ।)

अत्रोच्यते—प्राणमात्रा छन्द । सर्वं चेदं स्थावरजङ्गमं सप्राणमेवेह जीवति । प्राणधारणं हि जीवनम् । अत प्राणापगमे निर्जीवं विनश्यति सर्वम् । स च प्राण सर्वत्र व्यक्तिभेदभिन्नया कयाचिन्नियतयैव मात्रयावस्थाय स्वप्रणीतं स्वायत्तं शरीरमधितिष्ठतीति प्रतिपद्यते । तत्र वाचिकप्राण स्वर इत्युच्यते ।तन्मात्रा वाचिकच्छन्द । एवं भौतिकप्राणो वैश्वानरः । तन्मात्रा च भौतिकच्छन्द इत्यनुसधेयम् । मात्रा च पुनरवच्छेद । यद्यपि च नियतासु वाक्षु प्रयुञ्जते छन्द शब्दम् । अथापि नैतावता वागेव छन्द शब्दवाच्येति भ्रमितव्यम् । नीलश्वेतादिशब्दाना गुणवाचकतया जाति-

शब्दत्वेऽपि गुणपरत्वेनोपचाराद् गुणशब्दत्वमवदस्य छन्द शब्दस्यापि गुणशब्दत्वन्यथा रोपपत्ते । तस्मादवच्छेदकछन्द इत्येव सिद्धान्त । स च मानेन वा प्रतिष्ठया वा तुष्टितफेन वा क्रियमाणो वस्तुस्वरूपमयादाय च । ननु—'स च्छन्दोभिरछमस्तस्माच्छन्दांसीत्या चक्षते ।' 'ते छन्दोभिरात्मानमाच्छादयन् यज्ञेभिराच्छादयन्, तच्छन्दसां छन्द स्त्वम् ।' 'ते छन्दोभिरात्मान छादयित्योपायन्, तच्छन्दसां छन्दस्त्वम् ।' छाद यन्ति इ वा एनं छन्दांसि पापात् कर्मणः । 'गायत्रेण छन्दसा त्वा छादयामि' इत्या यसकृन्मिर्षचनश्रवणादाच्छादकस्य छन्दस्त्व लभ्यते नत्ववच्छेदस्य । आच्छादकाना मवच्छेदकत्वसंभवेऽपि अवच्छेदकानामाच्छादकत्वासंभवात् । अत एव तु लोकेऽपि मानस्य प्रतिष्ठायास्तुलितस्य वा छादकत्वाप्रसिद्धि इति चेन्न । अप्रसिद्धेरप्रसिद्धे । तथा हि—केयमप्रसिद्धि । लौकिकानामप्रतिपत्तिवा स्वरूपतोऽसत्त्वं वा । नाद्य । न हि लौकिकानामप्रतिपत्त्या प्रमाणसिद्धोऽर्थ शक्यमनभ्युपगन्तुम् । प्रतिपत्तिमात्रेण वा प्रमाणान्तरैरसिद्ध शक्यं म्रीकर्तुम् । व्यवहारसिद्धिप्रवणा हि लौकिका न वस्तु सत्त्वमपेक्षन्ते । 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्प' इति पातञ्जलोक्तरीत्या विकल्प रूपा व्यवहारतामसत्यप्यर्थे प्रतिपत्तिदर्शनात् । अत एवाम्परये प्रमाणत सिद्धेऽपि हास्यशृङ्गारकीर्त्यादीनां शुद्धत्वं प्रेमानुरागवीरादीनां रक्तत्व, द्वेषापकीर्त्यादीनां कृष्ण त्वमनृतं व्यवहारत प्रतिपद्यन्ते न तु सन्तमर्थम् ॥

१– मम नक्षत्रमजरमात्सूर्य रोहयो दिवि । दधज्ज्योतिर्जनेभ्यः ॥ १ ॥
(ऋ. ८ अ ८ अ १४ व)

२– प्रजाह तिस्रो अत्यायमीयुन्यन्या अकमभितो विविशे ।
बृहद ह तस्थौ भुवनेष्वन्त पवमानो हरित आविवेश ॥
(ऋ. ९ अ ७ अ ८ व)

३–'इद श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
विश्वभ्राड् भ्राजो महिसूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥
(ऋ. ८ अ ८ अ २८ व)

४–'एषो ह देव प्रदिशो नु सर्वा पूर्वो ह जात स उ गर्भे अन्त ।
स एव जात स जनिष्यमाण प्रत्यङ्जनास्तिष्ठति सर्वतोमुख ॥
(यजु १२ अ ३ क ४ मं)

५–'एक एवाग्निबहुधा समिद्ध एक सूर्यो विश्वमनु प्रभूत ।
एकैवोषा सर्वमिदं प्रभाति एकं वा इदं विबभूव सर्वम् ॥'

६– सोम पूषा च चेतथुर्विभासां सुक्षितीनाम् । देवत्रा रम्योहिता ॥'
(सा २ प्र २ अ ६ द)

७– अहं परस्तादहमवस्ताद् यदन्तरिक्षं तदु मे पिताभूत् ।
अहं सूर्यमुभयतो ददर्श यह देवानां परम गुहा यत् ॥

इत्येवमादिभिर्वेदप्रमाणै सिद्धेऽपि सूर्यस्य स्थिरत्वे, पृथिव्याश्चलत्वे वैपरीत्येनानृत व्यवहारत प्रतिपद्यन्ते । न तु सन्तमर्थम् ॥

"स एष वा न कदाचनास्तमेति, नोदेति । तं यदस्तमेतीति मन्यन्ते, अह्न एव तदन्तमित्वा अथात्मानं विपर्यस्यते । रात्रीमेवावस्तात् कुरुते, अह्न परस्तात् ॥ अथ यदेनं प्रातरुदेतीति मन्यन्ते—रात्रेरेव तदन्तमित्वा अथात्मानं विपर्यस्यते, अहरेवावस्तात् कुरुते, रात्रीं परस्तात् । स वा एष न कदाचन निम्लोचति ॥" इत्येवमैतरेयादिश्रुत्या सष्टमेवाहोरात्रयो पृथिवीगतिनिमित्तकत्वे सिद्धेऽप्यनृतं सूर्यगतिनिमित्तकत्वं सूर्यास्तमनं च व्यवहारत प्रतिपद्यन्ते न तु सन्तमर्थम् ॥

एवं घटशब्दप्रयोजकाकाराकारितान्त करणवृत्त्यवच्छिन्नचैतन्यस्यैकत्वात्तदभिन्नतयैवैकत्वेन प्रतिपन्नस्य मृत्तिकाणुविलक्षणसनिवेशात्मकघटरूपावच्छिन्नचैतन्यस्य घटत्वतया तदवच्छेदेन घटशब्दसंकेतसिद्धा तत्तद्व्यवहारोपपत्तौ सिद्धायामपि समवायेनावयवेषूत्पन्नोऽवयवातिरिक्तोऽपूर्व कश्चिदवयवी घटशब्दवाच्य इत्येवमनृतं व्यवहारत प्रतिपद्यन्ते । न तु सन्तमर्थम् ॥

किं बहुना । लोके हि सर्वत्रैवार्थे प्रतिपत्तिस्त्रिविधा दृष्टा—पारमार्थिकी, व्यावहारिकी, प्रातिभासिकी चेति । पारमार्थिकी, आर्थिकी, वास्तविकीत्यनर्थान्तरम् । व्यावहारिकी, औपयौगिकी, औपचारिकीत्यनर्थान्तरम् । प्रातिभासिकी, आध्यासिकी, वैकल्पिकीत्यनर्थान्तरम् । यथा काचे स्फटिकबुद्धिराध्यासिकी, काचे काचबुद्धिरौपयौगिकी, काचे मृद्बुद्धिरार्थिकी । एवं पृथिव्यपेक्षया सूर्यस्य कूटस्थता वास्तविकी, पृथिवीं परितः सूर्यस्य वार्षिकगति पूर्वाभिमुखीना औपचारिकी, पृथिवी परित सूर्यस्य दैनंदिनगतिः पश्चिमाभिमुखीना प्रातिभासिकी । इत्येवं सर्वत्र त्रैविध्यं द्रष्टव्यम् । तत्र प्रातिभासिक्या मिथ्यात्वमेव, वास्तविक्या सत्यत्वमेव, व्यावहारिक्या सत्यासत्यत्वम्। अन्यथा सतोऽपि व्यवहारसिद्ध्यनुरोधेनान्यथा प्रकल्पितरूपस्य लोके उपयोगदर्शनात् ॥

एतदभिप्रायेणैव 'नानृतं वदेत्' इति प्रतिज्ञाय—"अथो खल्वाहु —कोऽर्हति मनुष्य सर्वं सत्यं वदितुम् । सत्यसहिता वै देवा , अनृतसंहिता मनुष्या ।" इत्यैतरेयके, 'द्वयं वा इदं न तृतीयमस्ति सत्यं चैवानृतं च । सत्यं देवा., अनृतं मनुष्या ।' इति शतपथश्रुतौ च व्यवहारसापेक्षत्वेऽनृतनिष्ठत्वान्मनुष्यत्वम्, वस्तुसद्रूपसापेक्षत्वे तु सत्यनिष्ठत्वाद्देवत्वमुपदिष्टं महर्षिभि । अत एव च—'शतं वर्षाणि जीव्यासमित्याह । तदेतद्ब्रुवन्नाद्रियेत । अपि हि भूयासि शताद्वर्षेभ्य पुरुषो जीवति ॥' इति शतपथश्रुतौ स्पष्टमेव लौकिकप्रतिपत्तिमूलकव्यवहारस्यानादरणीयत्वमुपदिश्यते । तस्मान्नैतादृशलौकिकप्रतिपत्त्यभावमनुरुध्य कश्चिदर्थ प्रमाणसिद्ध शक्यते प्रत्याख्यातुमिति दिक् ।

अथ न स्वरूपतोऽसत्त्वमप्रसिद्धि । छादकत्वस्यैव छन्द पदशक्यतावच्छेदकतया तत्र तदसत्त्वानवक्लृप्ते । न च स्यादेवमाच्छादकत्वं यदि तावच्छन्दस्त्वं मानादीना प्रमाणसिद्धं स्यादिति वाच्यम् । 'मा च्छन्द , प्रमा च्छन्द प्रतिमा च्छन्द.' इति श्रुत्या

छन्दस्त्वस्य तेषु वचनत सिद्धे । संख्यादिपरिच्छेदे माशब्दस्य, तत्तदर्थायतनभूता यामाधयपदवाच्यायां वस्तुप्रतिष्ठायां प्रमाशब्दस्य, तुलितके च प्रतिमाशब्दस्य व्याख्या स्यमानत्वात् । नन्वेष तर्हि तदुभयवचनप्रामाण्यान्मानत्वं प्रतिष्ठात्व तुलितकत्व मयाच्छादकत्व चैतानि शक्यतावच्छेदकानि स्युर्नत्वेतावतापि मानाधवच्छेदानामा च्छादकत्व सिद्धयतीति चेन्न । यदेभिराच्छादयन् तच्छन्दसां छन्दस्त्वम्' इत्येवमा दीनां छादकत्वस्यैव छन्द पदप्रवृत्तिनिमित्तत्वमभ्युपगच्छीणां श्रुतीनां छन्द पदाभिधेयेषु तेष्ववच्छेदेष्वाच्छादकत्वस्यास्खित्वबोधने एव तात्पर्यावसानात् । तत्तर्हि कीदृगाच्छा दकत्वमवच्छेदानामिष्टमिति चेन्नेतरदितराच्छादकधर्मादिति गृहाण । ननु च भो — येनैव सता तद्वस्तुस्वरूपं न प्रतिपद्यते तिरोहितं भवति तस्मिन्नन्तर्धानप्रधाने संव रणे आच्छादनशब्दो दृष्ट । घटाच्छादित प्रदीप वस्त्राच्छादित द्रव्यम्, रजसा च्छादिते भानौ, स्तनयुगपरिणाहाच्छादिना वल्कलेन,'

न हया न रथो धीर न यन्ता मम दारुक ।
अदृश्यन्त शरैश्छन्नास्त्वयाहं सैनिकाश्च मे ॥ —

इत्यादिषु दीपादीनां घटादिद्रव्यैस्तिरोधानेनाप्रतिपत्तिदर्शनात् । प्रकृते पुनर्नैतदेवं दृश्यते । न चावच्छेदेन सता तदवच्छिन्नं किंचिदन्तर्धत्ते तस्मादनाच्छादका अव च्छेदा प्रतिपद्यन्ते—इति चेत्सत्यमुच्यते । न केवलमन्तर्धानमेवाच्छादनशब्दस्य विषय किं तर्हि बहवो विषयास्तच्छब्दस्योपलभ्यन्ते । तथा हि— अभ्राच्छादनभा गयम्, आच्छाद्य चार्हयित्वा च श्रुतशीलवते स्वयमित्यादिषूपसंख्यानम् ॥ १ ॥ 'आभूषाणाच्छादिताङ्गी' छदयति सुरलोकं यो गुणैर्यं च युद्धे सुरयुवतिविमुक्ताश्छा दयन्ति सजय । इत्यादिषु पर्योधानम् ॥ २ ॥ 'चन्दनच्छन्नगात्र तैलाच्छन्न कलेवरम्, घृताच्छन्नं व्यञ्जनम्' इत्यादिषु चर्चितकत् ॥ ३ ॥ मेघच्छन्नेऽह्नि दुर्दिनम्, 'कण्टकच्छन्नमार्गेषु' इत्यादिष्वपरोध ॥ ४ ॥ 'ईशावास्यमिदं सर्वम्' आच्छादयते स्वदशसा समस्तम्' इत्यादिषु व्याप्ति ॥ ५ ॥ छादयमानन वेगैरर्दयन्नमन्नमञ्जनै । निरुच्यते छर्दिरिति दोषो वक्त्र प्रधावित' ॥ (सुश्रुत) इत्येवमादिषु दूषितकरणम् ॥ ६ ॥ निषिक्तं तु हंसपक्षै कक्वाकुमयूरसारसानां च । दौकूलेन नवेन तु सम न्ततश्छादितं शुक्लम् ॥ दण्डार्धविस्तृतं तत्समावृतं रत्नभूषितमुदग्रम् ॥ नृपतेस्तदा तपत्र कल्याणकरं विजयद च ॥ अन्येषामुष्णत्रं प्रसादपट्टैर्विभूषितशिरस्कम् । व्याल म्बिरत्नमालं छत्र कार्यं च मायूरम्' ॥ (बृहत्संहिता ।) इत्येवमादिषु स्वरूपकरणम् ॥ ७ ॥ अभिमन्तश्छादयसि' (अथ ९ । ३ । १४) अभ्र छादयेदाज्येन' (कात्या यनश्रौतसूत्रम् ४ । ६ । ५) इत्येवमादिपूर्त्तनम् ॥ ८ ॥ छन्ने स्थाने समासीन इत्या-दिषु विविक्तत्वम् ॥ ९ ॥ 'गमय्य गोकुले तत्र वसुदेवप्रणोदित । प्रच्छन्न एव गोपानां संस्कारानकरोत्तमो ॥ (विष्णु पु ५ अ ६ अ) इत्यादावज्ञानत्वम् ॥ १० ॥ 'गाय त्रेण छन्दसा त्वा छादयामि त्रैष्टुभेन छन्दसा त्वा छादयामि छादयन्ति ह वा एनं

छन्दांसि पापात्कर्मण ' इत्यादिषु गोपनं च ॥ ११ ॥ इत्येवमनेके विषयाश्छादनस्य भवन्ति । न चैतेषु छाद्यस्यान्तर्धानमेव दृष्टमथाप्यनुवर्तते स आच्छादनशब्द । तदित्थं सिद्धेऽनैकार्थ्ये यदिदं गोपनापरपर्यायमाच्छादनं रक्षाभिप्रायं तदिहावच्छेदकानुगतं द्रष्टव्यम् ॥ अवच्छेदावच्छिन्नस्य स्वरूपतोऽप्रच्यवनेन सुगुप्तत्वात् ॥

अथान्य प्रत्यवतिष्ठते—नेदमनैकार्थ्यं युक्तम्, प्रकरणोपलभ्यार्थे शक्तिस्वीकारानावश्यकत्वात् । वस्तुतस्तु अपवारणे छादयति प्रतिपन्न । तच्च द्विविधम् । एकदिग्वर्तित्वे आवरणमथानेकदिग्वर्तित्वे सवरणं च । इदं च सवरणं वस्तुत स्वरूपाननुगतमपि द्वेधा—पृथग्दृष्टमपृथग्दृष्टं च । तथा हि—मेघच्छत्रभित्त्यादीनामावरकत्वेनोपसंवीतघटादीना बहिरवस्थाना दिग्देशकालसंख्यापरिमाणादीनां व्याप्यवर्तिना च सवरकत्वेन प्रतिपत्ति । अनेकदिग्वर्तिनोऽप्येकदिग्वर्तित्वाव्यतिरेकात् संवरणेऽप्यावरणशब्दो लब्धावसर इत्यन्यदेतत् । उभयोरेवानयोर्दृष्टिसम्बन्धप्रतिवन्धकत्वमेवाच्छादनशब्दप्रवृत्तिनिमित्तम् । प्रतिवन्धकतावच्छेदकं च दृग्दृश्यान्तरालवर्तित्वं व्यवधानापरपर्यायम् । मेघच्छन्नेऽह्नीत्यत्राह शब्दस्याह प्रवर्तकसूर्यपरतया सूर्यांशुपरतया वा विवक्षणात्तददर्शन मेघावरणप्रयोज्यं द्रष्टव्यम् । ईशावास्यमित्यत्र तु नायमाच्छादनकर्मा वसिधातु किं तु निवासार्थं । 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'नेन्द्राद्दते पवते धाम किंचन' इत्यादिश्रुत्यन्तरैकवाक्यतया सर्वत्रैवास्य विद्यमानत्वे तत्तात्पर्यात् । अथवा—अस्त्वेवाच्छादनार्थं । तात्त्विकदृष्टेर्महर्षेर्यत्र यत्रैव दृष्टि प्रवर्तते तत्र तत्रैव परमेश्वरादन्यन्न दृश्यते—इत्येकस्य तस्य सर्वद्वैतदृष्ट्यपवारकत्वेन विवक्षणादाच्छादकत्वोपपत्ते ।एतेन 'आच्छाद्यते त्वद्यशसा समस्तम्' इत्यादयो व्याख्याता । 'गूढालंकारवाक्येऽर्थं प्रच्छन्न ' इत्यादावप्यनुभवात्मकदृष्ट्यपवारणादेवार्थस्य तत्त्वमुपपद्यते । इति विवेक्तव्यम् । तथा च छन्नाच्छादितादीना प्रतिबद्धदर्शनार्थकत्वादवच्छेदावच्छिन्नाना चानवरुद्धदर्शनत्वेनाभिप्रेतत्वान्नावच्छेदानाच्छादकत्वमनाच्छादकत्वाच्च नावच्छेदश्छन्द इति चेत् । अत्रोच्यते । नैकान्ततस्तावद् दृगवरोधकस्येवाच्छदकत्वं वक्तुं शक्यम् । एकान्ते स्थितवता पुंसां छन्ने स्थाने तिष्ठाम इति प्रतिपत्तिदर्शनात् । न च 'वर्षातपात् कृच्छ्रं छन्नाच्छादितवर्ष्मण , इत्यादौ च सर्वात्मना दृश्यमानस्यापि पुंसश्छन्नछन्नत्वोपचारात् । एवं दृष्टिप्रतिवन्धनैरपेक्ष्येऽपि केवलं वर्षातपावश्यायाद्यवरोधकाना गृहच्छदीना चन्द्रातपादीना वाच्छादकत्वमुपचर्यते । अत एव च 'काचेनाच्छादिते दीपे न लब्धावसरोऽनिल ' इत्येवमादयो व्यवहारा अपि सिद्धार्था । तस्मादितरसंबन्धापवारकत्वमेवाच्छादकत्वमिति निष्कर्ष । विशेषधर्मावच्छिन्ने शक्तिमभ्युपगम्य विशेषान्तरे लाक्षाणिकत्वस्वीकारापेक्षया सामान्यधर्मावच्छिन्ने शक्तिस्वीकारस्य न्याय्यत्वात् । इतरत्वं च क्वचिद् दृष्टे क्वचित्तु नाष्ट्रा[1]ख्याना प्रतिविघातकानामर्थानाम् । तत्र दृष्टिसवन्धापवारणे छन्नस्य गुप्तत्वमप्रकाशात्मकं गूढत्वापरपर्यायम् । दोषसंवन्धापवा-

---

(१) नाष्ट्रा—इति वेदमन्त्रेषु वहुधा प्रयुक्तो वैदिकशब्द कार्यनाशके विघ्ने रूढ.

रणे तु तस्य गुप्तत्वं नाच्छादितत्वात्मकं रक्षितत्वापरपर्यायमिति तात्पर्यभेदोऽप्यव सीयते। तथा भावच्छेदानामप्यवच्छिन्नस्वरूपानुगत्तयावद्वयवप्रत्यासत्तिप्रयोजकदोषसंघ घात कारकतया सिद्धमेव स्वरूपच्छादकत्वं छन्द शब्दप्रवृत्तौ निमित्तं द्रष्टव्यम्। दृश्यते हि केन चिदवच्छेदेनावच्छिन्ने रूपादौ चाक्षिविशेषे ब्राह्मणादावर्थविशेषे वा तत्स्वरूपोपघातकविरु द्धावच्छेदसंघ घातपरिहारात्मकगुप्तिसाधनतया तदवच्छेदे छन्दोव्यपदेश । इदं तु बोध्यम्—आच्छादकस्याविशेषेऽप्येकदिग्वर्तिन्यावरणे छन्द शब्दो नोपचर्यते। सव रण एव छन्दसे प्रतिपन्नत्वात्। तत्राप्यपूर्वदृष्टे व्याप्यवर्तिन्येवाय छन्दति प्रायेण विपर्यं लभते । तथा च 'वासुदेव ! सर्वछन्दक ! हृषिकेश ! हरिमेध ! महा यज्ञ !"—इति महाभारतप्रयोगो भवति। छन्दयति संगृणोति रक्षति स रक्षक इत्य र्थात्। तदित्थमेकार्थ्येऽपि सिद्धमवच्छेदानामाच्छादकत्वाच्छन्दस्त्वमित्यलम्॥

अथ के तेऽवच्छेदा इति विचार्यते। गुणसमवायो हि वस्तुश देनास्त्यायत्ते गुणो धर्मो भाव इत्यनर्थान्तराणि। तेषां समवायश्चैकात्म्येनावस्थानम्। लोकव्य वहारे च समवायस्य प्राधान्यात्तदनुरोधेन तदन्तःप्रविष्टानामर्थानां गुणत्वम्। समवाये नते म्रियन्ते तेषां समवायो म्रियते इत्येषां धर्मत्वम्। तैरेव सन्दिग्धस्तु तदितरवस्तुषु लक्षण्येन भवतीत्येषां भावत्वम्। सर्वेषां वस्तुधर्माणां समवायेन सत्ताग्रहण सत्तय वा भाव । तात्स्थ्यात्तदनतिरेकाच्चासौ समवायोऽपि भावशब्देन सत्त्वशब्देन चोप चर्यते—इत्यन्यदेतत्। एते वस्तुधर्मा पञ्चधा व्यवच्छिद्य गृह्यन्ते—आश्रयभावा, प्रयोजकभावा स्थायिभावा व्यञ्जकभावा, संचारिभावाश्चेति। तत्राम्बुसंमिते वस्तु न्यग्ने, अप्संमिते वस्तुनि सोमस्य, मापुसंमिते वस्तुनीन्द्रस्य, तेज संमिते वस्तुन्या दित्यस्याऽलम्बनत्वात्तस्य तस्य तत्र तत्राश्रयभावत्वम्।

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृत म आसन्।"—(ऋ. ३ अ ३ अ २७ व) इति मन्त्रवर्णकमनुरुध्यतां तु सर्वत्रैवाग्नेरेवाश्रयभावत्वमिति मतमेतत्।

अपि—

समिद्धा प्रसमिद्धा सरस्वत्या वाचा त्वष्ट्रा रूपै, पूष्णा पशुभि, रिन्द्रेणास्मे बृहस्पतिना ब्रह्मणा, वरुणेनौजसा, मित्रा तेजसा, सोमेन राज्ञा, विष्णुना दशम्या, देवतया प्रसूत प्रसर्पामि॥" (वाजसनेयि अ ३ १० म ३०)

इत्येवमादिमन्त्रबोधितानां शरीरगतमिमामिमकर्माधिकारनियुक्तानां तेषां तेषां देवानां प्रयोजकभावत्वम्।

प्रयोजकत्व च—

सोमो राजा वरुणो देवा धर्मश्रुतश्च ये। ते ते चक्षु शुचन्ताम्। ते ते प्राण शुचन्ताम्। ते ते चक्षु शुचन्ताम्। ते ते श्रोत्र शुचन्ताम्।

इत्यादिमन्त्रैरुपलक्षणविधया तत्तद्धर्मविशेषान् प्रत्येवानुसंधेयम्।

अत एव—

"सोमस्य त्वा द्युम्नेनाभिषिञ्चामि, अग्नेस्तेजसा, सूर्यस्य वर्चसा, इन्द्रस्येन्द्रियेण, मित्रावरुणयोर्वीर्येण, मरुतामोजसा ।" इति (तै सं)

एवमादिमन्त्रै सोमाद्यधिदैवतानामध्यात्मं द्युम्नादिधर्मरूपेण परिणतावस्थत्वमेव तत्तद्धर्मप्रयोजकत्वं बोध्यते । एत एव च देवप्रयुक्ता धर्मास्तदात्मन स्वभाव इत्युच्यते तस्य द्वैविध्यमाहोज्वलदत्त —

'बहिर्हेत्वनपेक्षी तु स्वभावोऽथ प्रकीर्तित ।
निसर्गश्च स्वभावश्च इत्येष भवति द्विधा ॥ १ ॥
निसर्ग सुदृढाभ्यासजन्य सस्कार उच्यते ।
अजन्यस्तु स्वत सिद्ध स्वरूपो भाव उच्यते ॥ २ ॥

एतत्संस्कारात्मकनिसर्गसिद्ध्यर्थमेवाध्ययनतपश्चर्यायोगाभ्यासादिकर्माण्युपयुज्यन्त इत्यप्यवधेयम् ॥ उपादानद्रव्याणि स्थायिभावा । एवमेते त्रयो भावा उक्ता., ते च प्राणिनामात्मभूता इष्यन्ते । तत्रापि आश्रयभावो जीवात्मा, प्रयोजकभावोऽन्तरात्मा, स्थायिभावो भूतात्मा । यस्य सत्तया यस्य सत्ता स तस्यात्मा । स च प्रत्यर्थं त्रेधेति तत्र तत्रोपेक्ष्यम् । अथ येऽनात्मभूता अप्यपृथक्भूता विशेषतो व्यभिचारिणोऽपि सामान्यतो नित्यानुगता वाह्यार्थास्ते व्यञ्जकभावा दिग्देशकालसवित्संख्यापरिमाणसाधर्म्याणि । एत एव व्यञ्जकभावा इहावच्छेदकशब्देनेष्यन्ते । एतैरवच्छिन्नमेव किंचिद्वस्तु व्यज्यते । तत्र परिमाणं नामावयवसनिवेशानुरोधेन जायमानमणुत्वमहत्त्वह्रस्वत्वदीर्घत्वादिरूपम् । साधर्म्यं तु समानद्रव्यगुणकर्मकत्वम् । नैतान्यनपेक्ष्य वस्तु किंचिदपि स्वरूपं धत्त इत्यवच्छेदकानामेषां तद्वस्तुस्वरूपस्थितिनियामकप्राणमात्रारूपाणा तद्वस्तुच्छन्दस्त्वमिष्यते । अथान्ये व्यभिचारिण सर्वे धर्मा सचारिभावा । यथा आर्द्रत्वोष्णत्ववेशभूषादय सायौगिकार्था । एतेऽप्यनात्मभूता एव । तेषा सत्त्वासत्त्वयोस्तद्वस्तुस्वरूपस्य तटस्थत्वात् । तदित्थं प्रत्यर्थं धर्माणा पञ्च प्रकरणानि । तत्र चतुर्थप्रकरणपदार्था अवच्छेदा इति संसिद्धम् ॥

तत्र तावद्दिग्देशकालसंवित्संख्याप्राधान्येन गृहीतास्तेऽवच्छेदा इतरे गुणा वा तद्वस्तुनो व्यक्ति । एतेषा भेदकाना भेदादेव पृथगात्मत्वोपचारात् । अथ परिमाणप्राधान्येन गृहीतास्ते तद्वस्तुन आकृति । एभिरेव भेदकैर्गृहीतैरस्तीदमिदमिति बुद्धौ तदा करणात् । एवं साधर्म्यप्राधान्येन ग्रहणे ते तद्वस्तुनो जाति । इतरकालिकेतरघटाकाराकारितान्त करणवृत्त्या प्रत्युत्पन्नैतद्घटाकाराकारितान्त करणवृत्ते सामान्येनोदयात्तत्प्रयोजकस्य तद्वस्तुगतसाधर्म्योपलक्षितपरिमाणादेश्चैकत्वाभिमानात् । तत्र साधर्म्यं समानप्रसवप्रकारनिबन्धनमेवेह विवक्षितमित्यतस्तत्र जातिशब्दो रूढ । अत एव मृद्वत्वके गोसाजात्यनिरास । जातिरखण्डोपाधिरिति तु केषाचिदपदार्थकल्पनामात्रम् । एतासा व्यक्त्याकृतिजातीना समवायस्तु पदार्थ । यत्तु 'धर्मविशेषप्रसू-

साद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञा नान्निःश्रेयसम् ।' इत्यीदूक्यसूत्रप्रामाण्याद्द्रव्यादीनां पण्णां पदार्थत्वमीक्षमाणा नव्य नैयायिका गुणादावाकृत्याश्रयसमन्वयाद् व्यक्त्याकृतिजातिसमवायस्य पदार्थत्वे विप्र तिपद्यन्ते तदेतत्सूत्राशयानभिज्ञानात् । द्रव्यगुणकर्मणां सत्तावतामेव सामान्यविशे षाभ्यां ये समवायास्तेषामेव पदार्थतायास्तेन सूत्रेण विवक्षणात् तदविरोधात् । इत्यतो नेवास्मिन्नेवार्थे तदुत्तरयोर्नान्यत्वारम्भः। अत एव नहि षट् पदार्था सन्तीति शास्त्रार्थ । किंतु द्रव्ये गुणकर्माणि द्रव्यगुणकर्माणि वैकत्र समवयन्ति तस्य सत्तासत्त्वमात्रादिपदप्रतीत स्यार्थस्य पदार्थत्वं द्रष्टव्यम् । स खलु भावो यद्यप्येक एव तथापि कर्मगुणादीनां सामान्यविशेषाभ्यां तारतम्यात् तदुपलक्षिता समवाया भियन्ते । तस्माद्बहव पदार्था षट्पदार्थत्वस्य सिद्धा । अस्ति हि घटो वा पटो वान्यो वा द्रव्यगुणकर्मणामेव स स समवाय । तथापि केषिद्गुणा जात्याकृतिरूपा समाना भवन्ति केचित्पुनर्व्यक्ति धर्मा विशिष्यन्ते । अत एवैककातीया अपि ते तेऽर्था परस्परं भियन्ते । तस्माद्द्र व्यगुणकर्मणां समवाय एव प्रकारान्तरविवक्षायां व्यक्त्याकृतिजातीनां समवाय आम्या मते । अत एव 'आत्माकृतिव्यक्तय पदार्थ —इत्युत्तरेणाद्यसूत्रेणैकवाक्यता संपद्यते । समवायस्तु भिमानामैकात्म्येनावस्थानमित्युक्तम् । तस्मिन्नपितैव च पदे शक्तिरभ्युपेयते—इत्यतस्त्वत्र पदार्थशब्द । पदनिष्ठशक्तिनिरूपकत्वस्यैव पदार्थत्वेन विवक्षितत्वात् । अथवोपयाच्यमानत्वादर्थ प्रयोजनम् । यमुद्दिश्य यत्प्रवर्तते स तस्यार्थ । तथा च यदर्थ पदप्रयोगः स पदार्थ । व्यक्त्याकृतिजातिसमवायं प्रत्या ययितुं हि पदप्रयोग इति स पदार्थः । तासां च व्यक्त्याकृतिजातीनामुद्देशलक्षणपरी क्षामि स्वरूपं निरूपयितु प्रवतन्ते पारमर्षसूत्राणि—

व्यक्त्याकृतिजातयस्तु पदार्थ । व्यक्तिगुणविशेषाश्रयो मूर्ति । आकृतिजाति लिङ्गाख्या । समानप्रसवात्मिका जाति । शब्दसमूहत्यागपरिग्रहसंख्यावद्वृत्त उप चयवर्णसमासानुपचाराच्च व्यक्तावुपचाराच्च । आकृतिस्वरूपेक्षत्वात् सत्त्व व्यवस्थानसिद्धे । व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्दारुके जाति । इति ।

तदित्थं व्यक्त्याकृतिजात्याश्रये पदार्थे बहूनां धर्माणां सद्भावेऽपि यं कंचिदेकमे वार्थमुपादाय तत्संबन्धानुपचेन गुणिनमर्थं प्रत्याययितुं पदानि संकेतयन्ते । यथा— मदीय श्वेत कृष्णकर्णो महारवश्चुरग शुभलक्षण । इत्यत्र मत्सबन्धं श्वेतरूप कर्ण कृष्णत्वं शब्दमहत्त्व त्वरागतिं शुभलक्षणसंबन्ध च विप्रकीर्णं तं तमर्थं निमित्तीकृत्य प्रवृत्तानां तेषां तेषां शब्दानामाकाङ्क्षापत्तात् सामानाधिकरण्य भासते । एवमेकमे वार्थमुपादाय प्रवृत्तयोरपि छन्दश्छादकशब्दयोराकाङ्क्षाविशेषात् स्वरूपसंरक्षकत्वस्य स्वरूपतिरोभावकत्वस्य चान्यत्रान्यत्र विषयीकरणात् वैयधिकरण्यं भासते । तथेवमु भयथा पदार्थमर्यादा भवतीत्यप्यनुसंधेयम् ॥

तत्रैवं व्यक्तिभावप्रधानं दिग्देशकालसवित्संख्यारूपमवच्छेदं परिच्छेदसीमाम दाभिविधिनियतिनीतिरीतिव्यवस्थामितिमानापरपर्यायं मानाभिधायिना माशब्दे आकृतिभावप्रधानमणुत्वमहत्त्वह्रस्वत्वदीर्घत्वनियामकसनिवेशरूपमवच्छेदं प्रतिष्ठाय नाशयपरिमाणप्रमाणापरपर्यायं प्रमाणाभिधायिना प्रमाशब्देन, जातिभावप्रधानं समानद्रव्यगुणकर्मरूपमवच्छेदं साधर्म्यसामान्यसादृश्यसारूप्यतुलितकप्रतिमितिप्रतिम नापरपर्यायं प्रतिमानाभिधायिना प्रतिमाशब्देनोल्लिख्य छन्दस्त्वं विधीयते। मा च्छन्द प्रमा च्छन्द , प्रतिमा च्छन्द इति ।

दृश्यते च—

'अस्तभ्नाद् द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या ।
आसीदद् विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥ १ ॥'
'गायत्रेण प्रतिमिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणी ॥ २ ॥'
(ऋ २ अ ३ अ. व. १८)

इत्यादिषु दैशिकसाख्यानिकमर्यादाभिप्रायकत्वं मावृत्तस्य,

'यस्य भूमिः प्रमा अन्तरिक्षमुतोदरम् ।
दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नम ॥' (अथर्वसं.)

इत्यादिषु प्रतिष्ठाभिप्रायकत्वं प्रमाशब्दस्य,

'संवत्सरप्रतिमा वै द्वादश रात्रय ' ॥ (ब्राह्मणम्)
'द्वादश वै रात्रय सवत्सरस्य प्रतिमा' ॥ (ब्राह्मणम्)

इत्यादिषु तुलितकाभिप्रायकत्वं प्रतिमाशब्दस्य ॥ तथा च मा-प्रमा-प्रतिमाशब्द रुल्लिखितस्य त्रिविधस्याप्यवच्छेदस्य वस्तुस्वरूपसंवरकत्वेनाभिप्रेतस्य छन्दस्त्वं व नत. सिद्धं भवति । ननु प्रमाप्रतिमयोरपि छन्दस्त्वेऽभ्युपगम्यमाने—

'कासीत् प्रमा प्रतिमा कि निदानमाज्यं किमासीत् परिधि क आसीत् ।
छन्द. किमासीत् प्रउगं किमुक्थं यद्देवा देवमयजन्त विश्वे ॥'
(ऋ ८ अ ७ अ १८ व.)

इति मन्त्रे प्रमाप्रतिमयोश्छन्द पार्थक्येनोपादानं विरुध्यते इति चेत्तन्न ।

"तस्माद् यज्ञात् सर्वहुत ऋच सामानि जज्ञिरे ।
छन्दासि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥
आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्व ऋभवश्च विश्वे ।
इन्द्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभि सदा न ॥"

इत्येवमादिषु विशेषोपादाने सामान्यशब्दस्य विशेषेतरपरत्ववदिहापि छन्द शब्द मानावच्छेदतात्पर्यकत्वेन चारितार्थ्यात् ॥ वस्तुतस्तु न मानत्वेन प्रतिष्ठानत्वेन तुलि

तकारेण वा छन्दस्त्वमिष्यते; अपि तु स्वरूपसंधरकत्वेनेति पदार्थतावच्छेदकभेदादपौनरुक्त्यम् ॥

ननु 'मा च्छन्द', प्रमा च्छन्द', प्रतिमा च्छन्द', 'इयं वै मा अन्तरिक्षं प्रमा, असौ प्रतिमा इमानेव लोकानुपयच्छते' इत्यभिचितिमन्त्रथमणाल्लोकत्रयाभिप्रायतया परिमापितैर्मात्रप्रमाप्रतिमाशब्दैर्मानाद्यवच्छेदग्रहणमयुक्तमिति चेन्न । चैत्रमैत्री न्यूप चेहस्थापितिवत्तेषां गौणशब्दत्वात् । अन्यथा—'अथ ध्रुवम्' अथोपसृतम्, अथ ध्रुवाम् । असौ वै ध्रुव, अन्तरिक्षमुपसृत् पृथिवी ध्रुवा । इमे वै लोका सुच सृष्टि संमार्जनानि । सृष्टिषा इमौल्लोकानुपूर्वं कल्पयति । वे तत स्रुसा समेधन्ते । (तै ब्रा ३ का ३ प्र १ अ) इत्यादिभिरुपचारविक्षेपे स्रुगादयोऽपि स्वार्थादपभ्रश्येरन् ॥

एवम्—

'मा छन्द तत्पृथिवी, अग्निर्देवता ॥ १ ॥
प्रमा छन्द तदन्तरिक्षम्, वातो देवता ॥ २ ॥
प्रतिमा छन्द, तद् द्यौ, सूर्यो देवता ॥ ३ ॥
अनीयि च्छन्द तदिदं, सोमो देवता ॥ ४ ॥
विराट्छन्द तद्वाक्, वरुणो देवता ॥ ५ ॥
गायत्री छन्द तदजा, बृहस्पतिर्देवता ॥ ६ ॥
त्रिष्टुप् छन्द तद्धिरण्यम्, इन्द्रो देवता ॥ ७ ॥
जगती छन्द तद्गौ प्रजापतिर्देवता ॥ ८ ॥
अनुष्टुप्छन्द, तदश्वा, मित्रो देवता ॥ ९ ॥
उष्णिहा छन्द तदवयु पूषा देवता ॥ १० ॥
पङ्क्तिश्छन्द तत्कृषि पर्जन्यो देवता ॥ ११ ॥
बृहती छन्द तदग्नि, परमेष्ठी देवता ॥ १२ ॥'

इत्यापस्तम्बश्रौत (१६ । २८ । १) सूत्रोक्ते प्रकरणविक्षेपे माप्रमादिवद् विराड् गायत्र्यादीनामपि मागत्राद्यभिप्रायतया प्रयोगाद् समानन्यायाद् प्रकृतार्थपरत्वं व्याख्येय ।

अत एव

'सावित्रेरग्निमादत्ते प्रसूत्यै । चतुर्भिरादत्ते चत्वारि वै छन्दांसि छन्दोभिरेवादत्ते । अथो ब्रह्म वै छन्दांसि । ब्रह्मणैवादत्ते । इयं वै गायत्री । अन्तरिक्षं त्रिष्टुप्, द्यौर्जगती दिशोऽनुष्टुप् । सवितृप्रसूतो वा एतेभ्यो लोकेभ्यश्छन्दोभिर्दिग्भ्यश्चामि संभरति ॥ इत्यभिचितिप्रकरणान्नानाद् गायत्रीत्रिष्टुब्जगत्यनुष्टुभां लोकदिक्परतया प्रतिपादितानामपि नैकान्ततः स्वार्थापलाप प्रसज्यते । अत एव च "इयं वै मा—अन्तरिक्षं प्रमा—असौ प्रतिमा—इमानेव लोकानुपयच्छते ।"

इत्युक्त्वा,

"अथो देवच्छन्दसानि वा एतानि, देवच्छन्दसान्येवोपधत्ते । द्वादश द्वादशाभिता उपदधाति। तत् पट्त्रिंशत्। षट्त्रिंशदक्षरा वृहती, वृहती खलु वै छन्दसा स्वाराज्यमानशे ।"

इत्यादिना लोकाना देवच्छन्दस्त्वं वृहतीछन्दस्त्वं चोपपादितम् । पट्त्रिंशदक्षरावच्छिन्नत्वस्यैव वृहतीपदार्थत्वाद् वाग्वृहतीवदेषा लोकानामपि तत्तदग्नीन्द्रादिदेवावच्छेदकाना तल्लक्षणलक्षितत्वेन तथा तथा व्यवहर्तुं सुशकत्वात्। तथा चेत्थं लोकानां प्रतिपन्ने छन्दस्त्वे छन्दोऽनुगतशब्दास्तत्रोपचर्यन्ते। तत्राप्यनुप्रजननसवन्धात्, प्रक्रमसामान्याद्, अर्थयोगाच्च लोकत्रयेऽवच्छेदत्रयशब्दसवन्ध.।

तथा हि—

"प्रजापतिरकामयत—प्रजायेयेति । स एतं दशहोतारमपश्यत् । तेन दशधात्मानं विधाय दशहोत्रातप्यत । तस्य चित्ति. स्रुगासीत्, चित्तमाज्यम् । तस्यैतावत्येव वागासीत् । एतावान् यज्ञक्रतु । स चतुर्होतारमसृजत सोऽनन्दत्—असृक्षि वा इममिति.। तस्य सोमो हविरासीत्। स चतुर्होत्रातप्यत। सोऽताम्यत्। स भूरिति व्याहरत् स भूमिमसृजत—अग्निहोत्रं दर्शपूर्णमासौ यजूंषि ॥ १ ॥

स द्वितीयमतप्यत । सोऽताम्यत् । स भुवरिति व्याहरत् । सोऽन्तरिक्षमसृजत । चातुर्मास्यानि सामानि । (२) स तृतीयमतप्यत। सोऽताम्यत् । स सुवरिति व्याहरत्। स दिवमसृजत । अग्निष्टोममुक्थमतिरात्रमृच । (३) एता वै व्याहतय इमे लोका । इमान् खलु वै लोकाननु प्रजा पशवश्छन्दासि प्राजायन्त ॥"

इति तैत्तिरीयारण्यकश्रवणात् प्रथमे तपसि भूलोकमनु छन्दस प्रथमस्य मानात्मन, द्वितीये तपसि भुवर्लोकमनु छन्दसो द्वितीयस्य प्रमाणात्मन, तृतीये तपसि स्वर्लोकमनु छन्दसस्तृतीयस्य प्रतिमानात्मन प्रतिपत्तिरित्यनुप्रजननसवन्ध । अतश्च यथा लोकेष्वयं प्रथमोऽन्तरिक्षं मध्यमोसावुत्तमस्तथावच्छेदेषु मानं प्रथम, प्रमाणं मध्यम, प्रतिमानमुत्तम', इति प्रक्रमसामान्यम् । अथ दिग्देशकालसंख्यावच्छेदाना पृथिव्यायत्ततया प्रथमोपस्थिततया च तत्र माशब्दे प्रवृत्ते—'अयं वै लोको रथन्तरमसौ लोको बृहत् । अस्य वै लोकस्यासौ लोकोऽनुरूपोऽमुष्य लोकोऽनुरूप ।' इत्यैतरेयोक्तन्यायेनैतल्लोकानुरूपेऽमुष्मिन् लोके प्रतिमाशब्दो लब्धावसर इति तत्पारिशेष्यादन्तरिक्षे प्रमाशब्दोऽवतिष्ठते । उभयोरेवानयोर्द्यावापृथिव्योरन्तरिक्षे प्रतिष्ठितत्वात्तत्र प्रमाशब्दसाद्गुण्याच्च । तदित्थं गौण्या वृत्त्या लोकपराणामप्येषा मा–प्रमा–प्रतिमाशब्दानामवच्छेदविशेषार्थत्वं न विहन्यत इति सिद्धम् ॥

तदित्थं मा–प्रमा–प्रतिमात्मकभेदत्रयभिन्न प्राणावच्छेदोऽवच्छिन्नप्राण एव वा छन्द इति लभ्यते । तत्रास्य प्राणस्यायमवच्छेदो यैरवयवभूतैरन्यान्यै प्राणै प्रसा-

ध्यते ते प्राणाश्छन्द परिमापायामक्षरशब्देनाम्यायन्ते, तेषां चाक्षरप्राणानां प्रतिसिद्धोऽवच्छेदो मात्राशब्देन । कयाचिन्मात्रया नियतैरनियतैर्वा तैस्तैरक्षरैरय च्छन्दसिर्दा तदवच्छेदकाक्षरसंख्याभेदाच्छन्दांसि मिद्यन्ते । यथाष्टाक्षरा गायत्री एकादशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगती चेत्यादीनि । तत्रतान्यक्षराणि याज्ञिक च्छन्दसि याज्ञिका एव प्राणा भवन्ति । आर्षिके तु छन्दस्यार्षिका प्राणा । प्रसिद्धानि खलु याज्ञिकान्यक्षराणि, आर्षिकान्युदाहराम —तथा हि शतपथयुतायमि रयिरूपाया अस्याः पृथिव्या पृथिवीप्राणरूपस्याग्नय पृथग् पृथग् गायत्रीत्वमुपपा दयितुमिदमाम्नायते—(६ प्र १।२।१६)

प्रजापतिर्वा इदमग्र आसीदेक एव । सोऽकामयत—बहु स्यां प्रजाययेति । सोऽश्राम्यत् । स तपोऽतप्यत । तस्माच्छ्रान्तात् तेपानादापोऽस्रुस्यन्त ॥ १ ॥ तस्मात्पुरुषात् सादापो जायन्ते । आपोऽब्रुवन्—क यर्य भगामेति । तप्यध्वमित्यब्रवीत् । ता अतप्यन्त । ताः फेनमसृजन्त ॥ २ ॥ तस्मादपां तप्तानां फेनो जायते फेनोऽब्रवीत्—हाहं भगानीति । तप्यस्वेत्यब्रवीत् । सोऽतप्यत । स मृदमसृजत ॥३॥ एतद्वै फेनस्तप्यते—यदप्स्वायेष्टमान श्लवते । स यदोपहन्यते मृदेव भवति । मृदमवीत् हाहं भगा नीति । तप्यस्वेत्यब्रवीत् । सातप्यत । सा सिकता असृजत ॥ ४ ॥ एतद्वै मृत्तप्यते—यदेनां विकृपन्ति तस्मायपापि मुमार्ष्म पिष्टपन्ति शकृतमिवैव भवति (एतायमु तद् यत्त् वाहं भवानि हाह भगानीति ।) सिकताभ्य शकरामसृजत ॥ ५ ॥ तस्मात् सिकता शकरैवान्ततो भवति । शकराया अश्मानम् ॥ ६ ॥ तस्माच्छर्कराश्मैवान्ततो भवति । अश्मनोऽय ॥ ७ ॥ तस्मादश्मनोऽद्यो घमन्ति । अयसो हिरण्यम् ॥ ८ ॥ तस्मादद्यो यद्वै घ्मात हिरण्यसंकाशमिवैव भवति ॥ ९ ॥ तद् यदसृज्यत । अक्षरत् तत् । यदक्षरत् तस्मादक्षरम् । यदष्टौ कृत्वोऽक्षरत् । तेनाष्टाक्षरा गायत्र्यभवत् । अभूद्वा इय प्रतिष्ठेति । तद्भूमिरभवत् । तामग्रयमत् । सा पृथिव्यभवत् । तस्यामस्यां प्रतिष्ठायां भूतानि च भूतानां च पति संवत्सरायादीक्षन्त । भूतानां पतिगृहप तिरासीदुपा पत्नी । तथानि तानि भूतानि भृतवस्ते । अथ य स भूतानां पति संवत्सर स । अथ या सोपा पत्नी औपसी सा । तानीमानि भूतानि च भूतानां च पतिः संवत्सर उपसि रेतोऽसिञ्चन् । स संवत्सरे कुमारोऽजायत ॥११॥ सोऽरोदीत् । तं प्रजापतिरब्रवीत् । कुमार, किं रोदिपि यच्छ्रमात्तपसोऽभिजातोऽसीति ॥ १२ ॥ सोऽब्रवीत्—अनपहतपाप्मा वा अस्मि—अविहितनामा, नाम मे धेहीति । तस्मात् पुत्रस्य जातस्य नाम कुर्यात् । पाप्मानमेवास्य तदपहन्ति । अपि द्वितीयम् अपि तृतीयम् । अभिपूयमेवास्य तद् पाप्मानमपहन्ति ॥ १३ ॥ तमब्रवीत्—रुद्रोऽसीति । तद्यदस्य तन्नामाकरोत्—अग्निस्तद्रूपमभवत् । अग्निर्वै रुद्र । यदरोदीत्—तस्माद्रुद्र ॥ १४ ॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—सर्वोऽसीति । तद्यदस्य तन्नामाकरोत् । आपस्तद्रूपमभवन् । आपो वै

सर्वं । अभ्यो हीदं सर्वं जायते ॥ १५ ॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—पशुपतिरसीति । तद्यदस्य तन्नामाकरोत् । ओषधय-स्तद्रूपमभवन् । ओषधयो वै पशुपति. । तस्माद्यदा पशव ओपधीर्लभन्तेऽथ पती-यन्ति ॥ १६ ॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—उग्रोऽसीति । तद्यदस्य तन्नामाकरोत् वायुस्तद्रूपमभवत् । वायुर्वा उग्र· । तस्मा-द्यदा वलवद्वात्युग्रो वातीत्याहु ॥ १७ ॥ सोऽब्रवीत्—ज्यायान् वा अतोस्मि धेह्येव मे नामेति ॥ तमब्रवीत्—अशनिरसीति । तद्यदस्य तन्नामाकरोत्—विद्युत्तद्रूपम-भवत् । विद्युद्वा अशनिस्तस्माद्यं विद्युद्धन्ति, अशनिरवधीदित्याहु ॥१८॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—भवोऽसीति । तद्यदस्य तन्ना-माकरोत् पर्जन्यस्तद्रूपमभवत् । पर्जन्यो वैभव. । पर्जन्याद्धीदं सर्वं भवति ॥ १९ ॥ सोऽब्रवीत्—ज्यायान्वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—महान् देवोऽ-सीति । तद्यदस्य तन्नामाकरोत् चन्द्रमास्तद्रूपमभवत् । प्रजापतिर्वै चन्द्रमा , प्रजा-पतिर्वै महान्देव ॥ २० ॥ सोऽब्रवीत्—ज्यायान् वा अतोस्मि धेह्येव मे नामेति । तमब्रवीत्—ईशानोऽसीति । तद्यदस्य तन्नामाकरोत् आदित्यस्तद्रूपमभवत् । आदित्यो वा ईशान । आदित्यो ह्यस्य सर्वस्येष्टे ॥ २१ ॥ सोऽब्रवीत्—एतावान् वा अस्मि मामेत परो नाम धा इति । तान्येतान्यष्टावग्निरूपाणि । कुमारो नवम । सैवाग्नेस्त्रि-वृत्ता । यद्वेवाष्टावग्निरूपाणि । अष्टाक्षरा गायत्री तस्मादाहुर्गायत्रोऽग्निरिति । सोऽयं कुमारो रूपाण्यनुप्राविशन्नवा अग्निं कुमारमिव पश्यन्त्येतान्येवास्य रूपाणि पश्यन्त्येतानि हि रूपाण्यनुप्राविशत् ॥ २२ ॥"

इत्येतावता महता प्रबन्धेनाग्नीभिरपूफेनमृत्सिकताशर्कराश्मायोहिरण्यरूपैरष्टभिर-क्षरै. परिच्छेदादमुष्या पृथिव्या भूतगायत्रीत्वमञ्जसोपपादितम् । एवं पृथ्वीजलतेजो-वाय्वाकाशसूर्यचन्द्रयजमानरूपैरष्टाभिरक्षरै परिच्छेदादमुष्याग्ने रुद्रकुमारस्य भूतगायत्री-त्वमञ्जसैवोपपादितम् । एवमेवैतच्छ्रुतितात्पर्यानुसारिभिरन्यत्राप्यार्थिकप्राणानामक्षरत्व-मभ्युपगम्य तत परिच्छेदादन्यान्या गायत्र्य प्रतिपाद्यन्ते । यथा हि महाभारते भीष्मपर्वणि—

'सिंहा व्याघ्रा वराहाश्च महिषा वारणास्तथा ।
ऋक्षाश्च वानराश्चैव सप्तारण्या. स्मृता नृप ॥
गौरजाविमनुष्याश्च अश्वाश्वतरगर्दभा ।
एते ग्राम्या समाख्याता पशव सप्त साधुभि ॥
एते वै पशवो राजन् ग्राम्यारण्याश्चतुर्दश ।
वेदोक्ता. पृथिवीपाल येषु यज्ञा प्रतिष्ठिता ॥
उद्भिज्जा स्थावरा प्रोक्तास्तेषां पञ्चैव जातयः
वृक्षगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातय ॥

षेषां विंशतिरेकोना महाभूतेषु पञ्चसु ।
चतुर्विंशतिरित्येषा गायत्री लोकसंमता ॥
य एतां वेद गायत्रीं पुण्यां सर्वगुणान्विताम् ।
तत्त्वेन भरतश्रेष्ठ स लोके न प्रणश्यति ॥'

इत्यादिना प्रपञ्चेन पञ्चभिरक्षरैतनजातीय पञ्चभिश्चान्यैतत्सजातीय व्यापरं संधे, तथा चतुर्दशभिर्यैतनजातीयैः प्राणिभिरक्षरैश्चतुर्विंशत्यक्षरा लोकगायत्री समाख्याता ॥

एवमेवान्यत्रान्यत्र सर्वत्रापि छन्दोव्यवहार र्भात स्मार्तो या सर्वोऽपि याज्ञिका क्षरानुरूप्येणार्थिकाक्षराक्षरच्छेदान्मा-प्रमा-प्रतिमात्मकभेदत्रयमिम समर्पनीय । तत्र च याज्ञिकाक्षरसंख्यानानां लक्षणत्वम्, आर्थिकाक्षरसंख्यानानां च लक्ष्यत्व मत्रत्र समुमेयम् । एतेन सर्वं एषाम्नत्यप्रभृम्नन्योक्ता यैदिकनिदर्शनास्थानादछन्दोव्यवहारा व्याख्याता । त्रिपुराहोरात्रवृत्तस्य बृहतीछन्दस्त्वम्, ततो दक्षिणतः क्रमेण एसितानां त्रयाणामहोरात्रवृत्तानामनुष्टुप्पुष्णिग्गायत्रीत्वम्, त्रिपुराउत्तरतश्च क्रमेण दीयाणां त्रयाणामहोरात्रवृत्तानां पङ्क्तित्रिष्टुब्जगतीत्वं च पूर्वोक्तप्रकारेणैवाभिप्रेत्य सप्तानामेषां छन्द सेप्तानां सूयाश्वत्वमाम्नायते । 'प्रजापतेरक्ष्यभयन् । तदभोऽभवत्' इति श्रुत्या सूर्यरथसमारूढानां चक्रम्यानां तेषामहोरात्रवृत्तानामेव सूयाश्वत्वात्। तदेतत्सर्वं वेदसमीक्षायां विस्तरत समाख्याय स्पष्टीकृतमिति ततोऽवधेयम् ॥ इह तु मा-प्रमा-प्रतिमात्मकभेदत्रयमिम प्राणावच्छेदोऽवच्छिन्नप्राणोऽपि या छन्द इत्येतत् तावत् सर्वच्छन्दोरहस्यं सिद्धान्ततो व्याख्यातमिति दिक् ॥

नन्वेवमप्येतदपर्याप्तं छन्दोलक्षणमाम्नायते—

'वासो अग्ने विश्वरूपं संव्ययस्व विभावसो ॥' इति
'छन्दांसि वा अग्नेर्वास । छन्दांस्येवैनं तत्पर्यदधाति' ।
इति मैत्रायणीयश्रुतावाम्नाच्छादनत्वेनाभिप्रेतस्यार्थस्य (१)
छन्दांसि वै सर्वेषा उपयेषा
इति तैत्तिरीयश्रुतौ सर्वाप्यायस्थानस्य, तत्रैवासनस्य चार्थस्य (२)

शिल्पानि शंसन्ति देवशिल्पानि । एतेषां वै शिल्पानामनुकृतीह शिल्पमधिगम्यते । हस्ती कंसो वासो हिरण्यमश्वतरी रथः शिल्पम् । यदेव शिल्पानीं ३ आत्मसंस्कृतिर्वाव शिल्पानि—छन्दोमयं वा । एतैर्यजमान आत्मान संस्कुरुते ॥' इत्यैतरेयश्रुतौ शिल्प भूतस्यार्थस्य च (३) मानावच्छेदविलक्षणस्यापि छन्दस्त्वेन प्रतिज्ञानात् । इति चेत् । अत्रोच्यते—दैवतकाण्डे निरुक्ते भगवता यास्केन भक्तिसाहचर्यनिर्वचनावसरे—'यत्र किंचिद्दार्ष्टिविषयिकं तदमेः कर्म' इत्येवं प्रतिजानानेन दार्ष्टिविषयिकाणां स्थानावरोधकानां सर्वेषामेवार्थानामग्निप्रधानत्वप्रतिबोधनात् तत्स्वरूपावच्छेदकानां विग्देशकालसंख्यानानामेवानात्मधर्माणां छन्दस्त्वेनाभिप्रेतानामाच्छादकत्वसाधनेनैवाम्नायश्रुतेस्ता

वत्तात्पर्यमुपलभ्यते ॥ १ ॥ सवेशोपवेशयोरप्यवयवसंनिवेशरूपतया तैत्तिरीयश्रुतेरपि परिमाणावच्छेदतात्पर्यकत्वमेवावसीयते ॥ २ ॥

अथ शिल्पं द्वेधा—अपूर्वकौशलकरणम्, प्रतिरूपकरणं च । यत्र प्रकृतिदृष्टस्यार्थस्य भूयसा वैरूप्यमेव संसाधयितुमिष्यते तदाद्यम् । यत्र तु प्रकृतिदृष्टस्यार्थस्य भूयसानुरूप्यमेव ससाधयितुमिष्यते तद्द्वितीयम् ॥ तत्र—

'येभि शिल्पै पप्रयानामदंहद् येभिर्द्यामभ्यपिगत् प्रजापति ।
येभिर्वाचं विश्वरूपा समव्यगत् तेनेममग्न इह वर्चसा समङ्धि ॥
येभिरादित्यस्तपति प्रकेतुभि सूर्यो ददृशे चित्रभानु ।
येभिर्वाचं पुष्कलेभिरव्ययत् तेनेममग्न इह वर्चसा समङ्धि ॥
यत्ते शिल्पं कश्यपं रोचनावद् इन्द्रियावत् पुष्कलं चित्रभानु' ।
यस्मिन् सूर्या अर्पिता सप्त साकं तस्मिन् राजानमधिविश्रयेमम् ॥'

इति मन्त्रवर्णकसिद्धमाद्यप्रकार शिल्पं दैशिकावच्छेदरूपं वा स्यात्परिमाणावच्छेदरूपं वेति माप्रमयोरेवान्तर्भाव । यत्तु 'यद्वै प्रतिरूपं तच्छिल्पम्' (३।२।१।५) इति शतपथश्रुतिवोधितमनुकरणलक्षणं द्वितीयं शिल्पं तत्पुन प्रतिमानावच्छेदान्नातिरिच्यत इति सिद्धं माप्रमाप्रतिमातिरिक्तस्यार्थस्य छन्दस्त्व नास्तीति ॥

नन्वेवमपि परिच्छेदप्रतिष्ठातुलितकातिरिक्तस्यार्थस्य सर्वथा छन्दस्त्वं नास्तीत्यनवक्लृप्तम् ॥—छन्दोविशेषाणा गायत्र्यादीनामेवमर्थव्यतिरेकेणैवाद्यापि भूयसोपचारदर्शनात्

(१) तथा हि—

"स वा एति च प्रेति चान्वाह । गायत्रीमेवैतदर्वाचीं च पराचीं च युनक्ति । पराच्येह देवेभ्यो येज्ञं वहति अर्वाची मनुष्यानवति । तस्माद्वा एति च प्रेति चान्वाह ॥ १ ॥ यद्वेवेति च प्रेति चान्वाह । प्रेति वै प्राण, एत्युदान' । प्राणोदानावेवैतद्धाति । तस्माद्वा एति च प्रेति चान्वाह ॥ २ ॥ यद्वेवेति च प्रेति चान्वाह । प्रेति वै रेत' सिच्यते, एति प्रजायते । प्रेति पशवो वितिष्ठन्ते, एति समावर्तन्ते । सर्वं वा इदमेति च प्रेति च । तस्माद्वा एति च प्रेति चान्वाह ॥ सोऽन्वाह—'प्रवो वाजा अभिद्यव इति' तन्नु प्रेति भवति । 'अन्न आयाहि वीतये' इति, तद्वेति भवति ॥"

इति शतपथश्रुत्या एतिप्रेतिक्रियोपलक्षितस्यार्थस्य गायत्रीत्वमाख्यायते ॥ १ ॥

(२) एवमेव—

'गायत्र्या ब्राह्मणं निरवर्तयत्, त्रिष्टुभा राजन्यम्, जगत्या वैश्यम्, न केनचिच्छन्दसा शूद्रं निरवर्तयत्' इति,

'गायत्रो वै ब्राह्मण । त्रैष्टुभो वै राजन्य । जागतो वै वैश्य ॥' इति,

'इन्द्रो वै देवतया क्षत्रियो भवति, त्रैष्टुभश्छन्दसा, पञ्चदश. स्तोमेन, सोमो राज्येन, राजन्यो वन्धुना' इति च ।

एवमादिभिरितरेयादिश्रुतिभिश्च संस्कारस्य छन्दस्त्व मुपपद्यते ।

प्रकृतिविशिष्टं चातुर्वर्ण्यं संस्कारविशेषाश्च ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्य: कृत: । ऊरू तदस्य यद्वैश्य: पद्भ्यां शूद्रो अजायत ॥ इति निगमो भवति । गायत्र्या छन्दसा ब्राह्मणमसृजत्, त्रिष्टुभा राजन्यम् जगत्या वैश्यम्, न केनचिच्छन्दसा शूद्रम् ॥' इत्यसंस्कार्यो भवति । त्रिष्वेव निवास: स्यात्सर्वेषाम्'

इति वसिष्ठस्मरणे वाक्यशेषाद् ब्राह्मणादिविषयाणां संस्कारविशेषाणामेव गायत्र्यादि रूपेणाधिकारित्वात् ॥

'न शूद्रे पातकं किंचिन्न च संस्कारमर्हति' इति मनुस्मरणे छन्द प्रातिनिध्येन संस्कारशब्दप्रयोगाच्च ॥ न च

शूद्रोऽप्येवंविध: कार्यो विना मन्त्रेण संस्कृत: ।
न केनचित्समुच्चन्दसा स प्रजापति: ॥'

इति मनुवचनादिस्मरणे छन्द:शब्दस्य मन्त्रपरतया व्याख्यानात्—

'अयमेव विधि: प्रोक्त: शूद्राणां मन्त्रवर्जित: ।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण कारयेत् ॥'

इति मरीचिवचन छन्द प्रातिनिध्येन मन्त्रशब्दप्रयोगाच्च संस्कारपरत्वं दुर्वचमिति चेन्न तस्य संस्कारगुणभूतस्य मन्त्रस्य ब्राह्मणत्वादिप्रयोजकत्वप्रतिपत्त्यपेक्षया तत्तन्मन्त्रोपलक्षितसंस्कारस्यैव तदौचित्यात् ॥ मनुवचन हि पूर्वार्धे शूद्रत्वस्योद्देश्यतावच्छेदकतयोत्तरार्धे पुनर्विधेयतावच्छेदकतया समानप्रतिपत्त्यभावेन तत्र छन्द:शब्दस्य मन्त्रपरत्वे मानाभावाच्च । मरीचिवचनेऽप्यमन्त्रस्य तस्य मन्त्रोपलक्षितसंस्कारायोग्यस्येत्येवार्थो युक्तियुक्त: शक्यते प्रतिपत्तुम् । अत एव

'चित्रकर्म यथानेक रागैरुन्मील्यते शनै: ।
ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकै: ॥

इत्येवमादिरसौ तत्तन्मन्त्रोपलक्षितसंस्कारस्यैव ब्राह्मण्यप्रयोजकत्वं स्मरति ।

तस्मात्सिद्धं छन्द शब्दस्य संस्कारपरत्वम् ॥ २ ॥

(३) एवमेव—

'तेजो वै ब्रह्मवर्चसं गायत्री । ब्रह्म गायत्री । ओजो वा इन्द्रियं वीर्यं त्रिष्टुप् । क्षत्रं त्रिष्टुप् । जागता: पशव: । इषमूर्जं रयिं पुष्टिम् ॥" इति भूयसा तेज प्रभृतिषु तत्तदर्थविशेषेषु गायत्र्याद्युपचारेण प्रयिर्ण छन्द इष्यते ॥ ३ ॥

तदिदमागत्यप्रतिगच्छदर्थानां संस्काराणां प्रविणानां चानन्तभावादपयास्यमेतच्छन्दोलक्षण मन्यामहे । इति चेत् ।

उच्यते—आगत्यप्रतिगच्छदर्थानां गायत्रीत्वं सादृश्येन प्रतिपद्यते—देवतासादृश्य मन्त्रत्वेन च देवताहर्मत्वेन च । तदेतद्विज्ञानसौकर्याय यास्कनिरुक्तं देवतानां भक्तिसाहर्म्ये दर्शयास्याम:—

तिस्र एवैता देवता भवन्ति पृथिवीस्थानोऽयमग्नि , अन्तरिक्षस्थानोऽयमिन्द्र , द्युस्थानोऽयमादित्यश्च । अग्नीन्द्रादित्या अग्निवायुसूर्या इत्यनर्थान्तरम् ।

नव नव चैतासा प्रत्येकं विभक्तय —लोक , सवनम्, ऋतु , छन्द , स्तोम , साम, समनुगता देवा , संस्तविका देवा , कर्म चेति भेदात् ।

तत्र तावदग्निभक्तीनि—

१ अयं लोक , २ प्रात.सवनम्, ३ वसन्तऋतु , ४ गायत्री छन्द , ५ त्रिवृत् स्तोम , ६ रथन्तर साम, ७ प्रथमे स्थाने समाम्नाता देवगणा प्रथमस्थानीया स्त्रियश्च, ८ इन्द्र , सोम , वरुण , पर्जन्य , ऋतव इत्येते संस्तविका देवा , हविरप्यान्नावैष्णवमाग्नापौष्णं च ॥ ९ अथ यच्च किंचिद्दार्ष्टिविषयिकं तत्सर्वमग्ने कर्म हविषां वहनं च देवतानामावाहनं च ॥

अथेन्द्रभक्तीनि—

१ अन्तरिक्षलोक., २ माध्यंदिनसवनम्, ३ ग्रीष्मऋतु., ४ त्रिष्टुप् छन्द , ५ पञ्चदश स्तोम ६ बृहत् साम, ७ मध्यमे स्थाने समाम्नाता देवगणा., मध्यमस्थानीया स्त्रियश्च, ८ अग्नि , सोम , वरुण , पूषा, वृहस्पति , ब्रह्मणस्पति , पर्वत , कुत्स , विष्णु , वायु इत्येते संस्तविका देवा । मित्रो वरुणेन सस्तूयते, पूष्णा रुद्रेण च सोम , अग्निना च पूषा, वातेन च पर्जन्य संस्तूयते ॥ ९ अथ या च का च वलकृति सर्व तदिन्द्रस्य कर्म, रसानुप्रदानं च वृत्रवधश्च ॥

अथादित्यभक्तीनि—

१ असौ लोक , २ तृतीयसवनम्, ३ वर्षाऋतु , ४ जगती च्छन्द , ५ सप्तदश स्तोम , ६ वैरूपं साम, ७ उत्तमे स्थाने समाम्नाता देवगणा , उत्तमस्थानीया. स्त्रियश्च, ८ चन्द्रमसा वायुना संवत्सरेणेति संस्तव ॥ ९ अथ यच्च किंचित् प्रवद्धितं तत्सर्वमादित्यस्य कर्म, रसादानं रश्मिभिश्च रसाधारणम् ॥

भक्तिशेष —

एतेष्वेव स्थानव्यूहेषु ऋतुच्छन्द स्तोमपृष्टस्य भक्तिशेषमनुकल्पयीत । शरदृऋतु , अनुष्टुप्छन्द , एकविंश स्तोम , वैराजं साम इति पृथिव्यायतनानि । हेमन्तऋतु , पङ्क्तिछन्द , त्रिणव स्तोम., शाक्वर साम इत्यन्तरिक्षायतनानि । शिशिरऋतु , अतिच्छन्दाश्छन्द , त्रयस्त्रिंश स्तोम , रैवतं साम इति द्युभक्तीनि ॥

इतीत्थंभूतया देवतासाहचर्यभक्त्या यावतामेव दार्ष्टिविषयिकाणामर्थानां देवागमनप्रतिगमनादीना च कर्मणां गायत्रीच्छन्दोवदग्निभक्तित्वेनाभ्युपपत्तौ सिद्धमेवागत्यप्रतिगच्छदर्थाना गायत्रीत्वेन गायत्रीत्वम्, ब्रह्मणो वाचो गायत्रत्वेन गायत्रीत्ववत् । अथैवं देवताना भक्त्या दशाहप्रतिपत्तिमैतरेयसमाम्नाता व्याख्यास्याम —

अग्नि १

प्रथममहर्वहति । त्रिवृत्स्तोम , रथन्तर साम, गायत्रीच्छन्द । एति च प्रेति च ।

युक्तवत् रथवत्, आशुमत्, पिववत्, प्रथमपदनिरुक्ता देवता, अयं लोकोऽभ्युदित, राथन्तरम् गायत्रम् करिष्यत्। एतानि प्रथमस्याहो रूपाणि ॥

इन्द्र २

द्वितीयमहर्वहति। पञ्चदश स्तोम बृहत्साम, त्रिष्टुप्छन्द। नेति न प्रेति। यत् स्मितम् ऊर्ध्ववत् प्रतिवत्, अन्तर्वत्, शुपण्यवत्, शुघन्यवत् मध्यमपदनिरुक्ता देवता अन्तरिक्षमभ्युदितम् वाहतम् त्रैष्टुभम्, कुर्ववत्। एतानि द्वितीयस्याहो रूपाणि ॥

विश्वेदेवा ३

तृतीयमहर्वहन्ति। सप्तदश स्तोम वैरूप साम, जगतीच्छन्द। समानोदर्कम्, अश्ववत् अन्तर्वत् पुनराधृतम्, पुनर्निधृतम्, रथवत् पर्यस्तवत्, त्रिवृत्, अन्त रूपम् उत्तमपदनिरुक्ता देवता असौ लोकोऽभ्युदित, वैरूपम् जागतम् कृषम्। एतानि तृतीयस्याहो रूपाणि ॥

मारुत ४

चतुर्थमहर्वहति। एकविंश स्तोम, वैराज साम, अनुष्टुप्छन्द। एति च प्रेति च। युक्तवत्, रथवत् आशुमत् पिववत् प्रथमपदनिरुक्ता देवता अयं लोकोऽभ्युदित जातवत्, घनवत् शुक्रवत् वाचोरूपम् वैमदम् विरिफितम्, विच्छन्दा, ऊनातिरिक्तम्, वैराजम् आनुष्टुभम्, करिष्यत्। एतानि चतुर्थस्याहो रूपाणि ॥

गौ ५

पञ्चममहर्वहति। त्रिणव स्तोम शाक्वरं साम पङ्क्तिश्छन्द। नेति न प्रेति, यत् स्मितम् ऊर्ध्ववत् प्रतिवत् अन्तर्वत् शुपण्यवत् शुघन्यवत्, मध्यमपदनिरुक्ता देवता अन्तरिक्षमभ्युदितम्, दुग्धवत् ऊधवत्, धेनुमत्, पृश्निमत् मद्वत्, पशुरूपम् ॥

अभ्यासवत्	(विक्षुप्रा इव हि पशव)
जागतम्	(जागता हि पशव)
वाहतम्	(वाहता हि पशव)
पाङ्क्तम्	(पाङ्क्ता हि पशव)
वामम्	(वामं हि पशव)
हविष्मत्	(हविर्हि पशव)
वपुष्मत्	(वपुर्हि पशव)

शाक्वरम् पाङ्क्तम्, कुर्वत् एतानि पञ्चमस्याहो रूपाणि ॥

धौ ६

षष्ठमहर्वहति। त्रयस्त्रिंश स्तोम, रैवतं साम अतिच्छन्दाश्छन्द। समानोदर्कम्, अश्ववत्, अन्तर्वत् पुनराधृतम्, पुनर्निधृतम्, रथवत् पर्यस्तवत्,

त्रिवृत्, अन्तरूपम्, उत्तमपदनिरुक्ता देवता, असौ लोकोऽभ्युदित', पारुच्छेपम्, सप्तपदम्, नाराशंस , नाभानेदिष्ठम्, रैवतम्, अतिच्छन्दा , कृतम् । एतानि षष्ठस्याह्नो रूपाणि ॥

७ एति च प्रेति च । युक्तवत्, रथवत्, आशुमत्, पिवत्वत् प्रथमपदनिरुक्ता देवता, अयं लोकोऽभ्युदित , जातवत्, अनिरुक्तं करिष्यत् । एतानि सप्तमस्याह्नो रूपाणि ॥

८ नेति न प्रेति । यत् स्थितम्, ऊर्ध्ववत्, प्रतिवत्, अन्तर्वत्, वृपण्वत्, वृधन्वत्, मध्यमपदनिरुक्ता देवता, अन्तरिक्षमभ्युदितम्, ह्यग्नि, महद्वत्, द्विहूतवत्, पुनर्वत् । एतान्यष्टमस्याह्नो रूपाणि ॥

९ समानोदर्कम्, अश्ववत्, अन्तर्वत्, पुनरावृत्तम्, पुनर्निवृत्तम्, रथवत्, पर्यस्तवत्, त्रिवृत्, अन्तरूपम्, उत्तमपदनिरुक्ता देवता, असौ लोकोऽभ्युदित , शुचिवत्, सत्यवत्, क्षेतिवत्, गतवत्, ओकवत्, कृतम् । एतानि नवमस्याह्नो रूपाणि ॥

इद नवरात्रम् ।

१० पृष्ठ्यं षडहमुपयन्ति । मुखमिव पृष्ठ्य षडह । यथान्तर मुखस्य जिह्वा, तालु, दन्ता , एवं छन्दोमा । अथ येनैव वाचं व्याकरोति येन स्वादु चास्वादु च विजानाति तद्दशममह । नासिके इव पृष्ठ्य षडह —यथान्तरं नासिकयोरेवं छन्दोमा । अथ येनैव गन्धान् विजानाति तद्दशममह ।अक्षीव पृष्ठ्य षडह ।यथान्तरमक्ष्ण कृष्णमेवं छन्दोमा । अथ यैव कनीनिका येन पश्यति तद्दशममह । कर्ण इव स । यथान्तर कर्णस्य एवं छन्दोमा । अथ येनैव शृणोति तद्दशममह । श्रीर्दशममह ॥

इतीत्थ दशाहप्रतिपत्ति श्रूयते । एतत्पदार्थनिरूपणं च वेदसमीक्षाया साधु कृतमिति तत स्पष्टमवगंस्यते । इह तु सर्वेषामेवार्थाना त्रैविध्येनाभ्युपगमादह्न्यहोरूपतया सिद्धमेवागत्यप्रतिगच्छदर्थाना समानभक्त्या गायत्रीत्वमित्यवगम्यते ॥

अथ सस्कारो द्रष्टव्य । कस्यचित् कस्मिंश्चित् कर्मणि योग्यतासंपादनं हि सस्कार । तत्त्रैधा—दोषापनोदनेन, अतिशयाधानेन, हीनाङ्गपूरणेन च । एभि सस्कारैस्तत्तदर्थस्यादुष्टत्व विशिष्टत्वं स्वरूपसत्त्वं च ससिद्धं भवति । अस्ति स सस्कारो यदभावे स्वरूपसन्नप्यसौ ब्राह्मणोऽधमतामेति न तु ब्राह्मण्यादपैति । तस्याप्ययोग्यत्वं कर्मविशेषे । प्रतिबन्धकसन्निधानेन कारणतानिरासादिति तदर्थ स सस्कार शोधक ॥ १ ॥ अस्ति च स सस्कारो यदभावे स्वरूपसन्नप्यसौ ब्राह्मणो नोत्तमतामेति । न तु ब्राह्मण्यादपैति । तस्याप्ययोग्यत्वं कर्मविशेषे । सहकारिसंनिधानाभावेन कारणतानिरासादिति तदर्थ स संस्कारो विशेषक ॥ २ ॥ एवमस्ति स संस्कारो यदभावे ब्राह्मण्यं नोपतिष्ठते ब्राह्मण्यादपेतश्च कर्मविशेषायोग्यो भवति । कारणासंनिधानादिति तदर्थ स संस्कारो भावक ॥ ३ ॥ एषु च संस्कारशब्दस्य करणव्युत्पत्त्या संस्कारजनकक्रियापरत्वं द्रष्टव्यम् ॥

तत्र गर्भाधानं तावत्स्वरूपसंपादनोद्देशेन सहधर्मचारिणीक्षेत्रे गर्भाशयरूपे धारी रग्निसमीपे वा संस्कार्यस्य संस्थापनं सोऽयं गर्भमात्रक संस्कारो द्रष्टव्य । तथा च गर्भाधान पुंसवनसीमन्तोन्नयनजातकर्माण्यपि तत्र गर्भे ब्रह्मवर्चसयोग्यतारूपातिशयाधायकत्वाद् विशेषकसंस्कारा भवन्ति । गर्भाधानवदुपेतो ब्रह्मगर्भं संदधाति । पुंसवनात् पुंसीकरोति, फलरूपनान्मासापितृज पाप्मानमपोहति । इति हारीतस्मरणात् । त एतेऽन्तर्गर्भसंस्कारा उच्यन्ते । ततो बहिःशालायामिव गृहोदरबहिर्भूते गर्भे शुक्रशोणितोपगतदोषमार्जकत्वादुत्तरे जातकर्म—नामकर्म—निष्क्रमण—अन्नप्राशन—कर्णवेध—मुण्डन—व्रतादीनि कतिपयकर्माणि शोधकसंस्कारा भवन्ति । 'रेतोरक्तगर्भोपघात पञ्चगुण जातकर्मणा प्रथममपोहति, नामकरणेन द्वितीयम् प्राशनेन तृतीयम्, चूडाकरणेन चतुर्थम् व्रतेन पञ्चमम्, एतैरष्टभि संस्कारैर्गर्भोपघातात् पूतो भवति । इति हारीतस्मरणात् ।, 'एवमेनः शमं याति बीजगर्भसमुद्भवम्' इत्यादि स्मृत्यन्तरेभ्यश्च त एते गर्भशुद्धिसंस्कारा उच्यन्ते । सोऽयमेतावान् गर्भसंस्कारो ऽनुमतावुत्तरसंस्कारयोग्यतासम्पत्त्यर्थ । पितृकर्तृकश्च तत्र संस्कर्तृनिष्ठमधिकारितावच्छेदक ब्राह्मणत्वादिघटितवर्णत्वघटितम् । संस्कार्यनिष्ठ तु ब्राह्मणादिवर्णजन्यत्वमेव, न तु ब्राह्मणत्वादिकमपि तत्र फलोपधायकतारूपमपेक्ष्यते ।

अत परमुपनयन तावत् स्वरूपसंपादनोद्देशेन साग्निश्रीक्षेत्रे ब्रह्मचर्यव्रतरूपे कर्माग्निसमीपे वा संस्कार्यस्य संस्थापनम् । सोऽयं वर्णमात्रक संस्कारो द्रष्टव्य । तथा चोपनयन-व्रतादेश-वेदारम्भ-वेदाध्ययनानि साग्निश्रीमेयशुक्रियोपनिषदशौल्भगोदानभौतिकमहानाम्नीव्रतोत्सर्गा , केशान्त , समावर्तनस्नानं चेत्येते तत्र ब्राह्मणादिवर्णे ब्रह्मक्रियायोग्यतारूपातिशयाधायकत्वाद् विशेषकसंस्कारा भवन्ति ।

उपनयनाधाग्निरन्ध्राग्निव्रतचर्याग्निरन्तर्मतेर्धाष्टग्नि स्वच्छन्द सम्मितो ब्राह्मण परं पात्रं देवपितृणां भवति छन्दसां पार गच्छति छन्दसामायतनम्' इति हारीतस्मरणात्

'साग्न्यायेन व्रतैर्होमैस्त्रैविद्येनज्यया शुभै ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीय क्रियते तनु ॥'

इत्यादिस्मृत्यन्तरेभ्यश्च । त एते आचार्यकर्तृका अनुमतसंस्कारा उच्यन्ते । यथापि

'गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनै ।
वैजिक गार्भिक चैनो द्विजानामपमृज्यते ॥'

इति मनुस्मरणात् सांवत्सरिकस्य चूडाकरणम्, तृतीये वा प्रविष्टे षोडशवर्षस्य केशान्त । इति पारस्करसूत्रे मुण्डनगोदानयोर्गर्भसंस्कारप्रकरणोपात्तत्वादुपनयनकेशान्तयोरपि गर्भसंस्कारत्वमाक्षिपन्ति । अथापि दधिदर्शनन्यायेन समवेत्यैव कतिपयानामुभयविधसंस्कारत्वमिच्छतां प्रकरणातिरेको न दोषायेत्यनुसंधेयम् ।

ततो बहिः शालायामिव पितृगृहे प्रत्यावृत्ते वर्णे ऋषभकसूनाषभकोपगतदोषमार्जकत्वादुत्तरे नैमित्तिकवार्षिकमासिकादिकात्मकभेदचतुष्टयमिता शोधकसंस्कारा भवन्ति ॥

'अत परं द्विजातीनां संस्कृतिर्निगयतोच्यते ।
संस्काररहिता ये तु तेपा जन्म निरर्थकम् ॥
गर्भाधानं पुंसवनं सीमन्तो वलिकर्म च ।
जातकृत्यं नामकर्म विश्रुतोऽन्नाशनं परम् ॥
चौलकर्मोपनयनं तद्व्रताना चतुष्टयम् ।
स्नानोद्वाहौ चाग्रयणमष्टकासु यथाययम् ॥
श्रावण्यामाश्वयुज्या च मार्गशीर्ष्या च पार्वणम् ।
उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नित्यग ॥
संस्कारा नियता ह्येते ब्राह्मणस्य विशेपत ॥
नैमित्तिका षोडशोक्ता समुद्वाहावसानका ।
सप्तैवाग्रयणाद्याश्च संस्कारा वार्पिका मता ॥
मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्पिकम् ।
महायज्ञास्तु नित्या· स्यु संध्यावद्वाग्निहोत्रवत् ॥' इत्याश्वलायनोक्ते ;

'अशुचि स्त्रीविहीनश्च दैवे पित्र्ये च कर्मणि ।
यदहा कुरुते कर्म न तस्य फलभाग्भवेत् ॥' इति ब्राह्मोक्ते ,

१	नित्याः संस्काराः	पञ्च महायज्ञाः ।	५
२	मासिकाः संस्काराः	पार्वणादयः ।	५
३	वार्षिकाः संस्काराः	आग्रयणादयः ।	७
४	नैमित्तिकाः संस्काराः	उद्वाहान्ताः ।	१६
५	काम्याः संस्काराः	अग्निष्टोमादयः, (गुणाधानाः) प्रायश्चित्तानि (दोपनिरासाः)	

ऋणैश्चतुर्भि संयुक्ता जायन्ते मानवा भुवि ।
पितृदेवर्षिमनुजैर्देयं तेभ्यश्च वर्मत ॥
यज्ञैस्तु देवान् प्रीणाति स्वाध्यायतपसा मुनीन् ।
पुत्रै श्राद्धै पितॄंश्चापि आनृशंस्येन मानवान् ॥
ऋणमुन्मुच्य देवानामृपीणा च तथैव च ।
पितृणामथ विप्राणामतिथीना च पञ्चमम् ॥
देवाना च पितृणा च ऋपीणा च तथा नर ।
ऋणवान् जायते यस्मात्तन्मोक्षे प्रयतेत्सदा ॥
देवानामनृणो जन्तुर्यज्ञैर्भवति मानव ।
अल्पवित्तश्च पूजाभिरुपवासव्रतैस्तथा ॥
श्राद्धेन प्रजया चैव पितृणामनृणो भवेत् ।
ऋषीणा ब्रह्मचर्येण श्रुतेन तपसा तथा ॥

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमान पतत्यध ॥

इत्यादिपुराणस्मृतिवचनेभ्य ,

पञ्चसूना गृहस्थस्य तुल्ली पेषण्युपस्कर ।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन् ॥
तासां क्रमेण सर्वासां निष्कृत्यर्थं महात्मभि ।
पञ्च क्लृप्ता महायज्ञा प्रत्यहं गृहमेधिनाम् ॥
अध्यापन ब्रह्मयज्ञ पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥

इत्येवं मन्वादिस्मृतिवचनेभ्यश्च तथावगमात् । त एते स्वकर्तृका धर्मगुद्धिसंस्कारा उच्यन्ते । सोऽयमेतावान् मतसंस्कारो ब्रह्मादिदेवसंस्कारयोग्यतासंपत्त्यर्थ । यत्र संस्कर्तृनिष्ठमधिकारिविशेषच्छेदकं ब्राह्मणत्वादिघटितवर्णत्वभटितम् संस्कार्यनिष्ठं तु पूर्वसंस्कारसंस्कृतत्व वा—

धृति क्षमा दया शौचमनायासोऽनसूयितम् ।
अस्पृहत्वमकामत्वं ब्राह्मणानामभी गुणा ॥'

इत्युक्तात्मगुणाष्टकमैशिष्ट्यं वा । तेषां पूर्वेषां संस्कारकर्मणामप्यतद्गुणाष्टकरूपावि घायमावकत्वात् । विज्ञायते चैतदेषामष्टानां गुणानामपि संस्कारत्वम् । अष्टचत्वारिंशत्-संस्काराना यज्ञाणेन भगवता गौतमेन चत्वारिंशत्संस्काराना ख्याय परिशेषे

अथवात्मगुणाश्च' इति स्मरणात्

संस्कारै संस्कृत पूर्वैरुत्तरैरपि संस्कृत ।
नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्रह्म लौकिकम् ॥
ब्राह्मं पदमवाप्नोति यस्माच्च्यवते पुन ।'

इति यङ्गादिस्मरणाच्च पूर्वाधात्मगुणानां ब्राह्मणत्वप्रयोजकत्वेनाभिधानात् ।

अर्चं वै प्रजापतेरात्मनो मैत्रमासीदर्चं माल्यम् । यदैर्चं तत् पुरस्तात् कुरुत । यन्माल्यं तत् पश्चात् पर्यौहत । यदैर्चं सोमो वै स । ततो ब्राह्मणमसृज्यत । तस्माद् ब्राह्मण सर्व एव ब्रह्मामिधीर । यन्माल्यं सुरा वै सा । ततो राजन्यमसृज्यत । तस्माद्भ्रात्रव्यश्च कनीयांश्च स्नुषा च श्वशुरस्य सुरां पीत्वा विलाऊपत आसते । माल्यं हि तत् । पाप्मा वै माल्यम् । तस्माद् ब्राह्मण सुरां न पिबेत् । पाप्मनात्मान नेत् संसृजा— इति ।

इत्येवं मैत्रायणीयश्रुत्यादिषु तत्र तत्र ब्राह्मणत्वप्रयोजकानां पूर्वादीनामाम्नानाच्च । तदित्थमेतावानयमुक्तो ब्राह्मसंस्कार स स्मार्तो द्रष्टव्य ।

अथात परम् अग्ने मतपते मत चरिष्यामि वायो मतपते मत चरिष्यामि आदित्य मतपते मतं चरिष्यामि इदमहमनृतात् सत्यमुपैमि । इति वा मतोपायनं तावत्

स्वरूपसंपादनोद्देशेन सत्यक्षेत्रे देवव्रतरूपे गार्हपत्याहवनीयाग्निसमीपे वा संस्कार्यस्य संस्थापनम् । सोऽयं देवभावक संस्कारो द्रष्टव्य· । तथा च व्रतोपायनमग्न्याधेयं च पुरस्कृत्य कृतमग्निहोत्रम्, दर्शपूर्णमासौ, पिण्डपितृयज्ञ , आग्रयणेष्टि , चातुर्मास्यम्, निरूढपशुबन्ध , सौत्रामणी चेत्येते सप्तहविर्यज्ञसंस्था यजमाने देवत्वयोग्यतारूपाति-शयाधायकत्वाद् विशेषकसंस्कारा भवन्ति ।

'आरब्धयज्ञो वा एष आरब्धदेवतो यो दर्शपूर्णमासाभ्यां यजते' इत्यैतरेयादिश्रवणात् ।

अथ गृह्याग्निपरिग्रह , पञ्चयज्ञानुष्ठानम्, अष्टका पार्वणम्, श्रावणी, आग्रहायणी, चैत्री, आश्वयुजीत्येता सप्त पाकयज्ञसंस्था । औपासनहोम , वैश्वदेवम्, पार्वणम्, अष्टका, ग्रहमासिकश्राद्धम्, वलि श्रावणी चेति वा सप्तपाकयज्ञा । औपासनम्, वैश्व-देव , स्थालीपाक , आग्रयणम्, सर्पबलि , ईशानवलि , अष्टकान्वष्टका चेत्येवं विभक्ता वा स्मार्ताग्निकृत्या सप्त पाकयज्ञा , यजमाने ऋणसंबन्धोपगतदोषमार्जकत्वाच्छोधकसं-स्कारा भवन्ति ।

'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवॉज्जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्य , प्रजया पितृभ्य । एष वा अनृणी, य पुत्री यज्वा ब्रह्मचारी च,' इति श्रवणात् । 'ऋणं ह वै जायते योऽस्ति, स जायमान एव देवेभ्य , ऋषिभ्य , पितृभ्यो, मनु-ष्येभ्य । स यदेव यजेत, तेन देवेभ्य ऋणं जायते, तद्धयेभ्य एतत्करोति । यदेनान् यजते यदेभ्यो जुहोति ॥ १ ॥ अथ यदेवानुब्रवीत तेन ऋषिभ्य ऋणं जायते । तद्धयेभ्य एतत्करोति । ऋषीणा निधिगोप इति ह्यनूचानमाहु ॥ २ ॥ अथ यदेव प्रजामिच्छेत । तेन पितृभ्य ऋणं जायते । तद्धयेभ्य एतत्करोति । यदेषा संतता-व्यवच्छिन्ना प्रजा भवति ॥ ३ ॥ अथ यदेव वासयेत तेन मनुष्येभ्य ऋणं जायते । तद्धेभ्य एतत्करोति । यदेनान् वासयते, यदेभ्योऽशनं ददाति ॥ ४ ॥ स य एतानि सर्वाणि करोति स कृतकर्मा । तस्य सर्वमायुः सर्व जितम् ॥"

इति शतपथादिश्रवणेभ्यश्च पञ्चयज्ञादीनामृणशोधकत्वेन प्रतिपत्ते ॥ सोऽयमेता-वान् यजमानसंस्कार· सौम्यादिकाम्यसंस्कारयोग्यतासंपत्त्यर्थ । अत्र संस्कर्तृसंस्का-र्ययोरेकत्वान्नाधिकारितावच्छेदकं भिद्यते ॥

अत परमग्निष्टोमोऽत्यग्निष्टोम , उक्थ , षोडशी, वाजपेय अतिरात्र , आप्तोर्याम-श्चेति सप्त सोमसंस्था । महाव्रतम्, राजसूय , कुरुवाजपेय , सर्वतोमुखम्, पौण्ड-रीकम्, अभिजित्, विश्वजित्, अश्वमेधनरमेधगोमेधा , गवामयनाङ्गिरसामयनादि-त्यानामयनविश्वसृजामयनानि सत्राणि, वृहस्पतिसव , आङ्गिरस , अष्टादशविधानि चयनानीत्येवमनेकविधा उत्तरक्रतवस्ततोऽन्ये काम्यविधयश्चोपतिष्ठन्ते । तेऽप्येते सस्कारा भवन्ति । अदृष्टोत्पादनद्वारा फलसिद्धावङ्गभावात् । तदित्थमेतावानयमुक्तो दैवसंस्कार· स श्रौतो द्रष्टव्य ॥

इद चात्रावधार्यते—सोमयागा द्विविधा—आवृत्ता अनावृत्ताश्च । तत्रानावृत्ता

एकाहा । आहीना अपि द्वेधा अहीनरूपा सत्ररूपाश्च । द्विरात्रमारभ्यैकादशरात्रपर्यन्ता अहीना एव । एकादशरात्रद्वादशरात्रौ तु द्वेधा—अहीनरूपौ सत्ररूपौ च । त्रयोदशरात्रमारभ्योपरितनानि सर्वाणि सत्राण्येव । तान्यपि द्विविधानि—रात्रिसत्राणि अयनसत्राणि चेति । तत्र शतरात्रपर्यन्तानि रात्रिसत्राणि । सवत्सरसत्रमारभ्योपरितनान्ययनरूपाणि । तेषां च सर्वेषां प्रकृतिभूत गवामयनमिति ॥

इत्थं च निरूपितो द्विविध संस्कारो ब्राह्मो दैवश्चेति । तत्र ब्राह्मेणापी तनु क्रियते । दैवेन देवी । तदुक्त भगवता हारीतेन—

'द्विविध एव संस्कारो भवति—ब्राह्मो दैवश्च । गर्भाधानादिश्मशानान्तो ब्राह्म । पाकयज्ञहविर्यज्ञसौम्याश्चेति दैव । ब्राह्मसंस्कारसंस्कृत ऋषीणां समानतां सायुज्यतां गच्छति । दैवेनोत्तरेण संस्कारेणानुसंस्कृतो देवानां समानतां सालोक्यतां सायुज्यतां गच्छतीति ।

तदित्थ प्रतिपन्नेष्वात्मसंस्कारेषु कतिपयस्यैव छन्दस्त्वमिष्यते आहोस्विदविशेषेण सर्वस्येति विचार्यते । किं चात । यदि कतिपयस्यैवोच्यते तर्तार्हि अर्थजरतीयत्वापत्ति । संस्कारत्वाविशेषेऽपि कस्यचिच्छन्दस्त्वमन्यस्य नेत्यत्र विनिगमकाभावात् ॥ अथ यदि सर्वस्योच्येत तर्तार्हि शूद्रस्यापि सच्छन्दस्त्वमापद्यते ॥

द्विजानां षोडशैव स्युः शूद्राणां द्वादशैव तु ।
पञ्च मिश्रकजातीनां संस्कारा कुलधर्मत ॥
वेदव्रतोपनयनमहानाम्नीमहाव्रतम् ।
विना द्वादश शूद्राणां संस्कारा नाममन्त्रत ॥

इति शाङ्खधरोक्ते ।

त्रिया जातकर्म-नामकरणनिष्क्रमा-न्नप्राशन-चूडा-विवाहा षट् । शूद्राणां तु पञ्चेते, पञ्च महायज्ञाश्चेत्येकादशेति मदनरत्नोक्ते —

गर्भाधान पुंसवन सीमन्तो जातकर्म च ।
नामक्रिया निष्क्रमोऽन्नप्राशन वपनक्रिया ॥
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधि ।
केशान्त स्नानमुद्वाहो विवाहाग्निपरिग्रह ॥
त्रेताग्निसंग्रहश्चैव संस्कारा षोडश स्मृता ।
नवैता कर्णवेधान्ता मन्त्रवर्जं क्रिया त्रिया ॥
विवाहो मन्त्रतस्त्रिया शूद्रस्यामन्त्रतो दश ।

इति व्यासोक्ते —

विवाहमात्रसंस्कारं शूद्रोऽपि लभते सदा ।

इति ब्राह्मोक्तश्च

कतिपयसंस्काराणां विवाहमात्रस्य वा तत्राप्यनुवर्तमानत्वात् ।

'आर्षक्रमेण सर्वत्र शूद्रा वाजसनेयिन ।
तस्माच्छूद्र. स्वयं कर्म यजुर्वेदीय कारयेत् ॥'

इति शूद्राह्निकाचारतत्त्वधृतस्मृतिवचनेन शूद्राणामपि वेदसबन्धात् । अति चेत् । अत्रोच्यते । यथेच्छसि तथास्तु । उभयथाप्येतच्छक्यते प्रतिपत्तुं कतिपयस्य वा सर्वस्य वा छन्दस्त्वमस्तीति । ननु चोक्तमुभयत्रापि दूषणमिति चेन्नैतदस्ति । अस्ति ह्येतत्—यदारम्भे यदारम्भ , यदवगाये यदवसाय , यदभ्युच्चये यदभ्युदय , यदवचये यदवचय , तत्तदायतनमित्युच्यते । यदाश्रयेण वा यस्य प्रतिपत्ति सा तस्य प्रतिष्ठाऽभिज्ञायते । तथा चायं तावद् ब्राह्मसस्कार साक्षात्परम्परया च ब्राह्मणत्वक्षत्रियत्ववैश्यत्वाना प्रतिष्ठा भवति । तदधीनोपपत्तिकत्वात् । प्रतिष्ठाया च श्रूयते प्रभागच्च , तस्मात् संसिद्धं प्रमालक्षणं छन्दस्त्वमेतस्य ।

तत्र योग्यात्मनि सस्कारविशेषेण ब्रह्माधीयते, योग्यात्मनि च सस्कारविशेषेण क्षत्रं, विड् वा । श्वोवस्यस चेदं ब्रह्म, रौद्रं क्षत्रम , मारुत्यो विश । आतश्चाग्नेयं ब्रह्म, ऐन्द्रं क्षत्रम्, वैश्वदेव्यो विश । अग्नेस्तु छन्दो गायत्री सा चाष्टवर्णा, इन्द्रस्य त्रिष्टुबेकादशवर्णा, विश्वेषा देवाना जगती द्वादशवर्णा । आतश्च गायत्र ब्रह्म, त्रैष्टुभं क्षत्रम्, जागती विट् । तदित्थमष्टवर्णनिबन्धनं ब्रह्माधेयमेकादशवर्णनिबन्धन चेदं क्षत्रम्, द्वादशवर्णनिबन्धना त्वेषा विडिति वर्णछन्दोवद्धतया त्रयो वर्णा उच्यन्ते—ब्राह्मणः क्षत्रियो वैश्य इति । शूद्रस्यैवमवर्णत्वेऽपि वर्णत्वमौपचारिकं द्रष्टव्यम् । अच्छन्दस्त्वस्यैव छन्दस्त्वेन विवक्षितत्वात् । तथा च यथा हि वाग्वर्णो गायत्रीछन्दा , त्रिष्टुप्च्छन्दा , जगतीच्छन्दा , विच्छन्दा वा भवति, एवमयं मनुष्यवर्णोऽपि चतुर्विधो भवति । सर्वोऽप्यय प्राणिवर्गोऽप्राणिवर्गो वा तैरेतैर्वर्णछन्दोभिरेव सच्छन्दस्कतया वर्णो भवति । ब्राह्मण , क्षत्रिय., वैश्य , शूद्र इति । यथा च ग्राम्येषु पशुषु तावदजो ब्राह्मण , अवि क्षत्रिय , गौर्वैश्य , अश्व. शूद्र इति । यथावान्यत्र स्थावरादिषु । एवमयं मनुष्येषु सस्कारसिद्धो भूत्वा गायत्रीच्छन्दा ब्राह्मण , त्रिष्टुप्च्छन्दा क्षत्रिय , जगतीच्छन्दा वैश्य , प्राजापत्यच्छन्दा विच्छन्दा वा शूद्र इति ॥

'ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्य कृत । ऊरू तदस्य यद्वैश्य पद्भ्या शूद्रो अजायत ॥' इति ।

'प्रजापतिरकामयत—प्रजायेयेति, स मुखतस्त्रिवृतं निरमिमीत । तमग्निर्देवता अन्वसृजत, गायत्री छन्दो, रथन्तरं साम, ब्राह्मणो मनुष्याणाम्, अज पशूनाम् । तस्मात्ते मुख्या —मुखतो ह्यसृज्यन्त ॥ उरसो बाहुभ्या पञ्चदशं निरमिमीत । तमिन्द्रो देवतान्यसृजत, त्रिष्टुप्छन्द , वृहत्साम, राजन्यो मनुष्याणाम्, अवि पशूनाम् । तस्मात्ते वीर्यावन्तो–वीर्याद्धयसृज्यन्त ॥ मध्यत सप्तदश निरमिमीत । तं विश्वेदेवा देवता अन्वसृजन्त । जगतीछन्दो, वैरूपं साम, वैश्यो मनुष्याणाम्, गाव. पशूनाम्,।

तस्मात्ते आशा —अग्नयानासृज्यन्त । तस्मादूर्ध्वोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त ॥ पक्त एकविंश निरनिमीत । तमनुष्टुप् छन्दोऽन्वसृज्यत । वैराज साम शूद्रो मनुष्याणाम्, अश्व पशूनाम्, तस्मात्तौ भूतसंक्रामिणावश्वश्च शूद्रश्च । तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो—न हि देवता अन्वसृज्यत । तस्मात्पादावुपजीवत पक्तो असृज्येताम् । प्राणा वै त्रिवृत् अर्धमासा पञ्चदश प्रजापति सप्तदश अय इमे लोका असावादित्य एकविंश । तस्मिन् वै एते श्रिता एतस्मिन् प्रतिष्ठिता य एव वेदैतस्मिन्नेव श्रयते एतस्मिन् प्रतितिष्ठति ॥' इति (शतपथ० ७ । १ । १)

इति मन्त्रब्राह्मणाभ्यां तथात्वानात् ।

यत्तु एवंविधादेव मन्त्रब्राह्मणाथात्वानात् शूद्रादौ मनुष्याकारपरमेश्वरस्य मुखा बाहोरूपत्वार शूद्रादिभूता ब्राह्मणक्षत्रियवैश्यशूद्रा उत्पन्ना इति लभ्यते तत्रयो त्पत्तिलभ्यमेव ब्राह्मणत्वादिक न संस्कारलभ्यमित्याक्षिपन्ति तदज्ञानात् ।

'अर्धो वै प्रजापतेरात्मनो वैश्यमासीदर्धो माल्म्यम् । यद्वैश्यं—सोमो वै स । ततो ब्राह्मणमसृजत । यन्माल्म्यं—सुरा वै सा । ततो राजन्यमसृजत ॥ इत्यादिश्रुति ष्विवेहापि मुखाद्ब्राह्मणमसृजत उरस क्षत्रियमित्यादीनामपेक्षितार्थविशेषपरत्वात् । सदित्थ सिद्धमन्यादिमक्षित्रियप्रविणसंभोगाद्ब्राह्मणादिसंस्कारविशेषापायामपि गायत्र्या दित्वमिति दिक् ॥

निरूपयिष्यते चायमर्थो वैश्येन धर्मसमीक्षायामिहतोऽत्र विरम्यते ।

अथ प्रविणम्—

तत्र समिधमाधिष्ठ । गायत्री त्वा छन्दसामवतु त्रिवृत् स्तोम रथन्तरं साम अग्निर्देवता ब्राह्म प्रविणम् ॥ उष्णमाधिष्ठ । त्रिष्टुप् त्वा छन्दसामवतु पञ्चदशस्तोम बृहत्साम इन्द्रो देवता क्षत्र प्रविणम् ॥ विराजमाधिष्ठ । जगती त्वा छन्दसामवतु । सप्तदशस्तोम वैरूपं साम मरुतो देवता विड् प्रविणम् ॥ उदीचीमाधिष्ठ । अनुष्टुप् त्वा छन्दसामवतु एकविंशस्तोम वैराज साम मित्रावरुणौ देवता भर्ल प्रविणम् ॥ ऊष्णमाधिष्ठ पङ्क्तिस्त्वा छन्दसामवतु त्रिणवत्रयस्त्रिंशौ स्तोमौ । शाक्वररैवते सामनी । बृहस्पतिर्देवता । वर्चो प्रविणम् ॥ इति तैत्तिरीयश्रवणात्—

प्राचीमारोह । गायत्री त्वावतु रथन्तरं साम त्रिवृत् स्तोमो वसन्तऋतु ब्राह्म प्रविणम् ॥ दक्षिणामारोह । त्रिष्टुप् त्वावतु बृहत्साम, पञ्चदशस्तोमो, ग्रीष्मऋतु क्षत्र प्रविणम् ॥ उदीचीमारोह । जगती त्वावतु वैरूपं साम सप्तदशस्तोमो वर्षा ऋतु विड् प्रविणम् ॥ प्रतीचीमारोह । अनुष्टुप् त्वावतु, वैराज साम एकविंशस्तोम शरदृतु, भर्ल प्रविणम् ॥ ऊष्वामारोह । पङ्क्तिस्त्वावतु शाक्वररैवते सामनी त्रिणवत्र यस्त्रिंशौ स्तोमौ । हेमन्तशिशिरावृतू । वर्चो प्रविणम् ॥

इति माध्यन्दिनीयश्रवणाच्चामिमक्ष प्रविण ब्राह्म, इन्द्रमक्ष प्रविणं क्षत्रम्,

तथा मरुद्भक्तं द्रविणं विट् प्रतिपद्यते । ब्रह्मशब्देन चात्र यज्ञ , क्षत्रशब्देन च राष्ट्रं विवक्ष्यते ।

'ब्रह्म वा एष प्रपद्यते यो यज्ञं प्रपद्यते ।
ब्रह्म वै यज्ञ । क्षत्रं वा एष प्रपद्यते यो राष्ट्रं प्रपद्यते ।
क्षत्रं हि राष्ट्रम् ।' इत्यैतरेयादिश्रवणात् ।
यज्ञशब्द पुनरत्र सोमसूर्याधिष्ठितत्रयीविद्यापर ।

'अयं वै यज्ञं योऽयं पवते । तदिमं यज्ञं सभृत्य एतस्मिन् यज्ञे प्रतिष्ठापयति । यज्ञेन यज्ञं सदधातीति । यज्ञं वा एष जनयति यो यजते । सैषा त्रयी विद्या यज्ञ । तस्या एतच्छिरपमेष वर्ण ॥' इति ।

'प्रजापतिर्यज्ञमसृजत । यज्ञं सृष्टमनु ब्रह्मक्षत्रे असृज्येताम् । ब्रह्मक्षत्रे अनु द्वय्य प्रजा असृज्यन्त । हुतादश्चाहुतादश्च । ब्रह्मैवानु हुताद । क्षत्रमन्वहुताद । एता वै प्रजा हुतादो यद् ब्राह्मणा. । अथैता अहुतादो यद् राजन्यो वैश्य शूद्र इति । यज्ञा-द्वै प्रजा प्रजायन्ते । यज्ञात् प्रजायमाना मिथुनात् प्रजायन्ते । मिथुनात् प्रजायमाना अन्ततो यज्ञस्य प्रजायन्ते ॥'

इत्यैतरेयादिश्रुतिभ्य सर्वजगदुत्पत्तिस्थितिक्रियापरिकरविद्याया एव यज्ञशब्दल-व्यवस्थापनात् । ईदृशयज्ञार्थप्रतिपादनपरतयैव च सर्व एवैते वेदा प्रवर्तन्ते इत्यप्य-वधेयम् । तथा च—विद्यादयो ब्रह्मप्रकारा ब्राह्मणस्य स्वम् । तच्चाग्निभक्तम्, गायत्री-च्छन्द साध्यमतोऽग्निभक्त्या ब्रह्मणो गायत्रीत्वम् । राष्ट्रादयो हि क्षत्रप्रकारा राज-न्यस्य स्वम् । तच्चेन्द्रभक्तम्, त्रिष्टुप्छन्द साध्यमत इन्द्रभक्त्या क्षत्रस्य त्रिष्टुप्त्वम् । विडेव तु इषोर्जरायिपशुपुष्ट्यादिभेदभिन्ना वैश्यस्य स्वम् । तच्च वैश्वदेवभक्तम्, जगतीछन्द साध्यमतो विश्वदेवभक्त्या विशो जगतीत्वमितीत्थ द्रविणानामपि ससिद्धं भक्त्या छन्दस्त्वमतो नातिरिक्तार्थत्व प्रसज्यते—इत्यवधेयम् ॥ तथा चागत्यप्राति-गच्छदर्थेषु सस्कारेषु द्रविणेषु च छन्द शब्दप्रयोगेऽपि नार्थान्तरतेति ससिद्धम् ॥

स्यादेतत् । (१)—अथापि यदेतदाध्वर्यवे छन्दोभाषान्नायते—

'मा च्छन्द , प्रमा च्छन्द , प्रतिमा च्छन्द , अस्रीवयश्छन्द , पङ्क्तिश्छन्द , उष्णिक् च्छन्द , वृहती च्छन्द , अनुष्टुप् छन्दो, विराट् छन्दो, गायत्री च्छन्द , त्रिष्टुप् छन्दो, जगती च्छन्द· ॥ १ ॥'

'पृथिवीच्छन्दोऽन्तरिक्ष छन्दो द्यौश्छन्द समाश्छन्दो नक्षत्राणि च्छन्दो मनश्छन्दो वाक्छन्द , कृषिश्छन्दो हिरण्य छन्दो गौश्छन्दोऽजाश्छन्दोऽश्वश्छन्द ॥ २ ॥

'एवश्छन्दो वरिवश्छन्द शम्भूश्छन्द परिभूश्छन्द आच्छच्छन्दो मनश्छन्दो वाच-श्छन्द सिन्धुश्छन्द समुद्रं छन्द सलिलं छन्द संयच्छन्दो वियच्छन्दो वृहच्छन्दो रथन्तर छन्दो निकायच्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्द सन्तुपछन्दोऽ-

मुष्टुप् छन्द ककुप्छन्दस्विकपुप्छन्द फाम्यं छन्दोऽनुपं छन्द पदपङ्क्तिछन्दोऽक्षरप ङ्क्तिछन्दो पिष्टारपङ्क्तिछन्द क्षुरोष्णिग्वा छन्द प्रथ्यछन्द पक्षछन्द एयछन्दा वरियछन्दो पमछन्दो वयस्यच्छन्दो विशालं छन्दो विष्पधाछन्दछ ङ्क्तिछन्दा दृगोहण छन्दस्वन्द्र छन्दोऽाङ्गं छन्द इति ॥ २ ॥

(२)—यथ वायवणे त्रयस्छन्दोविशेषा आम्यायन्ते—

"त्रीणि छन्दांसि कवयो वियेतिरे पुरूरूपं दक्षस पिभचक्षणम्। आपो यासा ओपध यस्तान्येकस्मिन् भुवन आर्पितानि" ॥ १ ॥

इति । तेनातिरिच्यते छन्द पदार्थ इति गम्यसे—इति चत् । न । यथा हि गाय त्र्युष्णिगनुष्टुपादयो पिष्टारपङ्क्तिसतोवृहतीकपुपादयश्च वार्षिकच्छन्दापिशेषा उपदि श्यन्ते । एवमेय सन्ति खलु मात्रमात्रतिमादय एयोयस्मिन् शम्भादयश्चार्षिकच्छन्दो पिशेषास्तदर्थव्यवस्थापका इत्यत्रैव छन्दोभाषातात्पर्यागमात्। तत्र च शिदं परिच्छे दलक्षण छन्दस्त्वमिति नाधान्तरत्वप्रसक्ति ॥

यत्पुनरापवणेऽपादीनां त्रयाणां छन्दस्त्यमुपदिश्यते तस्यायमाशय—यदिदमने करूप पिभक्ति देनाम्यातं किंचिदुद्दश्यते तदेतत्सर्वं त्रया म्ययच्छिद्य गृह्यते । आपश्च यातार्थौपधयश्चेति । एतदेवान्यत्र तिस्र एव देयास्तेजोऽपमानीत्यत्र देवताप्रकरणे नाम्नातम् । भवति हि निपिडायवयवास्तरलावयवया पिरलावयवयाश्च पदार्थभिदा लोके । न चैतन्नैपिष्यापचारेण किंचिदिहोपलभ्यते । तत्र निपिडावयवया अद्भौपधि मृदादिशब्दै तरलावयवया अप्छब्देन पिरलावयवास्तु तेजोवाय्वादिश दैव्यपदिश्यन्ते। औपधादिपातादीनां स्वानुगतभाषोपलक्षकत्वात् त्रयोऽप्यते भाया एयैकस्मिन्नर्थे त्रय पिता द्रष्टव्या । सवस्याप्यर्थजातस्य मृदवस्थया अयवस्थया, तेजोऽवस्थया च निमि त्तानुरोधेन पिपरिणमनात् । एतेष्वेव त्रिषु भावेषु पिश्वमेतत्प्रतिष्ठितमित्यत्र शिदमेषां प्रतिष्ठास्वरूप छन्दस्त्वमिति नाधान्तरत्वप्रसक्ति ॥

यत्तु (१)—शब्दचन्द्रिकादौ छन्द शब्दस्य पिशेषपरत्वम् —(२)—यत्र छन्दा ङ्गत्तिषु साधा सुहदो पिमनीहता' इत्यादौ वा तस्य रहपरत्वम् (३)—यदपि वा—

मयोच्यमान यदि ते श्रोतु छन्दो पिलासिनि ।
श्रूयतामभिधास्यामि श्रुत्वा चैतद्विधीयताम् ॥
(रामा २ । ९ । ७)

इत्यादिषु रुचिपरत्वम्

(४)— वरदानात् पितु फाम छन्दमृत्युरसि प्रभो । इत्यादिष्वभिलाषपरत्वम्,

(५)— दक्षिण सरस्येदारपरच्छन्दानुवर्तिषु ।' इत्यादिषु वशतापरत्वम्,

(६)—'स्वच्छन्द मजसुन्दरीभिरमित प्रेमप्रमालिङ्गित ।' इत्यादिषु स्वैरचार परत्वम्,

(७)—स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्वुच्छटा' इत्यादिषु निष्प्रतिवन्ध-परत्वम्,

(८)— त्वग्दोषी राजपुत्रस्तु ऋष्टिषेणसुतोऽभवत्।
राज्येन छन्दयामासु प्रजा स्वर्गं गते गुरौ ॥

इत्यादिषु विरेचनपरत्वं वा प्रतिपद्यते। तावतापि नार्थान्तरत्वमापादयितुं युक्तम्। (१)—विषस्य नाडीमार्गावरोधकतया दैशिकावच्छेदलक्षणत्वात् ॥ (२)—छन्दानुवृत्तीतिपदं तु द्वेधा व्याख्येयम्—छन्द शब्दस्येच्छापरत्वे यथा सुहृदामिच्छा स्यात्तथानुवर्तनीयमिति कृत्वा त एते दु खेन साधयितुं शक्या भवन्ति, सर्वथा परेच्छानुवर्तनस्य दु खरूपत्वादित्येकोऽर्थ । छन्द शब्दस्य परिच्छेदपरत्वे तु वाच्यमवाच्यं देयमदेयमित्येवं मर्यादया व्यवहारनियमेनानुवृत्तौ क्रियमाणाया सुहृदो दु साधा भवन्ति, मित्रताया परिच्छेदासहत्वादित्यन्योऽर्थ। तथा चेच्छापरत्वे वक्ष्यमाणलक्षणम्, परिच्छेदपरत्वे तूक्तलक्षणं छन्दस्त्वं सिद्धमिति नार्थान्तरम् ॥

(३ । ४ । ५ । ६ ।)—अथ 'श्रोतुं छन्द', छन्दमृत्यु' इत्यादिषु तु सर्वत्रैवेच्छार्थकत्वं छन्द शब्दस्येति न तावदनैकार्थ्यम् । रुच्यादीनामिच्छाविशेषरूपत्वात्। इच्छा चाभिप्रायो मनसश्छन्द । तथा चाहु कोशकारा—'अभिप्रायश्छन्द आशय' इति। यद्यपि च विषयविशेषाभिमुख्येन मनस प्रवृत्तिरेवाभिप्रायस्तथाप्युपचारभेदादसौ द्वेधा—मनोगृहीतविषयो वा विषयारूढमनो वा । अस्मिन् विषये कीदृशस्तवाभिप्राय, केनाभिप्रायेणागतोऽसि, धनं नोऽभिप्रेतमित्येतत्सर्वं विषयाभिप्रायम्, धनाभिप्रायेणागत, द्रष्टुं विज्ञातुं वा ममाभिप्राय, किमत्राभिप्रैषीति, मनोऽभिप्रायम् इतीत्थमुभयथा व्यवहारदर्शनात् ॥ तत्र मनोगृहीतविषयस्य मनोऽवच्छेदकत्वान्मनश्छन्दस्त्वं भवति। अभिप्रायानुसारेणैव मनस स्वरूपलाभात् तत्रैव तत्प्रतिष्ठानात्। अथ विषयसंक्रान्तमनस खलु मनुष्यावच्छेदकत्वान्मनुष्यच्छन्दस्त्वं भवति। स्वसयुक्तमनोऽनुरोधेन प्रवर्तमानस्यात्मन एव मनुष्यत्वात् तत्रैव तत्प्रतिष्ठानात् । अत एव यावानस्य देह सायौगिका वार्थास्ते सर्वे दीनमनसो दीना, उदारमनसस्तूदारा भवन्ति, नीचमनसो नीचत्वम्, महाशयमनसस्तु महाशयत्वं प्रतिपद्यन्ते । अङ्गुल्य उत्तिष्ठन्तामित्यभिप्रयत एवास्याङ्गुलय उत्तिष्ठन्ते। हस्त उत्तिष्ठतामित्यभिप्रयतश्च हस्त। गच्छति तिष्ठेयमिति तिष्ठत्यव्यतिरेकेण ॥ यत्र तु गच्छेयमिति न गच्छति, तत्रेयता कालेन गच्छेयमिति कालविशेषस्य विशेषणविधया विषयीभावो वा, न गच्छेयमित्येवमभिप्रायविशेषस्य नान्तरीयकसश्लिष्टस्य प्रतिवन्धकाविषयीभावो वा, सामर्थ्यापचयादिप्रतिवन्धकसद्भावो वा, हेतु समीक्षणीय । अत एव, 'आकूत्यै प्रयुजेऽग्नये स्वाहा' इति। 'आत्मना वा अग्रे आकुवते यजेयेति। तमात्मन एव प्रयुङ्क्ते यत्तनुते। ते अस्यैते आत्मन् देवते आधीते भवत—आकूतिश्च प्रयुक् च । मेधायै

मनसेऽमये स्वाहेति । मेधायां वा मनसाभिगच्छति—यजेयेति । ते अर्सते आत्मन् देवते आधीते भवत —मेधा च मनश्च—इत्यादिना, तथा इमे वै प्राणा मनोजाता मनोयुजो दक्षक्रतव षागेवामि, प्राणोदानौ मित्रावरुणौ चक्षुरादित्य, श्रोत्र विश्वे देवा ' इत्येवमादिना च सर्वव्यवहारप्रयोजकत्व मनस समाम्नायते ।

तस्येह त्रिविधस्यापि ऋषिष्ठानस्य देहिन ।
दशलक्षणयुक्तस्य मनो विद्यात् प्रवर्तकम् ॥'

इति मनुना स्मर्यते च । एतदभिप्रायेणैव पुरुषेषु मनुष्यमानुषमानवमनुजा शब्दा प्रवर्तन्ते । मनुमनुर्मनसामैकार्थ्यात् ।

अत एव—

पुनन्तु मा देवजना पुनन्तु मनसा धिय ।
पुनन्तु विश्वाभूतानि जातवेद पुनीहि मा ॥'

इति मन्त्रस्याथर्वणे पुनन्तु मनवो धिय ' इति पाठ संगच्छते । मनसीत्यादिशब्दानां व्यक्तिविक्षेपनिरूढानां मन संयुक्तयावदर्थपरत्वाभाववन्मनुष्यादिशब्दानामपि पशुपक्ष्यादिष्वनुपचार प्राचस्त्यामिप्राय । प्राचस्त्यं च वृत्र्यष्टकबीजाङ्कुरयोग्यक्षेत्र रूपस्यास्य मनुष संपूर्णात्मत्वेन द्रष्टव्यम् । अत एव मनुष्यधर्मतेषु त्रिमग्योनिजेषु वृत्तयोऽष्टविधा उत्पद्यन्ते । तदुत्पत्तिक्षेत्रस्य मनुषस्तेषु खिलरूपेणैवानुवर्तमानत्वात्तदनुसारेण यत्किंचिद्वृत्तेरेव तत्र समुदयात् । वृत्र्यष्टक चेदमाथर्वणे समामनन्ति—

'मनसे चेतसे धिय आकूतय उत चित्तये ।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम् ॥' इति ।

एवंरीत्यैव मनुषि प्रयोजकादितादात्म्याभिप्रायेण कतिपये शब्दा प्रवर्तन्ते । तथा च मन्त्रा—

प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्य विद्यात्तं पुरुषं परम् ॥
एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके पर प्राणमपरे ब्रह्म शाश्वतम् ॥' इति ।

अथैतस्मिन् मनुष्यसामान्ये सकलप्रमिणाप्यापनसमर्थकसंस्कारविशेषोपपत्तावन्यथा म्यवाचारग्राही भवतीति कस्यचिद्ब्राह्मणत्वमन्यस्य क्षत्रियत्व वैश्यत्वं शूद्रत्वं वा प्रवर्तते । तदेतत्तेन तत्तद्विभिन्नप्रवृत्तिप्रयोजकानां तत्तद्वाण्यगतसंस्कारविशेषाणां ब्राह्मणादिच्छन्दस्त्वमाख्यायते । दुराचारानुमितेन तादृशसंस्कारभ्रंशेनोन्मर्यादो ब्राह्मण स्वरूपात् पततीति तादृशपतितत्वप्रतिबन्धद्वारा यथास्थितस्वरूपसंरक्षकस्य तादृशसंस्कारस्य ब्रह्मादिप्रतिपन्नस्य वा ब्राह्मणादिच्छन्दस्त्वोपपत्ते । ब्राह्मणादीनां तत्रैव प्रतिष्ठितत्वाच्चेति । तथा च न सम्प्राप्यवर्णान्तरतेति सूक्ष्मेक्षिकया समीक्ष्यम् ।

जडेष्वप्येवं स्वस्वप्रवृत्तिप्रयोजकस्य स्वस्वासाधारणधर्मस्य स्वस्वच्छन्दस्त्वमिति सर्वं एव स्वकर्माणि स्वच्छन्दसो भवन्ति । बलवत्परधर्मसंक्रमे तु परच्छन्दसो जायन्ते । अन्याधीनप्रवृत्तिकत्वात् । यथा हि कपाटादिषु समवायिनो काष्ठखण्डयोर्जटितयोरालम्बनस्य कीलितलौहादिशकलस्य कपाटच्छन्दस्त्वमन्यथा काष्ठखण्डद्वयविभागात्कपाटस्वरूपहानि. प्रसज्यते । एवं पादद्वयावसक्तरश्मिना आच्छन्दित पशुस्तदधीनवृत्तिको भवतीत्यसौ रश्मिश्छन्द स्यात् । एवमेवान्यत्रान्यत्र सर्व एव जडश्चेतनो वा धर्मी स्वगतेन धर्मविशेषेण छन्दितस्तदधीनवृत्तिको भवतीत्यतस्तस्मिन् स्वधर्मे प्रतिष्ठानादस्य स्वच्छन्दस्त्वम्, स्वरूपानुगतेन च केनचिद्धर्मेणाच्छन्दने तस्य परच्छन्दस्त्वं भवतीति पर्यालोच्यम् । (७) एतेन स्वच्छन्दोच्छलदच्छेत्यादय. प्रयोगा अपि सुव्याख्याता ॥ (८) 'राज्येन च्छन्दयामासु ' इत्यादावपि विरेचनस्य व्यावर्तनापरपर्यायस्य संवित्परिच्छेदानतिरेकान्नार्थान्तरत्वमापद्यते । तदित्थमनेकधा निर्दिष्टं संस्कृतं छन्द प्रतिष्ठातत्त्वम् ॥

अथात प्राकृतां छन्द प्रतिष्ठामनुवर्तयाम । अस्ति हि—सर्वेषामेवार्थजाताना काचिदाकारनिबन्धना मात्राभूमि, ज्ञानदर्शनचारित्र्यशक्तिनिबन्धना च वृत्तभूमि· प्रातिस्विकभावेन प्रकृतिसिद्धा, या भूयोदर्शनेन परीक्षकबुद्धिनिरूढा भवति । तां तामेव भूमिं बुद्धिनिष्ठा छन्द प्रतिष्ठामालोचमान शिल्पी तत्साम्येन बहिरर्थमुत्पादयति । इमा च दार्शनिका यद्यप्यनुभवाहितसंस्काररूपा विषयाकाराकारितान्त करणवृत्त्यनुशयरूपा वाचक्षाणा विषयोत्पत्त्यनन्तरभाविनीमेवाभिप्रयन्ति । अथापि तद्वस्तूपपत्तेस्तच्छन्द प्रतिष्ठानिघ्नतया वस्तुतस्तस्या औत्पत्तिकत्वससिद्धि· । नहि खलु हस्वचिकीर्षया कार्श्यं गमितस्यापि हस्तिन प्रोत्तुङ्गचिकीर्षया वा पोषं गमितस्यापि कीटस्य कपिशरीरमर्यादानुगम. शक्यते कर्तुम् । न वा तरुणकपिसमशरीरता मनुष्यशिशोर्महतापि प्रयत्नेन मुग्धत्वमपनोद्य तरुणकपिवद्गमनागमनप्रौढिं कर्तुं पार्यते गम. । पञ्चविंशतिवर्षाणि यावददृष्टवर्धनभावस्यापि नरशरीरस्य तदुत्तरमुपायपरम्परयापि वृद्धियोग्यत्वं न दृश्यते । एते चान्ये चैवंविधास्तस्या एव सृष्ट्यादौ परमेश्वरेच्छानियमिताया प्रतिष्ठाया महिमानो भवन्ति ।

सा चेयं छन्द प्रतिष्ठा द्वेधा—मात्राप्रतिष्ठा वृत्तप्रतिष्ठा च । अवयवपिण्डपरिवृत्तिसहत्वे आद्याया, तदसहत्वे चान्याया व्यवस्थिति । एतदव्यक्तप्रतिष्ठाव्यञ्जका एवावयवकूटा प्रतिष्ठाप्तुलितकेन सन्निविष्टाश्छान्दसिकनयेऽक्षरशब्देन संज्ञायन्ते वर्णशब्देन च । तथा च श्रूयते—

'स बृहतीमेवास्पृशद् द्वाभ्यामक्षराभ्यामहोरात्राभ्यामेव । तदाहुः—कतमा सा देवाक्षरा बृहती यस्या तत्प्रत्यतिष्ठत् । द्वादश पौर्णमास्य., द्वादशाष्टका, द्वादशामावास्या., एषा वाव सा देवाक्षरा बृहती, यस्या तत्प्रत्यतिष्ठदिति ।'

अत्र हि पौर्णमास्यष्टकामावास्यानामहोरात्रमोष्टादशस्यमाम्यामते छन्द परिमा पायाम् ।

तथा शतपथश्रुतौ—

'पञ्चदश वा अर्धमासस्य रात्रय । अर्धमासशो वै संवत्सरो भवति तद्रात्रीरव्या प्रोति । पञ्चदशानासु वै गायत्रीणां त्रीणि च शतानि षष्टिश्चाक्षराणि, त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि तदहान्याप्नोति । तद्वय संवत्सरमाप्नोति ।'

इत्येवमहोरात्राभ्यां संवत्सरावि प्रदर्शयता भगवता महर्षिणा पञ्चदशभि पञ्च दशभिरेव प्रकल्पितशरीराणां वैदिकपद्याये संवत्सरसम्पाप्तिपमक्रान्तिसूत्रप्रश्नानामथ मासाम्यानां छन्द-परिमापायामक्षराम्यया प्रतिपत्तव्यानां चतुर्विंशत्या संवत्सरस्य गाय त्रीस्थ मुप्रतिपादित मवर्तीति द्रष्टव्यम् ।

एतदभिप्रायेणव च—

'अग्निं दूत वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ।

इत्येतन्मन्त्रविवरणप्रक्रमे शतपथे—

'देवाश्च वा असुराश्चोभये प्राजापत्या पस्पृधिरे । तान् स्पधमानान् गायत्र्यन्तरा तस्यौ । या वै सा गायत्र्यासीद् इयं वै सा पृथिवी । इयं हैव तदन्तरा तस्या । त उभय एव विदांचक्रु मतरान् वै न इयमुपामस्यति ते अग्निष्यन्ति परेतरे अग्नि ष्यन्तीति । तामुभय एवोपमन्त्रयांचक्रिरे—अग्निरेव देवानां दूत आस सहरक्षा इसासुररक्षसमसुराणाम । सामिमेवानुप्रेयाय । तस्मादन्वाह 'अग्निं दूतं वृणीमह' इति॥

इत्यनन प्रन्थेन संवत्सरवत् पृथिव्या अपि गायत्र्यात्मकत्वमाम्यायते । तत्राप्यक्षराणां षट्पुत्तरत्रिशतसंमितानां व्यवस्थितत्वया अर्धमासशो व संवत्सरो भवतीति' इति न्यायेन पञ्चदशघा परिच्छिन्ने चतुर्विंशत्यक्षरत्वोपलम्भे ॥

अपर आह—

"यत्पयपदमत् सरिरस्य मध्य उर्वामपदमगत प्रतिष्ठाम् ।
तत्पुष्करस्यायतनादि जातं पर्ण पृथिव्या प्रयनं हरामि ॥
यामिरदहन्गत प्रतिष्ठामुर्वीमिमां विश्वजनस्य भव्याम् ।
ता न शिवा शकरा सन्तु सवा ॥"

'आपो वा इदमग्रे सलिलमासीत् । तत्र प्रजापतिरभाम्यत्—कथमिदं स्यादिति । सोपऽश्यत् पुष्करपण तिष्ठत् । सोऽमन्यत—अस्ति व तत्—यस्मिन्निदमधितिष्ठतीति । स वराहो रूपं कृत्वोपन्यमज्जत् । स पृथिवीमध आर्च्छत् । तस्या उपहत्योदमज्जत् । तत्पुष्करपर्णेऽप्रथयत् । यदप्रथयत् तत्पृथिव्यै पृथिवीत्वम् ॥ अभूद्वा इदमिति तद्भूम्यै भूमित्वम् ॥ तां दिशोऽनु वात समवहत् । तां शकराभिरदहत् शं वै नोऽभूदिति । तच्छकराणां शर्करत्वम् ।

इत्येवं मन्त्रब्राह्मणाभ्या तैत्तिरीयके जगत प्रतिष्ठाया शर्कराभिरक्षरस्थानीयाभि संभृतत्वादस्याश्छन्द सामान्यलक्षणे प्राप्ते छन्दोविशेषप्रतिपित्सायाम्—

"स वै खलु प्रथमं यजति । तद्वै कनिष्ठं छन्द सद् गायत्री प्रथमा छन्दसा युज्यते । अयं वै लोको वर्हि । ओषधयो वर्हि । अस्मिन्नेवैतल्लोके ओषधीर्दधाति । ता इमा अस्मिल्लोके ओषधय प्रतिष्ठिता । तदिदं सर्व जगदस्याम् । तेनेयं जगती, तज्जगतीं प्रथमामकुर्वन् । अथ नराशंस द्वितीयं यजते । अन्तरिक्षं वै नराशस ।अन्तरिक्षमु वै त्रिष्टुप् । तत्त्रिष्टुभं वै द्वितीयामकुर्वन् ।"

इति शतपथोक्तप्रकारेण द्युलोकान्तरिक्षापेक्षया कनिष्ठाया पृथिव्या कनिष्ठत्वसाधर्म्याद्गायत्रीत्वं सर्वजगदाश्रयत्वाद्वा जगतीत्वमित्यादि तत्तत्प्रकरणप्राप्तं द्रष्टव्यमिति । क्वचित्त्वस्य श्लोकस्य स्रग्धराछन्द , त्रैष्टुभमिदं पद्यमित्यादिवदिहापि भेदेन व्यपदिशन्ति—'गायत्री वै पृथिवी, त्रैष्टुभमन्तरिक्षम्, जागती द्यौ , आनुष्टुभीर्दिश ।' इत्यादि ।

एवं यत्र गार्हपत्यात्प्राञ्चं सन्तमाहवनीयमुद्धर्तुं विक्रमाधानं विधीयते तत्र—

"तं वा अष्टासु विक्रमेष्वादधीत, अष्टाक्षरा वै गायत्री । गायत्र्यैवैतद्दिवमुपोत्क्रामति । एकादशस्वादधीत, एकादशाक्षरा वै त्रिष्टुप् । त्रिष्टुभैवैतद्दिवमुपोत्क्रामति । द्वादशस्वादधीत, द्वादशाक्षरा वै जगती । जगत्यैवैतद्दिवमुपोत्क्रामति ॥ नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येत तदादधीत । स यद्वा अप्यल्पकमिव प्राञ्चमुद्धरति । तेनैव दिवमुपोत्क्रामति ।"

इत्येवं विक्रमाणा छन्दोनिदानसख्यया संख्याताना छन्द परिभाषायामक्षरत्व छन्दसा मात्रानिबन्धनत्वं च सुव्यक्तमाख्यातमिति द्रष्टव्यम् ॥ एवमग्निष्टोमप्रशंसायामैतरेयके—

"स वा एषा गायत्र्येव यदग्निष्टोम । चतुर्विंशत्यक्षरा वै गायत्री, चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि । स वा एप सवत्सर एष यदग्निष्टोम । चतुर्विंशत्यर्धमासो वै संवत्सर , चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि ।"

इत्येवमग्निष्टोमस्य गायत्रीत्वसंवत्सरत्वोपचारप्रसङ्गेन स्तुतशस्त्राणामक्षरत्वमवगतं भवति । यत्तु स्तोत्रशस्त्राणामर्धमासत्वानवगमवदक्षरत्वमपि नावगतं स्यादिति ब्रूयात् तदपवाद्यम् । स्तोत्रशस्त्रयोरर्धमासत्वासिद्धौ चतुर्विंशत्यर्धमासत्वरूपसंवत्सरत्वस्याप्यग्निष्टोमनिष्ठत्वेनाप्रतिष्ठानापत्ते ।

यत्तु—"सोऽब्रवीत् प्रजापतिश्छन्दासि—"रथो मे भवत, युष्माभिरहमेतमध्वानमनुसंचराणीति । तस्य गायत्री च जगती च पक्षावभवताम् । उष्णिक् च त्रिष्टुप् च प्रष्ट्यौ । अनुष्टुप् च पङ्क्तिश्च धुर्यौ। वृहत्योवोद्धिरभवत्। स एतं छन्दोरथमास्थाय एतमध्वानमनुसमचरत् ॥"

इति तैत्तिरीयके छन्दसां रथत्वम् ।

यप— 'पशवो वै देवानां छन्दांसि, तद् यथेद पशवो युक्ता मनुष्येभ्यो वहन्ति । एष छन्दांसि युक्तानि देवेभ्यो यज्ञ वहन्ति ॥" इति शतपथे छन्दसां पशुत्वम् ।

यदपि—'अयुक्त सप्त शुन्ध्युव सूरो रथस्य नप्त्यः ।
ताभियाति स्वयुक्तिभि ॥ १ ॥
सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
शोचिष्केश विचक्षण ॥ २ ॥'
भद्रा अश्वा हरित सूर्यस्य चित्रा एतग्वा अनुमाद्यास ।
नमस्यन्तो दिव आ पृष्ठमस्थु परिद्यावापृथिवी यन्ति सद्य ॥ ३ ॥
सप्त स्वसार मणिसाय सूर्य वहन्ति हरितो रथ ॥ ४ ॥'
सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाऽधि तस्थु ॥
इम रथमधि ये सप्त तस्थु सप्त चक्रं सप्त वहन्त्यश्वा ।
सप्त स्वसारो अभि सचन्त यत्र गवां निर्णिजा सप्तनाम ॥
(१ । २२ । १६४ । २ ॥, ३ ॥)

इत्यतेषु मन्त्रेषु छन्दसामभित्वम् ।

तेऽनुमन्महिरस आदित्यान् । इ म्व ध य सप्त्या इम्व वक्ष्याम इति । छन्द सु इत्यनुमन् । यानियां त्रिष्टुभि जगत्यामिति तस्माच्छन्द सु सप्त्य आदित्यस्य आहि रसी प्रजा इम्व वहन्ति ।'

इति ब्राह्मणे छन्दसां सदनत्व व्याख्यायते तपामयमाशय —

सूर्यो हि दिवि गच्छन् त्रिंशत्युत्तरषट्शतिम दिवस पुन प्राक्तन स्थान मागच्छन् य पन्थानमाश्रयति सदयनमृत्त त्रिंशत्युत्तरषट्शतरहितं याम्योत्तरतश्च कोणेन त्रिभुज द्रष्टव्यम् । तदीययाम्यरेखासो दक्षिणतो द्वयन्तरेऽपरा रेखा तावद्दशाङ्किता ततोऽपि दक्षिणत अंशान्तरेऽन्या सप्त पञ्चांशान्तरेऽन्यान्या कार्या । एवमुत्तररेखाया उत्तरतोऽपि तिस्रो रेखा कार्या । सदित्यमष्टरेखाभि सप्तपथा सूर्यमार्ग । तत्र सर्यदक्षिणे पथि पञ्चदशमि पञ्चदशभिरंशैर्विभागे कृते चतु र्विंशतिर्विभागा उभयन्त सदृशास्तावदक्षरेयं गायत्री द्रष्टव्या ॥ १ ॥ तदुत्त रपथि च पादार्धोनत्रयोदशभिस्त्रयोदशभिरंशैरष्टाविंशतिर्विभागा स्युस्तत्रापि तावदक्षरा सेयमुष्णिक् संसिद्धा ॥ २ ॥ ततोऽप्युत्तरपथि सपादैकादशांश कृत्वा द्वात्रिंशद्वि भागात्मात्तावदक्षरा सेयमनुष्टुप् सिध्यति ॥ ३ ॥ अथ मध्यमपथि सूर्यबिम्बाधि ष्ठिते दशमिदशभिरंशैर्मादायां षट्त्रिंशद्विभागसिद्धौ तावदक्षरायां बृहत्या सिद्धि ॥ ४ ॥ एवं तदुत्तरपथि नवांश कृत्वा चत्वारिंशदक्षरायां पङ्क्ते ॥ ५ ॥ तदुत्त रस्थ पादोनपादेन सपादैकादशकलात्मकेन सहितैरष्टांशै कृत्वा चतुश्चत्वारिंश दक्षरायास्त्रिष्टुभ ॥ ६ ॥ तथा सर्वोत्तरपथि साधसप्तांश कृत्वा अष्टाचत्वारिंशदक्ष रायां जगत्याश्च संसिद्धिद्रष्टव्या ॥ ७ ॥ तथा हि न्यास—

१	२४	१५°		—गायत्री
२	२८	१२°५२'३०"	प्रतिभागे सार्धसप्तविंशत्युत्तरशतकलापचये	उष्णिक्
३	३२	११°१५'	प्रतिभागे सार्धसप्तनवतिकलापचये	अनुष्टुप्
४	३६	१०°	प्रतिभागे पञ्चसप्ततिकलापचये	वृहती
५	४०	९°	प्रतिभागे षष्टिकलापचये	पङ्क्ति·
६	४४	८°११'१५"	प्रतिभागे पादोनोनपञ्चाशत्कलापचये	त्रिष्टुप्
७	४८	७°३०'	प्रतिभागे सपादैकचत्वारिंशत्कलापचये	जगती

अस्मिश्च निर्दिष्टे संवत्सरचक्रे यद्यपि निर्देशलाघवाय एकस्मादेव स्थानादारब्धानि तानि सर्वाणि छन्दासि अथापि तेषामारम्भणीयस्थानानि देवताविशेषै प्रतिपत्तव्यानि। अग्नितारातो गायत्र्या (१), सवितृत उष्णिह (२), सोमादनुष्टुभ (३), वृहस्पतेश्च बृहत्या (४), वरुणात् पङ्क्ति (५), इन्द्रादेव त्रिष्टुभ· (६), अथ विश्वेभ्यो देवेभ्यो जगत्या (७) उपक्रमणात्। एतदभिप्रायेणैवैतेषां देवानाम्—

'अग्नेर्गायत्र्यभवत् सयुग्वोष्णिहया सविता संबभूव।
अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत्॥
विराण् मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुविह भागो अह्न ।
विश्वान् देवान् जगत्याविवेश तेन चाकॢप्र ऋषयो मनुष्या ॥'

इत्यस्मिन् मन्त्रे तत्तच्छन्दोभि सयुक्त्वं तत्तच्छन्दोऽधिष्ठातृत्वं च महर्षय आमनन्ति॥ तथैव जगदुपभोगाच्च।

एतेषामेव तत्तच्छन्द सयुजा देवानामंशुभिराप्यायितस्य सूर्यांशोस्तत्तदधिष्ठाने शुक्रसारङ्गादिरूपवत्त्वमुपदिश्यते। छन्द स्थितिनिदर्शनायामवगमसौकर्याय वा तदिदं यथायथमुपेक्ष्यम्॥

तथा च प्रकृते सूर्यप्रकाशात्मकस्य प्रजापतेर्बृहतीपदव्योपक्रममाणस्य बृहतीमुभयतोभागा रथोपकरणवत् सचारसाधनान्येव भवन्तीति यथेच्छं रथवद्यानत्वमश्ववद्वा वाहनत्वमत्रैव सर्वदावस्थानात्सदनत्वं चोपचर्यते। सूर्यप्रकाशस्य प्रजापतित्वं चैतरेयशतपथयोरामनायते—

'तदु तदिमाल्लोकान् समारुह्य अथैषा गतिरेषा प्रतिष्ठा य एष तपति। तस्य ये रश्मयस्ते सुकृतोऽथ यत्पर भा प्रजापतिर्वा स स्वर्गो वा लोक तदेवमिमाल्लोकान् समारुह्य अथैता गतिमेता प्रतिष्ठा गच्छति। तदेता गतिमेता प्रतिष्ठा गत्वा एतस्यैवावृतमन्वावर्तते।'

'असावादित्य एकविंश उत्तमा प्रतिष्ठा, तद्वैवं क्षत्रम्, सा श्री, तदाधिपत्यम्, तद् ब्रह्मस्य विष्टपम्, तत्प्रजापतेरायतनम्, तत्स्वाराज्यमृध्नोति॥' इति च॥

तत्रैतस्य विशिष्टस्य रथत्वाभ्युपपत्तौ तदपेक्षिते रथचक्रे यथेच्छं छन्दोमर्यादावृत्ताभिप्रायेण कदाचित्सप्तचक्रत्वम्, कदाचिच्च रथपार्श्वत्वसाधर्म्याद्गायत्रीजगत्यभिप्रायेण

द्विचक्रत्वम्, अथ कदाचित्पुन कालचक्रपरिवृत्त्यभिप्रायेणैकचक्रस्य च सप्त सप्त न्य
पिक्षन्ते ।

एष न्य भानुरुदियर्ति युज्यते रथ परि ज्मा दिवो अस्य सानवि ।
दर्मं रथमधि ये सप्त तस्थु सप्त चक्र सप्त पदन्त्यश्वा ।
सप्त स्वसारो अभिधनषन्त यत्र गवां निहिता सप्तनाम ।
इत्यादिषु सप्तचक्रत्वस्य,
तस्य गायत्री च जगती च पक्षावभवताम्'
इत्यादिषु द्विचक्रत्वस्य,
उद्वनि प्रवर्याता अनानां महान् कतुर्वरुण सूयस्य ।
समान चक्र परिविश्वतन् यदेनया महनि धृषु युज ॥
सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभिचक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधितस्थुः ॥
द्वादशारं नहि तज्जराय वर्वर्ति चक्र परिद्यामृतस्य ।
आ पुत्रा अग्न मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थु ॥
पञ्चार चक्र परियतमाने तस्मिन्नातस्थुभुवनानि विश्वा ।
तस्य नाक्षस्तप्यत भूरिभार सनाद्य न शीयते सनाभि ॥

इत्यवमादिष्वेकचक्रत्वस्य च प्रतिपादनात् । एवमेवाश्वस्याभ्युपपत्तावपि सप्ताश्वसं काश्वस्याभ्यां कल्पनाभेदोऽपि सुवचा संभवादुपपद्यते सिद्धो मार्गयक्ष इत्यादिमन्त्रगु वादतया तत्तात्पर्यविषयभूत वस्तुनि बाधादर्शनात् । निर्बाधत हि प्रवृत्ते रथाश्वादि शब्द रथाश्वादिगुणच्छन्दसि वस्तुभूत । स च व्याधिष्ठितत्वस्वव्यापारप्रयोजकव्यापा रवत्त्वेतदुभयसंबन्धेन व्यधिकरणं यत् तदिष्टप्रवृत्तिनिमित्तरूप । एतदेव हि रूपनाच्छन्दसो सयुक्तमित्यवधेयम् ॥

एतदभिप्रायेणैव ।

'एते वाव देवा प्रातर्यावाणो यदग्नियो अश्विनौ—त एते सप्तभि सप्तभिश्छन्दो भिरागच्छन्ति ।'

इत्येवमादय ब्राह्मणव्यवहारा सगच्छन्ते । तदित्थभूतस्य खल्वप्यस्य सप्त च्छन्दोम यरूपस्य सूयमार्गस्य

सार्धत्रिमण्डलात्त काष्ठयोरन्तरं द्वयो ।
आरोहणावरोहाभ्यां मानारब्देन या गति ॥
स रथोऽधिष्ठितो देवैरादित्यैरृषिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामणीसर्परक्षसै ॥

इत्येव विष्णुपुराणादिषु गतिप्राधान्येन रथस्वव्यवहारवदेव ऋक्सख्यमयत्वादग्निप्रा धान्ये यज्ञशब्दन, आदित्यप्राधान्ये प्रजापतिशब्देनाथ कालप्राधान्ये संवत्सरशब्देन च भूयसा वैदिकव्यवहारा दृश्यन्ते ।

अत एव—

'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमान सचन्त यत्र पूर्वे साध्या सन्ति देवा ॥'

इत्येतन्मन्त्रविवरणप्रक्रमे—

'यज्ञेन वै तद्देवा यज्ञमयजन्त, यदग्निना अग्निमयजन्त, ते स्वर्गं लोकमायन् । छन्दासि वै साध्या देवा तेऽग्रेऽग्निना अग्निमयजन्त ते स्वर्ग लोकमायन् ॥ आदित्याश्चैवेहासन्नङ्गिरसश्च । ते अग्रे अग्निमयजन्त, ते स्वर्गं लोकमायन् ॥'

इत्येवमुक्तमैतरेयके ।

अत एव च—

'त्रीणि च शतानि षष्टिश्चानूच्यानि यज्ञकामस्य, त्रीणि च वै शतानि षष्टिश्च सवत्सरस्याहानि तावान् सवत्सर , सवत्सर प्रजापति प्रजापतिर्यज्ञ ॥' इत्यादि श्रूयते ।

एतदभिप्रायेणैव चैतेषा छन्दसामग्ने प्रजापतेश्च तनुत्वमपि तत्र तत्रोपचर्यते ।

तथा हि

'विष्णुमुखा वै देवाश्छन्दोभिरिमाल्लोकाननपजय्यमभ्यजयन् । यद्विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमाल्लोकाननपजय्यमभिजयति ।'

इत्येवं विष्णुक्रमपरिक्रमणविधौ—

"अथावर्तते—"सूर्यस्यावृतमन्वावर्त इति । एवमिमॉल्लोकान् समारुह्य, अथैषा गतिरेषा प्रतिष्ठा—य एष तपति, तस्य ये रश्मयस्ते सुकृतोऽथ यत्परं भा प्रजापतिर्वा स स्वर्गो वा लोक , तदेवमिमॉल्लोकान् समारुह्य, अथैता गतिमेतां प्रतिष्ठा गच्छति, तदेता गतिमेता प्रतिष्ठा गत्वा एतस्यैवावृतमन्वावर्तते ।"

इति माध्यन्दिना आहु ॥

तैत्तिरीया अप्येवं—

"ऐन्द्रीमावृतमन्वावर्तते—इत्याह । असौ वा आदित्य इन्द्र । तस्यैवावृतमनु पर्यावर्तते । तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवावृतमनु पर्यावर्तते ।"

इत्युक्त्वा,

"चतसृभिरावर्तते—चत्वारि च्छन्दासि । छन्दासि खलु वा अग्ने प्रिया तनू. प्रियामेवास्य तनुवमभिपर्यावर्तते ।"

इत्याद्यामनन्ति सप्त छन्दासि क्रतुमेकं तन्वन्तीत्याद्या स्मृतयश्चैतदर्थपरा द्रष्टव्या । एवं हि भूयासो याज्ञिकाना यज्ञानुबन्धिनो व्यवहारा एतदेव छन्दोमयमण्डलमनुसृत्य प्रवर्तमाना सन्तीति तत्र तत्रान्वीक्षितव्यम् ॥

एवमेवादित्यप्राधान्यात् प्रजापतिशब्देन व्यवहारे प्रवर्तमाने मुख्यमादित्यबिम्बं तदुपलक्षितरेखा वोभयतो दश दश रेखा आक्रम्य कृतशरीरस्यैकविंशस्य प्रजापतिपुरुषस्य याम्यसौम्यभेदेन द्वैधे प्रतिपन्ने—

'ता उत्तरेणाहवनीयं प्रणयति । योषा वा आपो गृह्णामि । मिथुनमेवैतत्प्रजनन क्रियते । एवमिव हि मिथुन स्रुक्सम् । उत्तरतो हि स्त्री पुमांसमतिशेते ।'

इति शतपथोक्तयोषाशब्दपन्यासेन सौम्याया अपां दिशो योषात्वं याम्याया अग्नि दाय गृह्यस्य प्रतिपद्य तत्रांशानुरोधिदक्षरेखाभिप्रायेण विराट्स्थमाम्यातं दृश्यते श्रुति स्मृत्यादिषु । तथा च विधुयदह —संस्थानाभिप्रायेण तावत्—

'यथा वै पुरुष एव विधुवान् । तस्य यथा दक्षिणोऽध एव पूर्वोऽर्धो विधुवत । यथोत्तरोऽध , एवमुत्तरोऽर्धो विधुवत । तस्मादुत्तर इत्याचक्षते । प्रजापतिरु सन् एव विधुवान् । विदऊसहित एव वै पुरुष । तदापि स्त्रीमेव मध्ये पत्नीं विज्ञायते ।'

इत्युक्तमैतरेयके ।

तैत्तिरीयकेऽपि—

"एकविंश एष भवति । एतेन वै दवा एकविंशेनादित्यमित उत्तम सुवर्गं लोकमा रोहयन् । स वा एष इत एकविंशः । तस्य दशापरस्मादहानि दश परस्तात् । स वा एष विराज्युभयत प्रतिष्ठित । विराजि हि वा एष उभयत प्रतिष्ठित । तस्मादन्तरेमौ स्रेका यन् सर्वेषु सुवर्गेषु स्रोकेष्वभिसपद्येति"

इत्युक्त्वा,

देवा वा आदित्यस्य सुवर्गस्य लोकस्य परांचोऽतिपातादबिभयु । तं छन्दोभिरर्द इन् घृत्वै । देवा वा आदित्यस्य सुवर्गस्य स्रोकस्यायांचोऽपपातादबिभयु । त पञ्चमी रश्मिमिरुदयच्छन् ॥' इत्यापास्तायत ॥

'सहस्रशीषा पुरुष सहस्राक्ष सहस्रपात् ।
स भूमिं सर्वत स्पृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥'
'ततो विराडजायत विराजाऽधिपूरुष ।
स जातोऽत्यरिच्यत पश्माद्भूमिमथो पुरः ॥'

इत्येषमादयो मन्त्रवर्णा अप्यसुमर्षं दृढयन्ति । स्मर्यते चायमर्थो मन्वादिभिरपि—

'द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत् ।
अर्धेन नारी तस्यां स विराजमसृजत् प्रभु ॥'

इत्यादिना ।

तत्रेत्थ तावदंशानां दशकस्य दशकस्यैकमक्षरत्वमभिप्रेत्य गृहतीत्वमाख्यातम् । अन्यत्र पुन' इयं वै मा अन्तरिक्षं प्रमा, असौ प्रतिमा द्यौर्द्वादशी द्वादशाभिता पड-वधाति । तत् षट्त्रिंशत् । षट्त्रिंदक्षरा बृहती' इत्येषमाचक्षाणेन पौर्णमास्यष्टकामावा स्यानां देवानामेवाक्षरत्वमभिप्रेत्य गृहतीत्व संपाद्यते । एवं द्वादशाहस्तुतौ—

'तदाहु—यदन्यानि च्छन्दांसि वयींसि भूयोऽक्षरवराणि अथ कस्मादेतां गृह तीमाचक्षते इति । एतया हि देवा इमाँल्लोकानाप्नुवत । ते वै दशभिरेवाक्षरैरिमं लोक

माश्नुवत, दशभिरन्तरिक्षम्, दशभिर्दिवम्, चतुर्भिश्चतस्रो दिग , द्वाभ्यामेवास्मिँल्लोके प्रत्यतिष्ठन् । तस्मादेता वृहतीत्याचक्षते ।"

इत्यैतरेयश्रुत्या सवत्सरवलयात्मकवृहतीव्याप्यैकपदा—विराजोऽक्षरत्वमाख्यायते । विराजोऽपि भूयस्य क्लृप्तयो भवन्ति । तैत्तिरीयके तावत्—

"नव प्रयाजा इज्यन्ते नवानुयाजा , अष्टौ हवींपि, द्वावाघारौ, द्वावाज्यभागौ । त्रिंशत्सपद्यन्ते । त्रिंशदक्षरा विराट् ।"

इत्येवं प्रयाजादीनामक्षरत्वमाह ।

मैत्रायणीयकेऽप्येवम्—

'प्राणेभ्यो वै ता प्रजा प्राजायन्त । प्राणा वा एतानि नव हवींषि । नव हि प्राणा । आत्मा देवता । तत प्रजायते । नव प्रयाजा , नवानुयाजा , द्वा आज्य-भागा, अष्टौ हवीषि, अग्नये समवद्यति । वाजिनो यजति । तत्रिंशत् । त्रिंगदक्षरा विराट् । विराज्येव प्रतितिष्ठति । विराजो वै योने प्रजापति प्रजा असृजत । विराजो वा एतद्योनेर्यजमान प्रजायते । त्रिंशत् । त्रिंशद्वै रात्रयो मास । यो मास स सव-त्सर । सवत्सरः प्रजापति । तत्प्रजापतेश्च वाए तद्विराजश्च योनेर्मिथुनाद् यजमान प्रजायते'—

इति प्रयाजादीनामिव त्रिंशद्रात्रीणा विराडक्षरत्वमुच्यते ।

अथ माध्यन्दिनीयके—

'शूर्पं चाग्निहोत्रहवणीं च, स्फ्यं च कपालानि च शम्या च कृष्णाजिनं च, उलूखल-मुसले, दृषदुपले । तद्दश, दशाक्षरा विराट् । विराड् वै यज्ञ ।'—

इति शूर्पादीनामक्षरत्वमुक्तम् ।

ऐतरेयके च—

'यदु गायत्री च, पङ्क्तिश्च—ते द्वे अनुष्टुभौ । यदुष्णिक् च, वृहती च—ते द्वे अनुष्टुभौ । यदु द्विपदा च विंशत्यक्षरा, त्रिष्टुप् च, ते द्वे अनुष्टुभौ । यदु द्विपदा च षोडशाक्षरा, जगती च—ते द्वे अनुष्टुभौ ॥'

इत्येवं कृत्वा द्वयोर्द्वयोरनुष्टुपत्वम्, तथा अनुष्टुप्पङ्क्त्योरुष्णिक्त्रिष्टुभोर्गायत्रीजगत्योश्च वृहतीत्वमिति विजातीयच्छन्दोद्वयाक्षराणा सजातीयछन्दोद्वयाक्षरत्वमाख्यायते । तदेतदेवमन्यत्रान्यत्र भूयसा तत्तच्छन्द स्वरूपनिर्वचनपरतत्तच्छ्रौतवचनपरिशीलनया चत्वारोऽर्था निष्कृष्य सिध्यन्ति—

(१) छन्द स्वरूपनिरूपकतयाभिप्रेतस्य यथेष्टसमुदायावयवता गतस्य यस्य क-स्यापि द्रव्यजातस्य गुणजातस्य वा छन्द परिभाषायामक्षरसज्ञा । इत्येक ॥

(२) क—तादृशैश्चाक्षराख्यैर्द्रव्यगुणैश्चतुर्विंशतिसख्यापूरणे च सा मर्यादा गायत्री, अष्टाविंशतिसख्यापूरणे च सा मर्यादा उष्णिगित्येवं चतुरुत्तराणि तानि तानि छन्दासि वेदितव्यानि । उत्तरोत्तरमेकैकाक्षरवर्धितपादत्वात् ॥

(२) स—पादप्राधान्येन चाक्षरैः कृता मयादा गायत्री, दशभिर्विराट्, एकादशभिस्त्रिष्टुप् द्वादशभिर्जगतीत्यपीच्छन्तीति द्वितीय ॥

(३) एव पद्यायमुक्तिकाम्या शिल्पाद्युपयोगिनी मितिरुच्छन्द इति तृतीय ।

(४) मितेरपि न मितिरूपेण रूपेण छन्दस्त्वमपि तु कारणतापच्छितस्वरूपविशेषज नफलावच्छेदकत्वेनति चतुर्थं ।

एतमेव निष्कर्षमनुसृत्य लौकिका, वैदिका याज्ञिका आर्षिकाश्च सर्वे छन्दाभ्यय द्वारा यथायथ प्रयतमाना सन्तीति तत्र तत्रोपलभ्यम् ॥ तदित्थमार्षिकेषु छन्दोभ्यवहा रेषु छन्दःप्रतिष्ठातत्त्व वैशद्येन प्रदर्शित भवति ॥

याज्ञिकेष्वपि छन्द स्वर्णसामिवाक्षरसाम्येनाणानामपि नियतसंख्याविच्छिन्नो सवधोपवेशाम्भो गायत्र्यादिछन्दोविशेषस्यस्योपलब्धस्तत्तद्यज्ञोपवेशाधिष्ठानस्य प्रस्ता रादिक्रियामिनेयस्यामूर्तस्य छन्द प्रतिष्ठात्वमवतिष्ठते । सा च मात्रासंख्याप्रधाना अक्षरसंख्याप्रधाना, नियतमात्राक्षरस्थानप्रधाना चेति त्रिविधाप्यनिरुक्तपूर्वमूषा गायत्र्यादिशब्दैरुक्ष्यते । तस्माच्छन्दांसि धर्मा । अक्षरेषु चयमनुगतेति स्मरता तस्याश्छन्द-प्रतिष्ठाया महत्त्वम् । तस्माच्छन्दस्त्वपरिज्ञानेन सर्वमिद विज्ञात भवतीति विज्ञेयम् ।

अथान्य प्रत्यवतिष्ठते—

थोन्नियश्छन्दोऽधीते ॥ पाणिनि सू ५ । २ । ८४ ॥

'बहुल छन्दसि ॥' २ । ४ । ३९ ॥ इत्येवमादिभि सूत्रजातेषु

'युक्तश्छन्दोभ्यधीयीत मासान् विप्रोऽधिपद्यमान् ।'

'कामारमकादछन्दसि कर्मयोगा एभिर्विमुक्त परमश्नुवीत ।'

इत्येवमादिभि स्मृतिजातेषु

'आसीन्महीक्षितामाद्य प्रणवश्छन्दसामिव ।

इत्येवमादिभि काव्यजातेषु एवमन्यत्रान्यत्र च वेदविषयतया छन्द शब्द प्रयु ज्यते । अनन्ताश्च वेदा भूयन्ते'—इत्यनवच्छिन्नस्येऽवच्छेदत्वानुपपत्त्या सिद्धमति रिक्तवृत्तिकत्वं छन्द शब्दस्य इति चेत् । अत्रोच्यते—पद्यगद्यगेयात्मकैर्विविधैर्वा क्षरिकच्छन्दोभिरेव सर्वस्य वेदस्य छन्दनात्तद्वेदादेव च भेदेन तत्प्रतिपत्तेस्तात्स्थ्यात्ताच्छ ब्द्यन्यायेन तत्र तदुपचार इष्यते । किं च पृथिव्यादिलोकानामग्न्यादिदेवानां च तत्त च्छन्दश्छन्दितानामेव स्वरूपलाभात् कार्यकारित्वव्यवस्थापनायेह यावापृथिवीधर्मनि रूपणे यज्ञवेदे भूयसा छन्दसामाम्नानाच्छन्दःप्राधान्याच्छन्द शब्दोपचार इष्यते ।

उक्त च सर्वेषां कार्यजातानामाधारभूतं प्राकृत छन्दो ब्रह्मास्यम् । तदनुगतधर्म प्रतिपादनपरो ग्रन्थश्छन्द उच्यते इति युक्तम् । सांख्यन्यायवेदान्तादिधर्मप्रतिपादनप-

ऱेषु ग्रन्थेषु साख्यादिशब्दवत्। तथा च गौणवृत्त्या क्वचिदन्यत्र प्रयोगेऽपि मुख्यवृत्त्या-वच्छेद एव छन्द इति संसिद्धम् ॥

अथ छन्दोवादः।

ननु किमिदं वाक्छन्द इति जिज्ञासाया गतियत्यन्वपरिच्छित्त्यतिरेकेण छन्द स्वरूपं निरूप्यते तन्नावकल्पते। गतियत्यन्वपरिच्छित्तिच्छन्दसामनर्थान्तरत्वात्। न च वृत्ति-र्लयो ध्वनिरिति गतेस्त्रयो भेदा, अवसायो विच्छेदो विरतिर्यतिरणुयतिरिति यते पञ्च भेदा, लिप्यध्वपरिच्छित्तिर्गत्यध्वपरिच्छित्तिरित्यन्वयोगस्य द्वौ भेदौ, वर्णच्छन्दो गण-च्छन्दो मात्राच्छन्दश्चेति छन्दसस्त्रयो भेदा,—इतीत्थमेषा चतुर्णां नितान्तवैषम्यं प्रतिपद्यत इति वाच्यम्। आपाततस्तेषा भेदकल्पनायामपि वस्तुत स्वरूपानतिरेकात्। तथा हि—गतिस्त्रैविध्ये वृत्तिध्वन्योर्वर्णवेदीयपदार्थत्वाच्छन्दसश्च वर्णोपलक्षितत्वेऽपि वर्णानात्मकत्वात्तत्र यद्यपि वृत्तिध्वन्योरप्रवेश प्रतिपद्यते। अथाप्येष लय खलु यति-तारतम्यनिवन्धनो न यतेरतिरिच्यते। अयमेव तु लयो गत्यध्वपरिच्छित्तिशब्दान्त-रेणाप्याख्यायते। नयोर्विवेकानुपलम्भात्। मसजसततगेषु हि वर्णैरभिनीयमानेषू-च्चारयितुरुच्चारणसामञ्जस्यमनुभूयते। जसयो स्थाने तभयो संनिवेशे त्ववश्यमुच्चा-रणक्लिष्टता भवति। तत्र चायं द्वितीय सगणोऽवष्टम्भी विष्टम्भमजानताप्यभिनीय-मानः स्वयमवष्टम्भमुपस्थापयति स्वान्ते। तदिदमवष्टम्भित्वं तत्र केन रूपेण—द्वादशाक्षरत्वेन वा, शार्दूलविक्रीडितसंवन्धित्वेन वा, तथाविधसत्त्वेन वा गणतुरी-यत्वविशिष्टसत्त्वेन वा, मगणोत्तरत्वविशिष्टसगणोत्तरत्वविशिष्टजगणोत्तरत्वविशिष्टसत्त्वेन वा ?। नाद्य —मरभनययेषु नगणघटकस्य द्वादशाक्षरत्वेऽप्यवष्टम्भानपेक्षणात्। न द्वितीय —तत्र मगणजगणादीना विष्टम्भनिरपेक्षत्वात्। न तृतीय —तत्रैव द्वितीय-सगणस्यानवष्टम्भित्वात्। न तुरीय —सजससगेषु तुरीयस्यापि तस्य तदनपेक्षणात्। तस्मान्मसजोत्तरसगणघटकत्वेनैव रूपेण तस्य द्वादशाक्षरस्यावष्टम्भित्वं वाच्यम्। तथा च मस्य सगणाव्यवहितपूर्ववृत्तित्वेनावस्थान सस्य मगणोत्तरवृत्तित्वजगणपूर्ववर्तित्वाभ्या जस्य च सगणद्वयमध्यवर्तित्वेन, सस्य पुनर्जगणोत्तरवर्तित्वतगणप्रागवर्तित्वाभ्यां चेत्ये-वमवस्थानक्रम एवाध्वपरिच्छित्ति स्यात्। तत क्रमात्प्रच्यवमानानां तेषामुच्चारणे क्लिष्टतानुभवात्। अथेत्थं पौर्वापर्येणोच्चारणमेवैषा लयगतिविशेष स्यात्। निर्दिष्ट-रीत्या तेनैव रूपेणावष्टम्भसापेक्षत्वात्। अवष्टम्भापेक्षाप्रयोजकत्वाप्रयोजकत्वाभ्यामेव च लयगतिप्रत्यवमर्शात्। तदिद पौर्वापर्यं च मसजसाना प्रत्येकस्य क्रमिकावस्थान-लक्षणान्नातिरिच्यते—इति लयगतेरनतिरिक्ताध्वपरिच्छित्ति.। यतश्च मसजोत्तरस-घटकत्वेन यतिमत्त्वं दृश्यते ततो यतिमत्त्वव्याप्यतया मसजोत्तरसघटकत्वरूपाया लय-गतेरध्वपरिच्छित्तेर्वा यद्यप्यर्थान्तरत्वमापातत प्रतिभाति, अथाप्यवष्टम्भप्रयोजक-त्वाप्रयोजकत्वोपलक्षितपौर्वापर्यस्यैव गतिरूपत्वप्रतिपत्त्या अन्वयव्यतिरेकाभ्यामस्या-

षट्मस्य गतिस्वरूपसंपादकतया च गतिग्रहणे लक्षणसमन्वय । तस्मादार्या गति यतिपरिच्छित्तीनां नैकान्ततोऽवान्तरत्वमुपकुर्मामहे—इति सिद्धमार्यामेकाक्ष्यम्॥एवमेवापष्टम्भप्रयोजकत्वाप्रयोजकत्वोपलक्षितपौर्वापर्येणावस्थितानां मगणादिगणानामेव छन्दस्त्वादस्य छन्दसो यद्यप्यवान्तरत्वमापातत प्रतिभाति अथापि 'स राजा यज्ञस्त' स पाचको जात 'स नेदानीं कुण्डली न दण्डी' इत्यादिषु विधिनिषेधयोर्विशेष्यस्य दिष्टयोरपि विशेषणमात्रविधान्तिवदिहापि लाघवा मगणादिगणसमवेतस्य तत्पौर्वापर्यस्यैव छन्दस्त्वसिद्धा छन्दसो गतियतिपरिच्छित्यनतिरिक्तस्व फलतीत्यलं छन्दसोऽवान्तरत्वपरिष्कारेण, इति चेद्—उच्यते—मगणोत्तरत्वगणचरमाक्षरयोरत्वावच्छेदेन गुरुताव्यवहितपूर्वत्वावच्छेदेन च वर्तमानोऽयमपष्टम्भस्वाक्षर गतिन चाप्यपरिच्छित्तिन वा छन्द । गत्यादीनामपष्टम्भपदेशविशेषे नियतत्वाभावात् ॥ १ ॥ अथ गतिस्वाक्षरापष्टम्भ । अपष्टम्भप्रयोजकत्वोपलक्षितपौर्वापर्यस्य गतिरूपतया तस्य गतिरूपसंपादकत्वेऽपि तत्त्वासंभवात् ॥ न चाप्यपरिच्छित्तिः गतेर्हि स्वभावात् प्रच्यवमानाया हि दृष्टस्व पुरुषत्वमनुभूयते । यतश्च तस्या सौकर्ये सौन्दर्ये वा सिध्यति साप्यपरिच्छित्तिरिति गत्यवयवसन्निवेशविशेषरूपायास्तस्या गतित्वासंभवात् । यथा स्थूलत्वकृशत्वसाम्येनानुस्वारचक्षीर्षपादादिसाम्येन स्निग्धसाम्येन च वर्णादिलिपीनां सौन्दर्ये वाचनसौकर्ये चानुभूयते तदभावेन च बालकादिलिपीनां पुरुषस्य वाचन क्लिष्टत्वं च । तथा च तत्र लिप्यप्यपरिच्छित्तेर्लिप्यतिरिक्तत्वमदिहापि गत्यप्यपरिच्छित्तेगत्यतिरिक्तत्वं सुवचमिति द्रष्टव्यम् ॥ न वा छन्द—विलक्षणगणपौर्वापर्यनियन्धनायो गतौ मात्राव्यवस्थानियन्धनच्छन्दस्त्वासंभवात् ॥ २ ॥ अथेयमप्यपरिच्छित्तिर्नापष्टम्भो न वा गति । विशेषस्य संसाधितत्वात् । न वा छन्दः—गत्यवयवसन्निवेशविशेषरूपायामप्यपरिच्छित्तौ मात्राव्यवस्थानियन्धनच्छन्दस्त्वस्याप्यसप्राप्ते ॥ ३ ॥ अत एव चेद छन्दो गतियतिपरिच्छित्तिभ्योऽतिरिच्य प्रतिपद्यते—इतीत्थमेवावान्तरत्व संसिद्धम् ॥ अत एव न वृत्तदोषात् पृथग् यतिदोषो वृत्तस्य यत्स्वात्मकत्वादिति पूर्वपक्षीकृत्य—न लक्षणस्य पृथक्त्वादिति समाहितं वामनेन काव्यालङ्कारसूत्रेषु। यत्तु केचिदन्येषामर्वान्तरत्वेऽपि छन्दोगत्योरैकार्म्यमेवाभ्युपगच्छन्ति तदसत् । गते रछन्दोधर्मिकत्वसंभवेऽपि छन्दस्त्वासंभवादित्यलम् ॥

इति छन्दसोऽवान्तरतावाद ।

अथ छन्दोविभक्तिवाद—

अथेद छन्द पञ्चधा—अनादिष्टच्छन्द बृहच्छन्द अतिच्छन्द कृतिच्छन्द, प्रकृतिच्छन्दश्चेति भेदात् । तत्र पञ्चानादिष्टच्छन्दांसि—उष्णमत्युष्णं मध्यं प्रतिष्ठा सुप्रतिष्ठा चेति । अथ सप्त बृहच्छन्दांसि—गायत्री उष्णिक् अनुष्टुप् बृहती, पङ्क्ति, त्रिष्टुप्, जगती चेति । तथा सप्तातिच्छन्दांसि—अतिजगती, शक्करी, अतिशक्करी,

अष्टि , अत्यष्टि , धृति , अतिधृतिरिति । एवं सप्तैव कृतिच्छन्दासि—कृति , प्रकृति , आकृति , विकृति , सकृति , अभिकृति , उत्कृतिश्चेति भेदात् । अथात्त ऊर्ध्वं प्रचितिच्छन्दस्तन्न संख्यायते । नन्वेतद्बृहच्छन्दोभिप्रायेण सप्तैव छन्दासि भवन्तीति भूयसा श्रूयते तत्कथमेतावान् प्रपञ्चश्छन्दसामाख्यायते । उच्यते । षोडशीप्रक्रमे—'छन्दसा यो रसोऽत्यक्षरत्—सोऽतिच्छन्दसमभ्यक्षरत् । तदतिच्छन्दसोऽतिच्छन्दस्त्वम् । सर्वेभ्यो वा एष छन्दोभ्य सनिर्मितो यत् षोडशी' इत्यान्नायते । तत्र छन्दसां रसश्चतुरक्षररूप । 'चतुरक्षराण्येव छन्दास्यासन् ।' इति छन्दोव्यूहनश्रुत्युक्तेः । तथा हि छन्दोव्यूहने तावत् चतुरक्षरा गायत्री त्रिष्टुव् जगती च । तत्र जगत्यास्त्रीण्यक्षराणि, त्रिष्टुभ एकमक्षर च समादाय गायत्री तावदष्टाक्षरा क्रियते । इत्थं कृते अष्टाक्षरा गायत्री, त्र्यक्षरा त्रिष्टुप्, एकाक्षरा जगती सिद्धा । अथैवंरूपा गायत्री स्वयं सयुज्य त्रिष्टुभं सपादयति सा त्रिष्टुवेकादशाक्षरा संपद्यते । एवं संपन्ना च त्रिष्टुप् स्वय संयुज्य जगतीं संपादयति सा जगती द्वादशाक्षरा संपद्यते । गायत्री, त्रिष्टुप्, जगती चेति त्रीण्येव छन्दांसि सर्वाणि छन्दासि भवन्ति गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्याख्यानि । तत्रानुष्टुप्पङ्क्ती, उष्णिक्त्रिष्टुभौ, गायत्रीजगत्यौ, चेत्येवं द्वे द्वे संयुज्य द्वे द्वे बृहत्यौ संपादयत—इत्येतेषा बृहतीरूपतया बृहच्छन्द शब्देनाख्यानम् । तथा च श्रूयते—'बृहती वै छन्दसा स्वाराज्यमानशे' इति । तदित्थं छन्द सिद्धौ तस्यैव चतुरक्षररूपस्य रसस्य जगत्यामत्याधाने षोडशाक्षर भवति । तदत्याधानादतिच्छन्द इत्युच्यते । अथ पञ्चदशीसप्तदश्यौ, चतुर्दश्यष्टादश्यौ, त्रयोदश्यूनविंश्यौ, चेत्येवं द्वे द्वे संयुज्य द्वे द्वे षोडश्यौ संपादयत—इत्येतेषामतिच्छन्दोरूपतया अतिच्छन्द शब्देनाख्यानम् । एवमूनविंशत्युत्तर पुनश्चतुरक्षरावाने त्रयोविंशत्यक्षर भवति । तत्र कृतिशब्द । तत्क्रियोत्तर तज्जातीयक्रियान्तरसंनियोगे कृतिशब्दो दृष्टो वर्गवत् तथा चेहापि द्वाविंशीचतुर्विंश्यौ, एकविंशीपञ्चविंश्यौ, विंशीषड्विंश्यौ चेत्येवं द्वे द्वे संयुज्य द्वे द्वे त्रयोविंश्यौ संपादयत इति कृतिच्छन्दोरूपतया कृतिच्छन्द शब्देनाख्यायन्ते । तदित्थ सति कृतिच्छन्दसामतिधृतावतिच्छन्दसा च जगत्यामन्तर्भाव सुवच । प्रचितिच्छन्दासि तु छन्द समुच्चयरूपाणीति नातिरिच्यन्ते । अथानादिष्टच्छन्दसा गायत्र्यामन्तर्भाव । भुरिग्दैव्या चतुरक्षरवृज्या याजुष्या , तत्र स्वराजि चतुरक्षरवृज्या साम्न्या , तत्र स्वराजि चतुरक्षरवृज्या आर्च्या , तत्र स्वराजि चतुरक्षरवृज्या आर्ष्या स्वरूपाधानात् । तदुक्तम्—

'उक्तादिपञ्चकं कैश्चिद्गायत्रीस्येव कथ्यते ।
यथा ह्यतिजगत्यादि त्वतिच्छन्द प्रवर्ण्यते ॥' इति ।

तथा चातिजगत्यादीना जगत्याम्, उक्तादीना तु गायत्र्यामन्तर्भावसभवात् सप्तैव छन्दासीति याज्ञिकानामभिमान । तदिदं छन्द पुनर्द्वेधा—मात्राछन्दो वृत्तच्छन्दश्च । तत्र मात्राछन्दांस्युक्तानि गायत्र्यादीनि सप्तैव । तानि जातिभेदेन पृथग्

व्यपदिश्यन्ते । अथ मात्राछन्दसां गायत्र्यादीनामेककेऽवान्तरविशेषा वृत्तच्छन्दांसि । तानि वृत्तिभेदेन पृथग् व्यपदिश्यन्ते । यथा मनुष्यविभाजिकायतस्रो ब्राह्मणादिजातय ब्राह्मणादिविभाजिकासु सप्तब्राह्मणादिगता अवान्तरविशेषरूपा वृत्तय इत्येवमाधुनमिति याज्ञिकानां प्राचामनुसारेण व्याख्यातम् । नव्यास्तु छान्दसिका पुनरन्यथान्यथा विभज्य व्याचक्षते ।

(१) तत्र पद्यजातं द्वेधा—वृत्त जातिश्च । यत्र नियतवर्णव्यवस्थया छन्द सिद्धिस्तद् वृत्तम् । यत्र तु नियतमात्राव्यवस्थया छन्द सिद्धि सा जाति । तथा चाह नारायण —

'पद्यं चतुष्पदी तत्र वृत्त जातिरिति द्विधा ।
वृत्तमक्षरसंख्यात जातिर्मात्राकृता भवेत् ॥'

हलायुधोऽप्याह—

'पद्यं चतुष्पद तत्र वृत्त जातिरिति द्विधा ।
एकदेशस्थिता जातिर्वृत्त सर्वगुरुस्थितम् ॥

(२) परे तु वृत्तिजातिरिति द्वेधा विभज्य तयोरुभयोरेव वृत्तशब्देन छन्द शब्देन च सामान्यतो व्यपदेशमिच्छन्ति । वर्णवृत्त वर्णच्छन्द, मात्रावृत्तं मात्राच्छन्द इति । तथा चैषां मते छन्दोवृत्तशब्दयो पर्यायत्वम् ।

(३) छन्द परिभाषकारस्तु तयो पर्यायार्थस्य प्रत्याख्याय— मात्राक्षरसंख्यया नियता वाक् छन्द गणसमवेतस्वरूपेण नियता वाग् वृत्तम् । इत्येवं व्यवस्थापयति । तथा च तन्मते—

'उक्तात्युक्ता तथा मध्या प्रतिष्ठा सुप्रतिष्ठिका ।
गायत्र्युष्णिगनुष्टुप् च बृहतीपङ्क्तित्रिष्टुभ ॥
जगती चातिजगती शक्वरी चातिशक्वरी ।
अष्टयष्टी धृति सांति कृति प्रकृतिराकृति ॥
विकृति संकृतिर्थातिकृतिरुत्कृतिर्दण्डका ।
एतानि वर्णच्छन्दांसि तद्भेदानां तु वृत्तता ॥
एवमेव मठादीनां मात्राच्छन्दस्त्वमिष्यते ।
तद्वान्तरभेदानां जातित्वमिति सिद्धति ॥'

(४) अपरे तु पुनरन्यथा विभज्य व्याचक्षते । तथा हि—पद्यच्छन्दस्त्रावधेधा— वैदिकं च लौकिक च उभयसाधारण च । तत्र लौकिक पुनर्द्वेधा—गणच्छन्द, मात्राच्छन्द अक्षरच्छन्दश्चेति । तथा चोक्तम्—

'आदौ तावद्गणच्छन्दो मात्राच्छन्दस्तत परम् ।
तृतीयमक्षरच्छन्दश्छन्दोभेधा तु लौकिकम् ॥
आर्याद्युद्गीतिपर्यन्त गणच्छन्द समीरितम् ।
मात्राच्छन्दश्चूलिकान्तमापच्छन्दस्तिकादिकम् ॥
समान्यापुत्कृति यावदक्षरच्छन्द एव च ॥ इति ।

१) पर तु पद्यच्छन्दश्चतुर्वा—अक्षरच्छन्द , मात्राच्छन्द , अक्षरगणच्छन्द ,
णच्छन्दश्चेति भेदात् । यत्र मात्राणा न्यूनातिरेकेऽप्यक्षरसख्यानं तत्र तदक्षर-
। यथा वेदे वहुलं प्रयुक्तं गायत्रीत्रिष्टुव्जगत्यादि । यत्राक्षराणा न्यूनातिरेकेऽ-
त्रासख्यानं तत्र तन्मात्राछन्द —यथौपच्छन्दसिकवैतालीयादिकम् । यत्र पुन-
णानां क्रमसनिविष्टाना व्यवस्थया स्वरूपसिद्धिस्तत्राक्षराणा गुरुलघुस्थानाना च
त्वादक्षरगणच्छन्दस्त्वेन व्यवहार । यथेन्द्रवज्रास्रग्धरावसन्ततिलकामन्दाक्रा-
। अथ यत्र मात्रागणाना क्रमसंनिविष्टना व्यवस्थया छन्द सिद्धिस्तत्राक्षरनिय-
वान्मात्रागणच्छन्दस्त्वेन व्यवहार । यथा आर्यादोहाकुण्डलिकादि—इत्येवं
न्त । अर्थजातेष्वप्याकागवाग्वादिष्वेषामेव चतुर्णां छन्दसा भेदान्नानाविध्यम् ।
एवैक एव भावो द्रव्यगुणकर्मरूपैस्तेजोऽवन्नरूपैस्तदवान्तरानेकरूपैर्वा भेदेन समु-
नानात्वं प्रतिपद्यते । तदेतदेषा विभिन्नछन्दस्कानामर्थजाताना छन्दोनिवन्धन
तरेक इति यज्ञस्वरूपनिरूपणप्रकरणे वेदसमीक्षाया वैशद्येन प्रदर्शितम् ॥

दित्थं कंचिद्विशेषमाश्रित्य त्रेधा चतुर्धा वा विभक्तानामप्येषा मात्रागणव्यवस्थानि-
षु गणवृत्तेषु वर्णव्यवस्थासामान्याद्वर्णवृत्तानतिरेकं पश्यन्ति दीर्घदर्शिन ॥
व सिद्धम्—वृत्तशब्देन व्यपदेश्यं वर्णवृत्तमेकम्, जातिशब्देन व्यपदेश्यं तु मात्रावृ-
रमितीत्थं द्वेधा पद्यच्छन्दो भवतीति ॥

त्र यद्यपि मात्रानियताक्षरव्यूह एव छन्द इत्युच्यते—यद्यपि च मात्राप्रस्तार-
ाणा वर्णप्रस्तारेषु वर्णप्रस्तारस्वरूपाणा च मात्राप्रस्तारेषु यथायथमन्तर्भावो दृश्यते ।
एव तु द्वासप्ततिमात्राप्रस्तारस्वरूपविशेषात्मिकाया अष्टादशमात्राप्रस्तारस्वरूपविशे-
ाकाया वेन्द्रवज्राया मात्रावृत्तत्वमनभ्युपगम्य यथा वर्णवृत्ततयाभ्युपपत्तिर्दृश्यते न
'खिं खिं खिं खाग प्रमोदा' इति लक्षिताया , प्रमोदाया , 'डुजं डुजं डुजं डुकः
ा' इति लक्षितप्रमदाजातिवहिर्भावेनाभ्युपगम क्रियते । ततो वर्णवृत्तमात्रावृत्तेति-
रणमापाततो निर्मूलं प्रतिभाति । अथापि पिण्डापेक्षोपेक्षानियमद्वैविध्याद् वर्णवृत्त-
त्रावृत्तत्वाभ्या विभज्य तद्व्याख्यायते । तस्य चैतस्याक्षरव्यूहस्य यथेच्छं विवक्षित-
नेकधात्वाद्बहवश्छन्द प्रकारा प्रचरन्ति । तथाहि—प्रस्तारप्रतिपन्नाना स्वरूपाणां
यानि यानि गतिसपन्नानि स्युस्तानि क्वचिदेकैकान्येव प्रयुक्तानि छन्दासि भवन्ति ।
तु सजातीयाना विजातीयाना वा तेषा द्वयेन त्रयेण चतुष्टयेन पञ्चकेन षट्कादिना
थेच्छं कृतेन गतिसपन्नेन तत्र तत्र छन्दोव्यवहार. । तदुक्तं भगवता पिङ्गलेनापि—
द्वेत्रिचतुष्पादुक्तपादम्' इति । शाङ्खायनोऽप्याह—'पञ्च पङ्क्ते , षट् सप्तेत्यतिच्छ-
म्' इति । अतएव—'आयाहि मनसा सह' इति (ऋक् १०।१७२।१),—'द्विपदाः
ा'त्यैतरेयब्राह्मणे (५।१७।१०), । 'आयाहि मनसा सह' (१०।१७२।१)'इमानुकं'
।१५७।१) 'वभ्रुरेक ' (८।२९।१)—इति द्विपदासूक्तानीत्याश्वलायनसूत्रे (८।७।
), 'आयाहि सवर्त उषसं द्वैपद'मिति—सर्वानुक्रमण्या च द्विपदात्वेन व्यवस्थि-

सायां अपि 'पिङ्गलो नेऽस्या' (१०।१७२।३) ऋचमधिकृत्योपोद्घातसंस्कारपङ्क्त्युदाहरणस्य माहात्म्यात वेदार्थदीपिकायाम् ।

द्वादशाक्षरयोर्मध्ये पादावष्टाक्षरौ यदि ।
यस्या संस्कारपङ्क्तिः स्यात् पिङ्गलो न तन्नुमिव् ॥ इति ।

द्विर्द्विपदास्त्वृच समामनन्तीति सूत्रयता भगवता कात्यायनेनापि द्विपदात्वेनाभिप्रेतानां सर्वासामेव ऋचां शसनकाले ताभ्यां द्वाभ्यामेव पादाभ्यां छन्दःपूर्तिरध्ययनकाले तु द्वयोर्द्विपदयोश्चतुर्भिः पादैश्छन्दःपूर्तिरभिप्रेयते । तेन यासां शसने दशार्चत्वं तासामेवाध्ययने पुनः पञ्चार्चत्वमिति सुप्रसिद्धं याज्ञिकानाम् । एवं पङ्क्तिर्गायत्रैर्जगतीकारतया एकमेव महापङ्क्तिच्छन्द इष्यते न तु गायत्रीद्वयसमुच्चयः । आनुष्टुभे प्रगाथे तु दशभिर्गायत्रैरनुष्टुभो गायत्रीद्वयस्य च समुच्चयेन तृचः प्रगाथ इष्यते न त्वेवैकं छन्दो नवानुष्टुब्महापङ्क्तिसमुच्चय इत्यप्यवधेयम् ॥ अथापि च मन्त्रैर्वं द्वयोस्त्रयाणां चतुर्णां वाधिकानां वा समुच्चयस्त्र द्विपात्, त्रिपात् चतुष्पादित्येव पादव्यवस्थामिच्छन्ति । सेयं पादव्यवस्थापि नूनं विवक्षाधीनैव । उत्तरोत्तरप्रस्तारस्वरूपे पूर्वपूर्व प्रस्तारस्वरूपाणामन्तर्भावाच्चतुष्पथामेकपार्श्वस्य एकपथां चतुष्पार्श्वस्य च वक्तुं शक्यत्वात् । यथा द्वाभ्यां पङ्क्तिभ्यामेका चम्पकमाला भवति यथा वा प्रमाणिकाध्यर्धेन पद्मचामरम् प्रमाणिकाद्वैगुण्येन गीतिका च जायते । इत्यमन्यदपि द्रष्टव्यम् ।

अत एव—

'सुरक्षुमवाके नहि गुणदोषौ
अगुरिति केचिन्म च पुनरन्ये ।
शुभमशुभं यत्फलमिदमुक्तं
नृपवर युक्तं प्रथमगणे तत् ॥

इत्यत्र यदि विवक्ष्यते—द्वौ श्लोकौ संभवतः । यद्वा विवक्ष्यते—एक एव श्लोकः स्यात् । अथ विवक्ष्यते—श्लोकार्धमेवेदं संभवतीति पश्यन्ति ॥

अथ यतश्चैकपादपि छन्दो भवति । तस्माद्न पादसिद्धिरिच्छन्दःसिद्धौ विशिष्योपयुज्यते किन्त्ववच्छेदसिद्धैव छन्दःस्वरूपसिद्धिर्भवतीति विज्ञेयम् । यस्य कस्याप्यर्थस्य शब्दस्य वा यथाकथञ्चित्क्रियमाणोऽवच्छेद एव तदर्थस्य शब्दस्य वा छन्दः । सर्वोऽप्यर्थः स्वच्छन्दसावच्छिन्नो भवति । यत्तु विच्छित्तिविशेषोऽप्यन्यान्यदान्तरं छन्द शिल्पापरपर्यायमाख्यायते । शिल्पं छन्द इति श्रुतेः । तदप्यवच्छेदरूपत्वादेव । यदि ह्ययमवच्छेदो नाम धर्मो जगति न स्यात्तर्हि जगदेवेदं न स्यात् । जगदन्तर्गतं वा यत्किञ्चित् । एकमेव हीदं सर्वं ब्रह्म तदवच्छेदमाहात्म्यादनेकधात्वेन प्रतिपद्यमानं जगद्भवति । तदन्तर्गतं वा यत्किञ्चित् । करूवरोरोभीवाशिरोहस्तपादादयवच्छेदान्मनुष्यवत् । यथा चैकस्मिन् श्वेतपद्मे शिल्पिकृतानेकमञ्जिरेखावच्छेदमाहात्म्याद् गौरयं पुरुषो हस्तीत्येवमादयोऽनेकमात्राः प्रादुर्भूय पृथक्त्वेन प्रतिपद्यन्ते न ते श्वेतपद्मा

रिच्यन्ते । एवमेवैकस्मिन् सत्ये ब्रह्मणि विश्वकर्मकृतानेकभङ्गिरेखावच्छेदमाहात्म्यादेव गौरश्व पुरुषो हस्तीत्येवमादयोऽनेकभावा प्रादुर्भूय पृथक्त्वेन प्रन्मिद्यन्ते । न ते सत्याद्ब्रह्मणोऽतिरिच्यन्ते । तथा च भगवान् कणाद —

'सदिति द्रव्यगुणकर्मसु सा सत्ता । सदिति लिङ्गविशेषाद् 'विशेषलिङ्गाभावाच्चैको भाव ' इत्येवमाद्याख्यायैकस्मादेव भावात् सत्तापदप्रतिपन्नाद्ब्रह्मणश्छन्दोभेदेन सर्वेषा द्रव्यादीनामुत्पत्तिमभिप्रैति । तथाहि—एक कश्चित्सत्तापरपर्यायो भाव प्रतीतिसिद्ध' । स धर्माणा तारतम्येनावापोद्वापाभ्यामन्यथान्यथा स्वरूपं गमितोऽन्यथान्यथा पदार्थो भवति । धर्मस्त्वस्य द्रव्यगुणकर्मभेदात्त्रेधा—द्रव्याणि पुनर्नवधा, गुणास्तु सप्तदशधा, कर्म पञ्चधा । तेषामेषां द्रव्यगुणकर्मणा सामान्यविशेषाभ्या जात्याकृतिव्यक्तिपदप्रतिपन्नाभ्या ये समवायास्त एव पदार्था । यथा घट इति केषाचिद्द्रव्यगुणकर्मणा सामान्यविशेषाभ्यामेक समवाय इत्येक पदार्थो भवति । एकस्मिन्नेव घटभावे कतिचिद्द्रव्यगुणकर्माणि समवयन्ति । न च तेषां त्रयाणा सत्तात्रयी । अत एव न द्रव्यगुणकर्माणीति त्रय पदार्था । अपि तु द्रव्यगुणकर्माण्येक पदार्थ । अनन्ताश्चैवं पदार्था । तेपा च सत्तैकत्वनिवन्धनं पदार्थकत्वम् । द्रव्यगुणकर्मणा तु समवेतानामेकैव सत्ता । यथा हि यावत्पृथिव्यामेकस्या एव सत्ताया प्रतीतावप्यवान्तर घटपटादिषु मिथ सत्ता विभिद्यन्ते नैवं द्रव्यगुणकर्मणामेकस्या सत्तायां पुनरवान्तरा द्रव्यादिसत्ता पार्थक्येन प्रतिपद्यन्ते । यथा तु घटपटादिषु पृथिवीत्वं न भिद्यते, पृथिव्यादिषु वा द्रव्यत्वं न भिद्यते तथैव पुनर्द्रव्यादिषु सत्त्वं न भिद्यते । पृथिवीत्वं पृथिवीति प्रत्यय. । द्रव्यत्वं द्रव्यमिति प्रत्यय । सत्त्वं सदिति प्रत्यय । सत्त्वं सत्ता भाव इत्येकार्था । तदित्थं सद्भाव–द्रव्यभाव–पृथिवीभाव–घटादिभावाना विभिद्य प्रतीतानामानन्त्येऽपि सक्षिप्य स भावस्त्रेधा प्रतिपद्यते कश्चित्सामान्यमेव, कश्चिद्विशेष एव, कश्चित्तु सामान्यविशेषात्मक । यो नित्यं सामान्यमेव स सत्तानामैको नित्यो भाव । तस्यैकत्वादेवायमेक पदार्थ ससारो नाम । यो नित्यं विशेष एव तस्यानेकत्वादेवैतेऽनन्ता नित्यपरमाणुपदार्था इतश्चेतश्च दृश्यन्ते न संख्यातुं शक्यन्ते । यस्तु सामान्यविशेपात्मको भावस्तदनुरोधेनैवैते घटत्वपृथिवीत्वद्रव्यत्वादिभि सामान्यतो विशेपतश्च गृहीता सर्व एतेऽनित्या पदार्था व्यपदिश्यन्ते । एवं ह्येताभ्या भातिसिद्धाभ्या सामान्यविशेषाभ्या यथेच्छं विनियुक्ताभ्यां सर्वेषामेषा सत्तासिद्धाना द्रव्यगुणकर्मणा समवायोऽनेकत्वेनैकत्वेन च यथेच्छं नियम्यते । यथा गृहमित्येको भाव । अङ्गण(न)कुड्यस्तम्भपटलद्वारकपाटादयो वानेके भावा । एवमेकत्वानेकत्वयोरेकत्र द्रव्यगुणकर्मणा समवाये समन्वयादनन्ता एते भावा पुरुषाख्या , एक एव वायं भाव पुरुपाख्य इति शक्यते द्वैविध्येनापि व्यवहर्तुम् । स हि खल्वेक पुरुधा भवति । अत एवामनन्ति—'इन्द्रो मायाभि पुरुरूप ईयते । तमेकं सन्तं वहुधा वदन्ति । पुरुष एवेदं सर्वम् । सर्व खल्विदं ब्रह्म । एकमेवाद्वितीयम्'इत्यादि । तत्र यथायं पुरुषापरपर्याय

एक केवलसामान्यभावो भातिसिद्धत्वया सामान्यविशेषभावा नित्यविशेषभावाश्च सर्वेऽपि भातिसिद्धा एव । आकृतिव्यक्ति समवायात्मकानां घटपटादिपदार्थानां सत्तासिद्धत्वेऽपि सत्तायाः सत्तासिद्धत्वासंभवात् । एकस्मिन् सामान्ये सामान्यविशेषभेदा नित्य विशेषभेदाश्च भातिसिद्धा एव संभवन्ति । एतदभिप्रेत्यैव सूत्रयति— 'सामान्यं विशेष इति युज्यपेक्षम्' इति । तथा च यदि सत्ता भातिसिद्धा तर्हि सत्तासिद्धा अपि सर्वेऽन्ततो भातिसिद्धा एवेति सिद्धं सर्वस्याप्य जगतो विज्ञानरूपत्वम्। विज्ञान हि ब्रह्मशब्देनाख्यायते । तदुपासको हि ब्राह्मणो भवति । स विजानीयात्—विज्ञानमेव सामान्य विशेषाभ्यामवच्छेदाभ्यां विवर्त्य तदवच्छेदमाहात्म्यादेव सर्वं जगदुद्धारयति ॥

तथा चत एवावच्छेदास्तदवच्छेदावच्छिन्नानां छन्दसां स्वस्वच्छन्दांसि भवन्ति। स्वस्वच्छन्द संपरैयैव च तत्तदवयवस्वरूपसंपत्तिरुदयते यदि हि गोत्वरूपावच्छेदरूपाया रेखाया किंचिद्विहन्यते सास्नेवावयव गो त्वरूपाद् विहन्यते । तदवच्छेदाच्छादि तस्य तु गो स्वरूपादप्रच्यवो भवति ।

तदिदमेषाम्य छन्दस स्वरूपाच्छादकत्व स्वरूपरक्षकत्वं च वेदे महत्पय समामनन्ति । अथैतदवच्छेदोपाधिभूतासु तत्तत्खण्डव्यायान्तरखण्डा अक्षरशब्देनाख्यायन्ते । अत एवाक्षरव्यूहछन्द इति पयायेण वदन्ति । यथा संवत्सरश्छन्दस्त्वनिवाहकाणि द्वादशाक्षराणि मासा । मासश्छन्दस्त्वनिवाहकाणि त्रिंशदक्षराणि दिनानि । संवत्सर स्य गायत्रीत्वे पक्षाश्चतुर्विंशतिरक्षराणीत्येवमनेकत्र शतपथादिब्राह्मणेषु प्रपञ्चितम् । तदित्थं यथैवाप्त स्वत्वाकाशादछन्द वायुरछन्द तेजश्छन्द आपश्छन्द, पृथ्वी श्छन्द एवमेव शब्दतोऽपि वर्णश्छन्द, अक्षरं छन्द पद छन्द वाक्यं छन्द प्रकरण छन्द इत्येवमेषां सर्वेषामेव छन्दस्त्वं संप्रतिपन्नम्। एव हि सत्यवच्छेदावच्छिन्नस्वसामान्यात् सर्वेषामविशेषेण छन्दस्त्वेऽभ्युपगम्यमानेऽपि तदवच्छेदानौपयिक तया नूनमक्षरव्यवस्थानिबन्धनमेव छन्दोव्यवहारमिच्छन्ति छान्दसिका । अक्षरं चेद मात्रानियत भवति । परमाणुप्रसरेणुषडेकमात्रिकत्वद्विमात्रिकत्वाभ्यामक्षरमपि द्वैधेय भवति । तथा च मात्रानियताक्षरव्यूह एव च्छन्दोऽवच्छेद एव वा छन्द इति संसिद्धम् ॥

इति छन्दोविमर्शविवाद ।

अथ वैदिकान्यत्ववाद'—

ननु वैदिकलौकिकभेदाच्छन्दसां द्वैविध्यमुपदिश्यते । तत्र न ज्ञायते किंनिमित्तोऽयमतिरेक इति । वेदे तावत् यत्र छन्दांसि यत्रातिच्छन्दांसि यत्र कृतिच्छन्दांसि चोपदिश्यन्ते तान्येव पुनर्लौकिका अप्युपजीवन्ति । यद्यपि प्राकृतपिङ्गलोक्तविधया मात्राच्छन्दांसि वेदे नोपदिश्यन्त इति सिद्धमेषां लौकिकत्वमथापि वेदोपदिष्टानां छन्दोऽनुवर्तनाच्छन्दोऽतिरेकेण वैदिकं न पश्यामः ।

उच्यते–त्रिविध खल्वपि छन्दोविभाग प्रयोगभेदात् प्रतिपद्यते । मात्राच्छन्द·, अक्षरच्छन्द क्रमच्छन्दश्चेति । यत्र मात्रासमष्टिसंख्या न च्यवते अथाक्षरसंख्या गुरु-लघुसनिवेशक्रमश्च पर्यायेषु विलक्षणतामेति तत्र मात्राणां प्रगृह्यतया मात्राच्छन्दो-व्यवहार । यथौपच्छन्दसिकादिषु यथा वा शिखामालादिषु । अथ यत्राक्षरसमष्टिसंख्या न च्यवते मात्रासंख्या गुरुलघुसंनिवेशक्रमश्च पर्यायेषु विलक्षणतामेति तत्राक्षराणा प्रगृह्यतयाऽक्षरच्छन्दोव्यवहार यथा न्यङ्कुसारिणीविष्टारबृहतीविष्टारपङ्क्त्यादिषु । एवं यत्र क्रमस्यैव प्रगृह्यतया गुरुलघुसंनिवेशो नियतपौर्वापर्यकस्तत्र सर्वेष्वेव पर्यायेषु नाक्षरसंख्या च्यवते नापि वा मात्रासंख्या, तस्यैतस्य क्रमच्छन्दस्त्वं भवति यथा सिंहोद्धतामन्दाक्रान्ताशार्दूलविक्रीडितादिषु । तदित्थं भूयसातिरेकेण सिद्धेऽपि त्रैविध्ये मात्राच्छन्दोभिर्वैदिकव्यवहारादर्शनाल्लोके च भूयसा व्यवहारात्तेषा लौकिकत्वोपचार । अक्षरच्छन्दोभिश्च लौकिकानामनुपचाराद्यज्ञवेदे चानुपदं प्रातिस्विकभावेन तदुपयोगात्तेषा वैदिकत्वोपचार· । अथ क्रमच्छन्दसा नियतस्थानावस्थितगुरुलघ्वक्षरनिबन्धनतया अक्षरच्छन्दस्त्वानतिरेकाल्लोके तथैव चिरादुपचाराच्च वैदिकसाधर्म्याद्वैदिकत्वमथ मात्रा-च्छन्दोवल्लोकमात्रे तत्प्रयोगदर्शनाल्लौकिकसाधर्म्याल्लौकिकत्वमित्येवमेषामुभयसाधारणत्वं पश्यन्ति समीक्षादक्षा· । अत एव पिङ्गलादिप्रोक्तेषु छन्दोविचित्यादिग्रन्थेषु वैदिक-च्छन्दोऽनुदर्शनतया प्रतिपन्नेषु शुद्धवैदिकच्छन्दोऽनुशासनानन्तरमथार्वाचीनप्रोक्तेषु छन्दोभाषाप्राकृतपैङ्गलादिग्रन्थेषु लौकिकच्छन्दोऽनुदर्शनतया प्रतिपन्नेषु शुद्धलौकिक-च्छन्दोऽनुशासनानन्तरमुभयत्रापि क्रमच्छन्दसामनुविधानमुपलभ्यत इति द्रष्टव्यम् ।

यद्यप्यत्र मात्राच्छन्दास्यौपच्छन्दसिकादीनि, मात्रागणच्छन्दास्यार्यादीनि, अक्षर-च्छन्दासि न्यङ्कुसारिण्यादीनि, तथाक्षरगणच्छन्दासि सिंहोद्धतादीनि–इत्येवं चतुर्द्धा विभाजयितुमुचितं तथैव तत्प्रतिपत्ते । तथापि प्रकृते वैदिकत्व–लौकिकत्व–साधारण-त्वविवेकप्रसङ्गे तदवच्छेदकतया अक्षरछन्दस्त्व–मात्राच्छन्दस्त्व–क्रमच्छन्दस्त्वधर्माणा विवक्षणादित्थं विभाग इत्यवधेयम् ।

नन्वेतावता प्रयोगसप्रदायस्थितिरेवानुरुध्यते आहोस्विद् वैदिकसमाख्यावलाद्विध्य-न्तरमुपस्थाप्यते—"एषा वेद एव प्रयोग कर्तव्यो न तु लोकेऽपीति ।" यद्युच्यते वेदमात्रे प्रयोगोपलब्ध्या वैदिकत्वमेषामनूद्यते यदि वा वैदिकसमाख्यया लोके प्रयोग-प्राप्ति प्रतिविधीयते । उभयथापि नोपपद्यते । वैदिकाक्षरच्छन्द प्रतिपन्नानामनुष्टुब्वि शेषाणा पथ्यावक्त्रविपुलादीना वेदापेक्षयापि लोके वहुलोपचारस्य दृश्यमानत्वात्, इत-रेषा च त्रिष्टुब्जगतीभेदाना रामायणमहाभारतभागवतादिषु प्रायेण प्रयुज्यमानत्वात् । तस्मान्मात्राच्छन्द क्रमच्छन्दसोरेकान्तलौकिकत्वेऽक्षरछन्दसस्तु लोकवेदोभयसाधार-णत्वे संसिद्धेऽपि शुद्धवैदिकविषयता सर्वथा दूरपरास्तैव । अत्रोच्यते । पुराणेतिहासा-दिषु तावत् प्रवन्धवाचकाना पवित्रतासम्पत्त्युद्देशेन वैदिकच्छायावर्तिष्णुभिर्मुनिभि शासान्तरप्रसिद्धा मन्त्रविशेषा एवानूद्यानूद्य पठिता इति नानुवादे लौकिकत्वं

प्रसज्यते । अनुष्टुब्विशेषाणां तु पथ्यावक्त्रविपुलादीनां वैदिकत्वेऽपि विषमत्वसमत्वाध-समत्वात्मकभेदत्रयविभक्तेषूभयसाधारणत्वेन प्रतिपन्नेषु च्छन्दोजातेष्वन्तर्भावाद्विशेषो पचारो न विलुप्यते । तस्मादुभयथापीदमुपपद्यते-येदमात्रे प्रयोगोपलब्ध्या वैदिकानां वैदिकत्वमिहानूद्यते, वैदिकसमाख्यया लोके प्रयोगप्राप्तिश्च तेषां प्रतिषिध्यते इति । नन्वेवमुभयसाधारणानां त्रैधाप्रतिपत्तौ पथ्यावक्त्रवदितरेषामपि शुद्धवैदिकत्वेनाभिप्रेतानां गायत्र्यादीनां विषमत्वेनोपसंग्रहार्हाणां वैदिकत्वप्रसक्तिरिति चेन्मैवम् । छन्दोम्याकृतिमन्त्रे 'तत्रादौ विषम व्याहरयास्याम । स चतुर्धा-यद्य पदचतुरूर्ध्वमुष्णिक्कोपस्थितप्रचुपित च" इति सूत्राभ्यां परिगणनस्य वक्ष्यमाणतया तदितरेषां विषमाणामुभयसाधा रणत्वनिराकरणात् । तस्मात् परिगणितातिरिक्तानां विषमाणां वेदमात्र प्रयोगापलब्ध्या सिद्धमेकान्तवैदिकत्वमिति निष्कर्ष ॥

इति वैदिकान्यत्ययवाद ।

छन्दोलक्षणवाद ।

ननु गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यादयश्छन्दोविशेषा आम्नायन्ते । तत्र किं तावदेषां गायत्र्यादीनां गायत्रीत्वादिकमित्युपतिष्ठते जिज्ञासा । न तावत् षडक्षरपादत्वमष्टाक्षरपादत्रिपदीत्वं वा गायत्रीत्वं संभवति । त्रिपा त्वेन चतुष्पात्त्वेन चान्योन्यव्यभिचारात् । अथ षडक्षरपादत्वं चतुष्पाद्गायत्रीत्वम ष्टाक्षरपादत्व त्रिपाद्गायत्रीत्वमित्येव भेदेन लक्षण करिष्यते । दृश्यते हि त्रिपाद् गायत्र्या वेदमात्रगोचरत्वमथान्यस्याश्चतुष्पदा लोकवेदोभयसाधारणत्वमित्यनयाभेद प्रतिपत्तेरिति चेन्न । गायत्रीसामान्यलक्षणस्य जिज्ञास्यत्वात् । नाप्येतदन्यतरत्व गायत्रीत्वमित्यनेनापि निवाह । पादनियत सप्ताक्षरपादत्रिपाद्गायत्रीत्वेन पदपङ्क्ते पञ्चाक्षरपादै पथपाद्गायत्रीत्वेनापि सुप्रसिद्धे । किञ्च-षडक्षरकेतरपादाभावसमा नाधिकरण षडक्षरपादत्व लक्षणमपेक्ष्यते आहोस्वित् षडक्षरपादसम्बन्धमात्रम् । नाद्य—अतिनिचृत्-प्रतिष्ठा-हसीयसी-यद्वमानोष्णिग्गमादीनां गायत्रीत्वानापत्त । नान्त्य — एकादशिनो पर पट्वक्षरानुशिरा, 'मध्ये चेत् पिपीलिकमध्येति' कात्यायन सूत्राभ्यामुष्णिक्त्वेन प्रतिपन्नयोरपि तनुशिर-पिपीलिकमध्ययोर्गायत्रीत्वापत्ते । तस्मात् पादव्यवस्थामात्रमव्यवस्थितत्वान्न पादव्यवस्थापटित लक्षणं व्यवतिष्ठत इति स्थितम् । अस्तु तर्हि चतुर्विंशत्यक्षरावच्छिन्नत्वं गायत्रीछन्दस्त्वमिति चेतदपि न "नाक्षराच्छन्दो व्येत्येकस्मान्न द्वाभ्याम्' इति शतपथश्रुतौ (७।१।२।२२) नत्रो केनाक्षरेणान्यच्छन्दो भवति नो द्वाभ्याम्"—इति कौपीतकिश्रुतौ (२७ अध्या० १) 'न वा एकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यामिति' ऐतरेयश्रुतौ ( ) तथान्यत्रापि चैकद्वित्रिवर्णोनातिरेकेऽपि गायत्र्यादिच्छन्दोव्यावातप्रत्यास्थानस्य भूय साभेदनात् तथाविधानां श्रुतिप्रामाण्यसिद्धानां निचृदुष्णिगादीनां गायत्रीविशेषाणां

चतुर्विंशत्यक्षरानवच्छिन्नतया गायत्रीत्वानापत्ते· । ननु न्यूनाधिकेनैकेन निचृद्बृहतीजौ, द्वाभ्यां विराट्स्वराजौ, पादपूरणार्थं तु क्षैप्रसयोगैकाक्षरीभावान् व्यूहेदिति सूत्रोपदिष्टया व्यूहमर्यादया चतुर्विंशत्यक्षरकत्वं सेत्स्यतीति चेत्सत्यम् । एवमपि प्राजापत्यासुरी-दैव्यादीना गायत्रीविशेषाणा गायत्रीत्वासिद्धिस्तदवस्था स्यात् । तत्र व्यूहमर्यादयापि चतुर्विंशत्यक्षरावच्छिन्नत्वासिद्धे । न च चतुर्विंशत्यक्षरावच्छिन्नत्वमार्षीगायत्रीछन्दस्त्व-मष्टाक्षरावच्छिन्नत्वं प्राजापत्यागायत्रीत्वं पञ्चदशाक्षरावच्छिन्नत्वमासुरीगायत्रीत्वमित्येव-मष्टानामपि गायत्रीविधाना प्रातिस्विकलक्षणानि भविष्यन्तीति वाच्यम् । चतुर्विंशत्य क्षरावच्छिन्नत्वादीना विभाजकतावच्छेदकत्वसिद्धावपि विभाज्यतावच्छेदकस्य गायत्रीत्वस्याद्य यावदसिद्ध्या तासामष्टानामपि विधाना गायत्रीविभाजकत्वासिद्धे । छन्दस्त्वात्मकविभाज्यतावच्छेदकप्रसिद्धावपि विभाजकतावच्छेदकधर्माप्रसिद्ध्या सप्त-च्छन्दासि—इति सर्ववेदे प्रसिद्धविभागानुपपत्तेश्च । तस्मादवश्यं गायत्रीसामान्यलक्षणं किञ्चिदपेक्षणीयमिति चेत्—अस्त्वेवम् । सर्वच्छन्द -कनिष्ठच्छन्दस्त्वं गायत्रीत्वमित्येवं तावदभिसधास्यामः गायत्रीपुरोगमानि हि चतुरुत्तराणि सर्वाणि च्छन्दासि भवन्ति तत्र गायत्र्या सर्वच्छन्दोऽपेक्षया सप्ताक्षरघटितत्वात्कनिष्ठत्वं शक्यं वक्तुम् । नन्वेव सत्यनादिष्टछन्दसामुक्तात्युक्तामध्याप्रतिष्ठासुप्रतिष्ठाना सर्वच्छन्दोऽपेक्षया स्वल्पाक्षरत्वाद् गायत्रीत्वमतिप्रसज्येत । वेदे गायत्र्यादीनामेव छन्दसा सुप्रसिद्धेस्तेषा छन्दस्त्वमेव नास्तीति तु नापाद्यम् । ताण्ड्यश्रुतौ—"चतुरुत्तरैरेव छन्दोभिरेतव्यमित्युक्ता–एका गायत्रीमेकाहमुपेयुरेकामुष्णिहमेकाहमेकामनुष्टुभमेकाहं–बृहत्या पञ्चमास ईयु पङ्क्ति-मेकाहमुपेयु त्रिष्टुभा षष्ठं मासमीयु —श्वो विषुवान् भवितेति जगतीमुपेयु" इति सूत्रेण गायत्र्यादिभिरह साधनोक्त्या गायत्र्या अपि चतुरुत्तरच्छन्दस्त्वप्रति-पादनाद्विंशत्यक्षराया सुप्रतिष्ठायाश्छन्दस्त्वानभ्युपगमे गायत्र्याश्चतुरुत्तरत्वानुपपत्ते । तथा च तेष्वतिप्रसक्तेर्नेद गायत्रीलक्षणं साधीय इति चेन्न । तत्र गायत्रीत्वस्येष्टापत्ते । तदुक्तं वेदार्थदीपिकायाम्—

"उक्तादिपञ्चकं कैश्चिद् गायत्रीत्येव कथ्यते"

इति । तथा चेदं लक्षण निर्दोषमिति चेन्न । सर्वच्छन्द कनिष्ठच्छन्दस्त्वमित्यत्र हि कान्येतानि सर्वाणि च्छन्दासि । कि तावद् गायत्र्युष्णिगनुष्टुवादीनि सप्तच्छन्दासि सप्तातिच्छन्दासि सप्तकृतिच्छन्दासीत्येतावन्ति सर्वाणि च्छन्दासि विवक्षितानि, आहो-स्विद् गायत्रीत्रिजगतीत्वादिकमनपेक्ष्यैव मात्राक्षरसख्यया नियता वाचो विवक्ष्यन्ते । तत्र न तावदाद्य । आर्षीगायत्र्यपेक्षया प्राजापत्योष्णिह स्वल्पाक्षरतया गायत्री-त्वापत्ते । तदपेक्षयाधिकाक्षराया आर्षीगायत्र्या गायत्रीत्वानापत्तेश्च । न चार्षीभ्य उष्णिगादिभ्य· स्वल्पाक्षराया आर्षीगायत्रीत्वं प्राजापत्योष्णिगाद्यपेक्षया च्चाल्पाक्षरायाः प्राजापत्यागायत्रीत्वमित्येवं वक्ष्याम इति वाच्यम् । आसुरीभ्य उष्णिगादिभ्योऽनल्पा-क्षराया एवासुरीगायत्रीत्वप्रसिद्ध्या तावताऽप्यनिर्वाहात् । गायत्रीत्वोष्णिक्त्वजगती-

स्वादीनामिदानीं यावदसिद्ध्या तत्त्वेन विभागासंभवादुष्णिगाद्यपेक्षया अल्पाक्षरत्वस
गायत्रीपदार्थतावच्छेदकत्वानुपपत्तेश्च । नाप्यन्त्य । उष्णिहा दैवीगायत्र्या वा गायत्री
स्वसिद्धावप्यन्त्यासां गायत्रीत्वानापत्ते । तस्मान्नेद गायत्रीसामान्यलक्षणमिति चेदस्तु
तर्हि गायत्रीपदेन याज्ञिकानां प्रसिद्धिरेव गायत्रीत्वम् । नैवम् । ज्ञानस्यैव प्रसिद्धि
पदार्थत्वाद् गायत्रीपदप्रकारकज्ञानविशेष्यत्वमेव गायत्रीत्वमेतेनोक्तं भवति तच्च
युक्तम्—गायत्रीपदनिष्ठसंकेतसम्बन्धावच्छिन्नप्रकारतानिरूपितयाज्ञिकज्ञानीयविशेष्यत
वच्छेदकत्वाप्रसिद्धौ तादृशविशेष्यतायाः उष्णिगादिष्वव्यावर्तमानतया तेषामपि सर्वेषां
गायत्रीत्वातिप्रसक्तेः । तस्माद् भवदवच्छेदेन गायत्रीपदप्रसिद्धिः सोऽतिरिक्तः कश्च
धर्मो वक्तव्य इति चेदस्तु तर्हि गायत्रीत्वमखण्डोपाधिः । तदवच्छेदेनैव गायत्रीपद
प्रसिद्धिरप्यास्त्वामिति चेत्तुच्छमेतत् । लोकप्रसीतपदार्थके हि विषये पदार्थतावच्छेदक
स्याखण्डोपाधित्वेन कथञ्चिदभ्युपगमेऽपि साम्यधर्मापामखण्डोपाधित्वस्वीकारस्याप्र
माणिकत्वात् । तस्मादसिद्धं खलु गायत्रीत्वमिति चेदुच्यते—चतुर्विंशत्यक्षरावच्छिन्नत्व
गायत्रीत्वमित्येव सिद्धान्तः पक्षः ॥

यत्तु निचृद्बृहतीगादिषु दर्शितो व्यभिचारः स तावद्युक्तः । एकेनाक्षरेण द्वाभ्यां
वा न्यूनाधिकतायाः गायत्रीविकृतिप्रयोजकतया तत्सामपि तस्यां विकृतौ प्रकृतिलक्षण
व्यापातासंभवात् । नहि कस्यचिदङ्गस्यलोपेन सता प्राणिनश्चक्षुष्मत्त्वलक्षणं व्याहन्यते
न वा लाङ्गूलच्छेदादिपाणत्रंशाद्वा सामान्यलाङ्गूलकुदन्तरयिपाणित्वरूप गोलक्षणमलक्ष
मवति । तस्मात्सिद्धं चतुर्विंशत्यक्षरावच्छिन्नत्वमेव गायत्रीत्वम् । अथ यदपि प्राजापत्या
सुरीबृह्म्यादिषु व्यभिचारदर्शनाभेद लक्षणमित्याख्यातं तदप्यतएव प्रत्याख्यातं भवति
तासामप्यार्षीविकृतिरूपत्वानतिरेकात् । तथा हि—

यद् गायत्रे अभिगायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत् तद्विदुस्ते अमृतत्वमानशुः ॥ १ ॥

इति मन्त्रान्नानादेकस्मिन् छन्दोन्तराधानप्रतिपत्त्या तस्यामेवार्षीगायत्र्यां चतुर्वि
शत्यक्षरावच्छिन्नायामेकाक्षरावच्छेदेन दैवीत्वं पञ्चदशाक्षरावच्छेदेनासुरीत्वमष्टाक्षरा
वच्छेदेन प्राजापत्यात्वमित्येवं विभागभेदाग्रेयिभ्योपचार । गायत्रीविभागजत्वाच्चैताः
गायत्रीशब्दो भाक्तः । यद्यपि कौषीतकश्रुतौ मन्त्रोऽयमन्यथा व्याख्यायते यथा—

यद् गायत्रे अभिगायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत् तद्विदुस्ते अमृतत्वमानशुः ॥" इति

अथो यदिमा देवता एषु लोकेष्वभ्यूढा ,—गायत्रेऽस्मिंल्लोके गायत्रोऽयमग्निरभ्यूढ
त्रैष्टुभेऽन्तरिक्षलोके त्रैष्टुभो वायुरभ्यूढः । जागतेऽमुष्मिंल्लोके जागतोऽसावादित्योऽ
भ्यूढ "—इति । न चैतावता छन्दसि छन्दोऽन्तरसत्ता मन्त्रार्थं उपलभ्य, तयाभि
धत्सयेन मन्त्रेणाधिकमर्थमुपदेष्टुमिवाभिमुखवर्तमानानां मनुष्याणां मनुष्यपया हि मन्त्रार्थवाद
मवन्ति । तदतो नाभिगम्यमानं प्रमाणान्तरसिद्धमर्थं सर्वथा प्रत्याख्यातुमवकल्पते

अथ पादश्छन्दसां द्विविधो भवति । विरतिसिद्धो विभागसि
त्वेऽपि दृश्यते । परन्तु चतुर्थांशात्मक । तत्र चतुर्वि
विभागजैकपादहानावाच्यों, तादृशपाददयहानौ साम्न्या
पाददयाधिक्ये तु ग्राह्यया, व्यवस्थापनात्तासामप्यार्षीविकृ
न्यूनाधिकाक्षरत्वसंभवेऽपि सिद्धं चतुर्विंशत्यवयवघटितत्वं
एतेनोष्णिगादयोऽपि व्याख्याता इति दिक् ॥

इति छन्दोलक्षणवाद ।

अथ समासवादः ।

अथ विप्रतिपत्ति । एके तावत्–प्रस्तारसिद्धे स्वरूपे चल
भागं वा यत्र तत्र यतिव्यवस्थाप्यनुवर्तते गतिसापेक्षेतीच्छ
शुद्धेषु स्वरूपेषु गतिसम्पन्नाना केषाचित्सजातीयचतु
सजातीयद्विसमुच्चयोऽर्द्धसम भवति । अथैकमेव प्रस्तारसि
नया चतुष्पाद् भवतीति तद्विषमं वृत्तमितीत्थं समा
प्रकल्पन्त इतीच्छन्ति ।.२ ।

परे पुन –सजातीयचतुर्व्यूह समवृत्तं विजातीयचतुर्व्यूह
द्विसमुच्चयो द्वि प्रयुक्तोऽर्द्धसमवृत्तं स्यादिति सर्वत्र
च्छन्ति । ३ । अपरे तु न खलु पादव्यवस्था छन्द सिद्धौ
यथेच्छं पादा प्रकल्प्यन्ते तत्र चतुर्थांशस्य पादत्वमि
केवलं सर्वेष्वेव श्लोकेषु चतुरश्चतुर एव पादान् प्रकल्प्य तत्
विषमवृत्तत्वं व्यवस्थापयन्ति । ४ । अत एव श्लोकनिष्ठाश्च
तदितरास्तथैवानुभूयमानानपि पादव्यवस्थाप्रयोजकत्वेन
केषाचिच्छान्दसिकाना सामयिकोऽर्थ स्यात् ।

वस्तुतस्तु संस्कृते पैङ्गले द्विदलतया सिद्धेष्वप्यार्यादि
मात्रासु ततोऽष्टादशमात्रासु तत पुनरेव द्वादशमात्रासु
यथेच्छ चतुर पदान् प्रकल्प्य चतु पदीत्वमार्याया व
यथा वा द्विदलायामपि दोधायामवष्टम्भानुरोधेन त्रयं
प्रकल्प्य चतुष्पदीत्वमिच्छन्ति तथैव शार्दूलविक्रीडिताद
द्वादशपदीत्वं त्रिभङ्गयदीना षोडशपदीत्वमित्येवमवष्टंम्भानु
द्रष्टव्या । न खलु चतुर्थांश पाद इति युज्यते वक्तुं छन्दो
रेकेऽपि तद्व्यवहारदर्शनात् । किं तर्हि पदमिति विश्राम
श्लोकखण्ड पाद इति वक्तव्यम् । अत एवैतेषु विश्रा
स्वाभाव्यादितरविश्रामपदापेक्षयाऽधिकमात्रत्वेनानुभवात्तत्र

सर्वेषामेव श्लोकानां द्विदलत्व प्रतिपत्तु युज्यत इत्यन्यदेतत् । एवं स्थिते यान्येतानि श्लोकखण्डान्याख्यातानि तेषामेकैकप्रस्तारस्वरूपस्य पार्थक्येन प्रतिपत्तव्यम् । तथा च सप्ताक्षरकप्रस्तारसंबन्धिनां सप्तदशचतुःषष्टितमोनविंशानां समासेन श्लंघराच्छन्द । द्वादशाक्षरप्रस्तारसंबन्धिनोऽष्टादशशतोत्तरैकाशीतितमस्वरूपस्य तथा सप्ताक्षरप्रस्तार संबन्धिन सप्तत्रिंशस्वरूपस्य च समासेन शार्दूलविक्रीडितसिद्धि । इत्येवमेकैकप्रस्तार स्वरूपाणां पदत्वात्तत्समासेन तानि तानि श्लछन्दांसि संपद्यन्त इति द्रष्टव्यम् ।

अथ ब्रूयात्—मसयोश्चसयोरपि षडक्षरप्रस्तारस्वरूपविशेषतया पदत्रसंभवात्तयो-रपि समासेन शार्दूलविक्रीडितमार्गसिद्धि कस्मान्नाख्यायत इति । तत्रेद वक्तव्य यथा हि सङ्कटकशब्दे—संघटकशब्दयोर्यद्यपि स्पदत्रसंभवेऽपि कुतश्चित् कारणात् सयो समासेन सङ्कटकशब्दसिद्धि मन्यन्ते वैयाकरणा—एवमिहापि स नेष्यताम् । यथा वा षकारद्विवचनेन— उदकं पश्यति"—इति यत्र प्रयुज्यते तत्रोदकमिति पश्यतीत्येवमेक पदच्छेद । जलं निरीक्षते इत्यर्थात् ॥ १ ॥ अथ—उदकम्प इति स्यतीत्येवमन्य पदच्छेद । जलकम्पनं तनूकरोतीत्यर्थात् ॥ २ ॥ एवमुदिसि अकमिति पश्यतीति चान्य पदच्छेद । उपरिष्टाद्व समालोचयतीत्यर्थात् ॥ ३ ॥ तथा—उ—इति दकमिति पश्चीति अतीति चापर पदच्छेद । पश्यन्दप्रतिपाद्येऽदाधर्येऽतिशयेन जल वितर्क्यत इत्यर्थात् ॥ ५ ॥ इत्यमनेकधा संभवेऽपि स्वरविश्लेषात् पदविभागमध्यवस्यन्ति प्रेक्षा वन्तस्तथेहापि गतिविश्लेषात्पदविभागाध्यवसाय क्रियते । यत्रैव क्वचिद्गति समाप्नोति तत्रावश्यमवष्टम्भो भवति । अनवष्टम्भे गतिरनुवर्तत इति तन्मध्ये प्रस्तारविश्लेषानुगत स्वरूपसंभवमात्रेण नानेकपदत्वगतिप्रतिपत्तियुज्यते । यथाहि—उद इति उदकमिति कमिति—एतेषां समानार्थकपदत्वसम्भवेऽपि नोदकशब्दे उदशब्दस्य दकशब्दस्य कशब्दस्य वा पदत्व प्रतिपद्यन्त इत्यवधारणीयम् ।

स चार्य समास पञ्चधा—नित्यसमास १, विकल्पसमास २, संकीर्णसमास ३, प्रक्षीणसमास ४ उपपदसमासश्च ५ । तत्र समानप्रस्तारानुगतनियतस्वरूपाणा मान्रेडिते नित्य । यथा पसन्ततिलकाचरणयोर्नित्यसमस्वरूपयोर्द्विरुक्ति । यत्र तु समानप्रस्तारानुगतानियतस्वरूपाणां समुच्चय तत्र विकल्प । यथा पम्पावकचरण योरपि मिश्रसंस्थानयोरभिनिवेश । यदि तु भिन्नप्रस्तारानुगतनियतस्वरूपाणां समुच्चयस्तदा संकीर्ण । यथा पुष्पिताग्राचरणयोर्द्वादशाक्षरत्रयोदशाक्षरप्रस्तारानुगत स्वरूपविश्लेषयो समुच्चय । यदि पुनर्विभिन्नप्रस्तारानुगतानियतस्वरूपाणां समुच्चयस्तदा प्रक्षीर्ण । यथा दोधाचरणोत्पलयोदशैकादशमात्राप्रस्तारानुगतानियतस्वरूपाणां मध्ये यथेच्छमेकैकस्य संनिवेशेन संसिद्धि । अथ सोऽप्युपपदसमासो यत्र पदभेदेऽप्यखण्ड पदवत्प्रतिपत्ति । यथा उदकशब्दे उदिति निपातस्याव्ययविभक्तेन समुच्चयेऽप्यखण्डपदमुप चार । यथा वा समुद्रशब्दे न निर्णीयते सम्यग्द्रुद्राशब्दसमुच्चयो वा १ समुभिपातयो र्मध्यविभक्तेन समुच्चयो वा २ समिति निपातस्य जलार्थकोदकशब्दस्य रात्रिभक्तेन

समुच्चयो वा ३ समितिनिपातस्य उनत्तिवृत्तेन समुच्चयोवेति ४ संज्ञाशब्दोऽयमखण्डवत् प्रतिपन्न. । अभिप्रायविशेषात्तु तं तं पदविभागमन्वाचक्षते नैरुक्ता । एवमिहापि यथाऽर्य्याजातौ षष्ठडकारादिभूतलकारादुत्तरस्य कलात्रयस्य नखान्यतररूपतयाभिनेतव्यस्य निपातरूपत्वाद्विभिन्नपदत्वमेवाधिगम्यतेऽथाप्यखण्डवदुपचार । एवमेवान्यत्रान्यत्रापि द्रष्टव्यम् ।

अथ प्रकारान्तरेणायं समासो द्वेधा–पादखण्ड , पदखण्डश्च । यत्र समासारम्भकपदयो पूर्वोत्तरपादत्वं तत्र पादखण्ड । अन्यत्र पदखण्ड । स चायं विवक्षाधीन । तेन भक्षभक्षसमासस्य पादखण्डत्वेऽक्षरपङ्क्ति सम्पद्यते पदखण्डत्वे तु चम्पकमाला स्यात् । तत्र पादखण्ड समासान्तरेण गर्भितश्चागर्भितश्च भवति पदखण्डस्त्वगर्भित एव । अथ नित्यविकल्पाद्यन्यतमसमासे समस्तयोर्द्वयो प्रयोगादेक· श्लोको भवति । तदिदं मन्दं मन्दमित्यादिवत् द्विरुक्तिर्न समासः । अथ वैदिकाना तु समस्तैकदेशद्विरुक्त्यापि छन्द सिद्धिर्द्विर्वचनाभावेन समासाभावेन च । यथा त्रिपदा द्विपदा एकपदा ऋक् ॥

इति समासवाद

अथ छन्दःपदवादः ।

अथात पदप्रतिपत्तौ जिज्ञासा समुपतिष्ठते—किं तावत् प्रस्तारसिद्धस्वरूपेषु पदत्वेनाभ्युपगतेषु द्वयोश्चतुर्णां वा सजातीयाना विजातीयाना वा समवायेन छन्द -सिद्धिरस्ति । किंवा प्रस्तारसिद्धस्वरूपे छन्दस्त्वेनाभ्युपगते विच्छेदविरतियत्यपेक्षं पदविशेषव्यवस्थानमस्तीति । कुत एतत् । उभयथा ह्यत्र प्राचा व्यवहारा उपलभ्यन्ते । लौकिकास्तावत्—विषमार्धसमसमत्वेनाभ्युपगतेषु वृत्तेषु विजातीयाना सजातीयाना वा विरतिमत्पदाना द्विर्वाकेन चतुर्वाकेन वा छन्द साध्यते तत्तर्हि यतिमत्पदस्य षड्वाकेनाष्टवाकेन वा कस्माच्छन्द सिद्धिरपोह्यते । यदि तूपदेशलाघवायाधिगमसौकर्याय वा विरतिमत्पदे यतिव्यवस्थापेक्ष्यते तत्तर्हि वरमस्मिन् छन्दस्येव विच्छेदविरतियतिभेदानपेक्षं यतय. प्रकल्प्यन्तामलमर्धजरतीयाभ्युपगमेन ।

अथ वैदिका पुनश्चतुरुत्तराणि छन्दास्यभ्युपगच्छन्तश्चतुर्विंशत्यक्षरादिकाया वाचो गायत्रीत्वादिकमभिख्यापयन्तश्छन्दस्येव विच्छेदविरतियतिभेदानपेक्ष यतिव्यवस्थया पदसिद्धिं मन्यन्ते । अन्तरेणापि तु यतिं पदव्यवस्थामास्थाय छन्द स्वरूपसिद्धिं प्रति जानते । तत्रेयं विप्रतिपत्ति —

'सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभि ।
सवितुर्व प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभि ॥'

'तेजोऽसि शुक्रमस्यमृतमसि धामनामासि
प्रियं देवानामनाधृष्टं देवयजनमसि ॥'

इत्यनयोमाप्यन्दिनाम्युपगतयोजगत्यनुष्टुभोर्विच्छेदो दृश्यते विरतिनास्ति ।

'सुमित्रियान आप ओषधय सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं वय द्विष्म ।' इत्यस्यां माध्यन्दिनीयानामाप्यौ निगृदनुष्टुभि न विच्छेदो न विरति ।

'अन्ध तम प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रता ' ॥ १ ॥
'या न्याघ्रे विषूचिकोभा वृकं च रक्षत
श्येन पतत्रिणं सिंह सेम पात्वंहस ॥

इत्यनयोराप्यौर्निचृदनुष्टुपुष्णिहोरन्यवस्थिते विच्छेदविरती दृश्येते । ततो नु खलु विज्ञायते सर्वत्रैव छन्द सिर्दो विच्छेदविरत्यपेक्षा नास्तीति ।

अथ पुन —

'क्षत्रस्य योनिरसि, क्षत्रस्य नाभिरसि मा त्वा हिंसीन्मा मा हिंसी " इत्यत्र विरा द गायत्रीत्वमसीकृत्य द्विपदां विराजमभ्युपगच्छन्ति तत खलु सर्वत्रैव छन्द सिर्दो विच्छेदापेक्षा लभ्यते—

अथानुष्टुभ सर्वच्छन्दस्त्वं प्रतिपादयितुं मैत्रायणीयानामाम्नायते—

अनुष्टुभो वा एतस्या सप्ताक्षराणि पदानि–एक यत्साक्षरम् । यत्रसाक्षरम् तस्य चत्वाप्यक्षराणि एकस्मिन् पदे उपयन्ति त्रीण्येकस्मिन् । यत्र चत्वाप्युपयन्ति सा जगती । यत्र त्रीणि स त्रिष्टुप् । यदष्टाक्षरं तेन गायत्री । यदनुष्टुप् –तेनानुष्टुप् । सर्वैरेवास्य छन्दोभिहुत भवति । छन्द प्रतिष्ठानो वै यज्ञ छन्द सु वा वास्मै सयज्ञं प्रतिष्ठापयाम

८ । ८ । ८ । ७
८ । ८ । ८ ।
। ३ । ४

८ । ११ । १२

इत्येषमाचक्षाणेन गायत्र्यादीनां पादव्यवस्थानिर्भरत्वसमाम्नानात् सर्वत्र छन्द सिर्दो विरतेरप्यपेक्षाऽस्तीत्युपगम्यते । तदित्थमसमञ्जसमेतत् । यत्तु भूयात् । नास्त्य सामञ्जस्यम् । उभयथाप्युपपत्ते । इद तावद् भूम । अस्त्येव सर्वत्र नियमेन छान्दसिकविच्छेदविरतिप्रश्लेषनिर्णिति । सवितुस्त्येत्यादौ सुमित्रियेत्यादौ चार्थिकपदानुप लम्भेऽपि छान्दसिकपदव्यादरगणनाभिदव्यापत्तापायोग्यत्वात् । यत्र त्वक्षरगणना न समाप्नोति तत्रापि क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेद्' —इति काल्यायनोक्तदिशा उच्चारनसौकर्यानुकूल्येन व्यूहनाद् गणना द्रष्टव्या । यथा—

रुच नो धेहि ब्राह्मणेषु रुच राजसु धारय ।
रुच विश्येषु शूद्रेषु मयि धेहि रुचारुचम् ॥

इत्यादौ हिकारेकारस्य अकाराकारस्य वा भविष्यमानवद्भावादष्टाक्षरत्वम् । तथा—

'पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ १ ॥
समानी व आकूतिः समाना हृदयानि वः
समानमस्तु वो मनो यथा वः सुसहासति ॥ २ ॥'

इत्यादौ भावियमित्येवं (वह) इत्येवं च वर्णाभ्युच्चयेनोच्चारणादष्टाक्षरत्वम् तदित्थं वैदिकाना व्यवहारे पादपूरणानुरोधेन व्यूहः यवहस्वराणामितरवर्णसमभिव्याहाराद्ग कूल्यप्रातिकूल्यतारतम्यसापेक्ष्यमभ्युच्चयेनाविद्यमानवद्भावेन वेति छान्दसी परिभाष द्रष्टव्या । इत्थं व्यूहोऽपि सिद्धो वेदपुरुषाणामुच्चारणे, सिद्धान्वाख्यानं च शास्त्रं शक्नोति चिरन्तनव्यवहारसिद्धमर्थमपलपितुम् । अत एव पृथ्वीशब्दस्य पृथिवीपृथवी रूपाभ्यामुच्चारितस्यापि दृश्यते विधायकं वैयाकरणवचनम् यत्र तु न दृश्यते विधि वचनं, सोऽयमन्वाख्यापकदोषो भवति न तु व्यवहर्तृणामाद्यानां स्वतन्त्राचार्याणा नाि वा चिराद् व्यवहियमाणस्यार्थस्येति दिक् ।

अथान्यथा ब्रूम —

नास्त्येव सर्वत्र नियमेनर्थिकविच्छेदविरतिप्रक्लृप्तिरिति । अनुष्टुभ सर्वच्छन्दस्त्वोप पदकमैत्रायणीयश्रुतौ यजुर्मन्त्राणामनुक्रमणिकोक्तच्छन्दोव्यवहारे चानपेक्ष्यैवार्थि पदं छन्द स्वरूपोपपादनात् ॥

तस्मादुपपन्नो वैदिकव्यवहार इति चेत्तन्न । छन्द स्वरूपसिद्धौ सर्वथैवार्थानपेक्षाय छन्द साङ्कर्यप्रसक्ते ।—

'एदमगन्म देवयजनं पृथिव्या
यत्र देवासो अजुषन्त विश्वे ।
ऋक्सामाभ्या सन्तरन्तो यजुर्भी
रायस्पोषेण समिषा मदेम
इमा आप शमु मे सन्तु देवी.
ओषधे त्रायस्व स्वधिते मैनं हिंसी. ॥'

इत्यस्या सप्तत्यक्षराया विराड्रूपाया ब्राह्मीजगत्यामेकादशाक्षरैश्चतुर्भिरार्ष्यास्त्रिष्टुभ स्त्रयोदशाक्षराभ्या चासुर्योरनुष्टुभोरपि संभवात् । उपलक्षणमेतत् । द्वादशाक्षराभ्या मेकादशाक्षराभ्या च षट्चत्वारिंशदक्षराया विराडार्षीजगतीत्वेऽभ्युपगमे चतुर्विंश त्यक्षरावशेषादार्षीगायत्रीत्वसंसिद्धेः । न च देवतादितश्चेत्याद्यनुशासनादिष्टसिद्धि ब्राह्मीजगत्यामार्षीजगतीत्वादिना साङ्कर्यस्येदानीमप्यनिरोधात् । तस्माद् गतिसिद्ध मार्थिकं विरतिमत्पदमनुरुध्यैव तत्तच्छन्दोऽवयवभूताना पदाना पदाख्याना व्यवस्थ शक्या प्रतिपत्तुमतस्तदवस्थमसामञ्जस्यम् ।

अत्रोच्यते लौकिकच्छन्दसि तावद् गतिस्तन्त्रम् । गतिबलापतिता हि यतिर्गत्यनु गमानुरोधादेव पञ्चधा स्वरूपं धत्ते । अयति , यति , विरति , विच्छेद , अवसायश्चेति

तत्र यावता पुनरावृत्ति प्रायेण तत्रैव विरतेदृश्यमानतया तदनुरोधाद् द्विदलत्व चतुष्पदत्व षट्पदत्व वा व्यवस्थाप्यते । अत एव तत्र नियता पादानुरोधिनी छन्द सिद्धि । पादत्व च पुनरावृत्तसमानत्वे सति विरतिमत्पदत्वम् । यतिमत्पदस्यावृत्तेर्विरत्यन्तरितया विरतिमत्पदेतरतया च नैतस्य पादत्वमभ्युपगच्छन्ति । अधसमविषमाधौ तु पादव्यवहारो रजकाय वस्त्र ददातीत्यादौ दानव्यवहारवद् भाक्त । पुनरावर्तमानत्वाभावेऽपि विरतिमत्पदत्वानुभवनात्तत्सत्वोपपत्ते । अतो नास्ति लौकिकानामनुपपत्ति ।—

अथ वैदिकच्छन्दसि—

अभिभ्यां प्रात सवनमिन्द्रेणैन्द्र माप्यन्दिनम् ।
वैश्वदेव्य सरस्वत्या तृतीयमाप्त सवनम् ॥ १ ॥'

इत्येवमनुष्टुपादौ गत्यभावेऽपि छन्द सिद्धिदर्शनादक्षरगणनैव तत्र न गति । अत एव गतिवत्तापतिताया पद्यविधाया यतेरपि नयापेक्षा । वैदिकविज्ञानसापेक्ष हि वैदिकानां प्रवृत्तेस्तत्र देवत्वरूपसिद्ध्युपयुक्ताक्षरगणनापेक्षौचित्येऽपि श्रुतिरत्नोपयुक्ता या गतेरनुपयोगात् । तस्मादप्रसक्ते गतियती नाप्यै प्रसक्ते तु सेन निषार्येते । पाद व्यवस्था तु यत्नपेक्षामामपि नूनमपेक्ष्यते ।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृत दिवि ।"

इत्यादिभिर्देवेष्वपि पादव्यवस्थाया दृश्यमानत्वात् । तत्र च पादश्छन्दसो भक्ति विशेष, स च स्थूलभेदेन संपूर्ण छन्द एव वा द्वितीयस्तृतीयश्चतुष पद्यमादिको वा यथाविवक्षमपेक्ष्यते । तदनुरोधेनैव गायत्र्यादिना एकपदी द्विपदी त्रिपदीत्यादिभिः क्षुद्रमतीककुम्मतीयत्तमप्यामुरिगादिभेदैश्चानेकधात्वसाधनात् । तथा च नास्त्येव वैदिकानामप्यनुपपत्तिरिति भाव्यम् ॥

इति छन्द पदवाद

अथ छन्दःपदसहितावादः—

ननु चतुष्पथा विषमपादान्ते सन्धिकार्याण्यि दृश्यन्ते, न तथा समपादान्ते, तत्र को हेतु । अत्र वदन्ति—पद्यं हि चतुःपात्त्वसाधर्म्यात् पशुवद् द्रष्टव्यम् । पशूनां हि पार्श्वेषु द्वन्द्वं द्वन्द्वं सन्निकृष्यते चाभिमाद् द्वन्द्वात्पश्चिमं द्वन्द्वम् एवमेव पद्यानां पार्श्वेषु प्रथमं द्वयमुत्तम च द्वय पृथक् पृथक् सन्निपत्ते तस्मात्तत्र तत्र सहितावार्याण्यि भवन्ति। समपादान्ते तु संनिकर्षाभावात् संहितावार्याण्यि निवर्तन्ते, परः सन्निकर्षः संहिता इति सिद्धान्तात् ।

अथ पुन कश्चित् प्रत्यवतिष्ठते । कस्माय परः संनिकर्षः । यदि हि स्वारसिकार्थ मात्राकालाधिककालव्यवायाभावः संहितेष्टीप्यते तर्हि नूनमिहापि विषमपादान्ते संहितावार्याण्यि निवर्तेरन् मनुःप्रातिशाख्यपञ्चमाध्यायस्य प्रथमसूत्रे—"समासोऽव

ग्रहो ह्रस्वसमकाल "—इत्यनुशासनात् तदनुरोधेनैवासमस्तपदयोरध्यर्धमात्राकालस्य, यतौ द्विमात्राकालस्य, विरतौ तु सार्धद्विमात्राकालस्य, व्यवच्छेदकत्वस्वीकारापत्त्या सहिताया दूरापास्तत्वात् । अत्रोच्यते—नेदमवग्रहे तावदेकमात्राकालव्यवधानं नियम्यते । "अवग्रहे तु य कालस्त्वर्धमात्रा विधीयते"—इति याज्यवल्क्येन तत्रैवार्धमात्राकालव्यवस्थापनात् । तस्मादवग्रहे क्वचिदेकमात्रयापि व्यवच्छेद इत्यत्रैव कात्यायनतात्पर्यं लभ्यते । युक्तश्चायमर्थ । विच्छेदकालस्य न्यूनाधिकताया विवक्षाधीनतया नियमानुपपत्ते अत एव ऋक्प्रातिशाख्ये—"पदप्रकृति सहिता"—इत्याख्यायते । संहिताया पदं प्रकृति, पदस्य वा संहिता प्रकृतिरित्युभयथा सूत्रं व्याचक्षते। अर्थे क्वचित्कृतसमया संहितावर्णा पदमिति पदे वर्णस्थित्या संहितास्वरूपं प्रतिपत्तुं युक्तम् । तत्र हि व्यञ्जनयो स्वरान्तरितयो स्वरानन्तरितयोर्वा विच्छेदकालो नैकवा भवति । अत एव चावग्रहे समस्तपदे यत्यादौ च नैकरूपो विच्छेदकाल क्रमागत शक्यो नियन्तुम् । विवक्षावशाद्वर्णमैत्रीवशाच्च तारतम्यसंभवात् । यत्तु—

'स्वरान्तरितयोर्मध्यवर्ती व्यञ्जनयो स्वर ।
विच्छेदकालो मात्रा वा द्वे मात्रे तिस्र एव वा ॥ १ ॥
विच्छिद्येते व्यञ्जनेन व्यञ्जनान्तरितौ स्वरौ ।
व्यञ्जनस्वरयो कालो विच्छेदस्य न विद्यते ॥ २ ॥
संयुक्तयोर्व्यञ्जनयोर्मात्रापादोऽन्तर भवेत् ।
मात्रापादार्धविच्छेदे गुणसाङ्कर्यसभव ॥ ३ ॥
समस्तपदयोर्मध्ये विच्छेदस्त्वर्धमात्रक ।
पादोनमात्राविच्छेद पदयोरसमस्तयो ॥ ४ ॥
एकक्रियान्वये वाक्यखण्डाना मात्रयान्तरम् ।
सैकद्वित्रिचतु पादा मात्रा सापेक्षवाक्ययो ॥ ५ ॥
त्रिमात्रा वा चतुर्मात्रा सूक्तपूर्तौ विधीयते ।
अधिकारे प्रकरणे ततोऽप्यधिकमिष्यते ॥ ६ ॥
श्लोकेऽर्धमात्रा तु यतौ विरतौ मात्रयान्तरम् ।
विच्छेदे त्वत्र मात्रे द्वे अवसाये ततोऽधिकम् ॥ ७ ॥'

इत्येव केचन व्यवच्छेदनियमा प्रदर्श्यन्ते तदपि औचित्यमात्रसापेक्ष व्यवस्थानमात्रम् । वर्णमैत्रीवशाद्विवक्षावशाच्च क्वचित्तदतिरेकदर्शनात् । यथा—

जायन्ते नव सौ तथापि च नव भ्यांभिस्भ्यसा सङ्गमे
षट् संख्यानि नवैव सुप्यथ जसि त्रीण्येव तद्वच्छसि ।
चत्वार्यन्यवच सु कस्य विवुधा शब्दस्य रूपाणि त-
ज्जानन्तु प्रतिभास्ति चेन्निगदितुं पाण्मासिकोऽत्रावधि ॥ १ ॥

इत्यत्राद्यपादयतौ अर्धमात्रया द्वितीयपादयतौ पादोनमात्रया तृतीयपादयतावेकमात्रया वा व्यवच्छेदोऽवभासते । तृतीयपादान्ते त्वर्द्धमात्रयैव नैकमात्रयेति नाविदितं

भावुकानाम् । नन्वेव तर्हि विषमपादान्ते समपादान्तेऽपि या यथायिषद्य क्वचित् सन्धिकायापि प्रयतेरन् क्वचिद्वा नियतेरभित्यव्ययस्यया वपम्य स्यादिति चेन्न । द्विविधा संहिता भवति-प्राकृता संस्कृता च । या स्वाच्छन्द्येन प्रकृतिमनुयतमाना स्वारसिकी सा प्राकृता स्वतन्त्रा चाम्न्यायते । यथा दध्यानयेत्यत्रेकारोकारयो । या तु स्थलविशेषे वाचनिकी सा संस्कृता प्रकृष्टा चाम्न्यायते । सा हि नियमन प्रगृह्यादेय न कस्यचिद्विवक्षयाऽन्यथा भवति । यथा विषमपादान्ते संहिता । सा हि यद्यपि कथिद्विडम्बेन वर्णानुच्चारयेत् तथापि न निवसते प्रकृतत्वात् । यथा रामश्चित्रश्च पुमाग तदितरभागात् पृथक्कृत्य यदि चिडम्बेनापि कथिदुच्चारयेद् तथापि सा पदप्रकृति संहिता न निवसते प्रकृतत्वात् । इय समपादान्ते नाभ्युपगम्यते तस्माददोष ।

अन्येऽपि वदन्ति भिद्यते हीय संहिता वर्णाक्षरपदपादपद्यादिषु प्रत्यर्थं प्रत्यर्थं रूपभेदेन । वर्णसंहिता हि परुतारसम्बेन वर्णगुणादिक परवर्णे उच्चारयति । अक्षर संहिता तु किञ्चिद्वर्णं किञ्चिदक्षराद्यवयेनाक्षरकल्पयति । तथा पदसंहिता वर्णानन्योन्य सन्निधापयति । अखण्डपदसंहितानिवृत्तिस्तथाप्रदर्शनार्थेनोच्यते । उक्ताश्चते संहिता विशेषथमा वर्णसमीक्षायां संहितोपनिषत्प्रकरणे । तत्रेय पदसंहिता वर्णानां विडम्बे नोच्चारण तु सहते सन्धिकायप्रतिपत्तौ तु वर्णसंहिता सत्रम् । नैपात्यन्त वर्णसान्निध्यम पेक्षते राघवेणेत्यादौ पञ्चाग्राविडम्बेऽपि रेफसंहितानिय घनणत्वकायदर्शनात् । तथा चेयं सन्धिकायप्रयोजिका संहिता यावन्तं कालं सहते तावत्कालानतिपातेनैव विषमपादान्ते विधाम कर्तव्य इत्यादिद्यते । अधिक तु तत समपादान्ते दृश्यतो न तत्र सन्धिकायाणि प्रवर्तन्ते । परे त्वाहु -अतिविडम्बेनोच्चारणेऽपि विषमपादान्ते सन्धिकायापि भवन्ति । अनतिविडम्बेनोच्चारणेऽपि समपादान्ते न भवन्ति । राघवेणेत्यादौ पञ्चाग्राविडम्बेऽपि सन्धिरनुपपन्न पुनर्नतु रघुनाथादायतिसानिध्येऽपि निवसते । तस्मादसदुक्त युक्तम् । वस्तुतस्तु—

संहितैकपदे नित्या नित्या धात्वुपसगयो ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ १ ॥'

इति यथा वैयाकरणा धात्वुपसगादौ नित्यत्वं वाचनिकं फलबलादनुजानन्ति तथैव खलु विषमपादान्ते संहिताया नित्यत्व समपादान्ते तु संहिताया अविवक्षितत्व फलानुरोधादेव छान्दसिका अनुजानन्ति । तस्माच्छान्दसिकसमयसिद्ध एवायमर्थ इत्यलमतिचिन्तया ॥

इति छन्द पदसंहितावाद

यतिदोषवाद ।

ननु विभक्तिकृन्तानां पदानां विभक्ते प्राक् क्रियमाणाया यतेदुष्टत्वमन्वाख्यायते सभावकल्पते दुष्टत्वहेत्वलाभाद् । तत्तच्छन्दोवृत्ते नियतस्थानेष्वेष हि यतिमन्याचक्षते

छान्दसिका' । स्याननियमश्च वर्णमात्रान्यतरनिवन्धनो न तु विभक्तिपौर्वापर्यनिवन्धन. सभवति । विभक्त्यादीना वैयाकरणपदार्थत्वेन छन्दःशरीरे तदप्रवेशेन च छन्द.-स्वरूपसिद्धौ तदनपेक्षणात् । ऊनविंशत्यक्षरपादे शार्दूलविक्रीडितद्वादशाक्षरस्य यति-मत्त्वमन्वाख्यायते । तदिदं यदि त्रयोदशाक्षरे कृतं स्यात्तत्तर्हि युक्तो वक्तुं दोष । द्वादशाक्षरे तु कृतया यत्या छन्द स्वरूपसंपादने विभक्तिपूर्वत्वमप्रयोजकमप्रति-वन्धकं चेति । न च व्याकरणानुसारेणाप्ययं दोष' संभवति । तत्र विभक्तेः प्राग् यतिकरणप्रतिषेधाननुशासनात् । नापि व्युत्पत्तिशास्त्रानुमतोऽयं दोष. । तत्र पदयो स्वप्रयोज्यपदार्थोपस्थित्यवहितोत्तरजायमानशाब्दबोधे यद्यप्याकाङ्क्षायोग्यतेत्या-दिवदासत्ते कारणत्वमन्वाख्यायते, यतिश्चासत्तिप्रतिवन्धिनी, तथापि तावता शाब्दबोधप्रतिबन्ध स्यान्न छन्दस' स्वरूपहानि' । तत्र यतेरिष्टत्वात् । अथवा नेयं यतिरासत्तिविरोधिनी । एतावद्विलम्बेऽप्यर्थावबोधप्रतिबाधादर्शनात् । इतरथा कुत्रापि यतिमता वृत्तेनार्थावगतिर्न स्यादासत्तिप्रतिबन्धात् । अत एव परमसन्निकर्षात्मकस-हितानिवन्धनं सन्धिकार्यमपि न विरुध्यते । तस्मादस्त्येव नामविभक्त्यात्मकयो पदयोर्यत्यवरुद्धयोरप्यासत्तिरर्थबोधोपयोगिनीति न व्युत्पत्तिशास्त्रविरोध । अथाप्रयु-क्तिदोषदुष्टत्वं स्यादिति चेत्तदपि न ।

'यस्मात् क्षुब्धप्रकृतिपुरुषाभ्या महानस्य गर्भे-
ऽहङ्कारोऽभूत् खकशिखिजलोर्व्यस्तत संहतेश्च ।
ब्रह्माण्डं यज्जठरगमहीपृष्ठनिष्ठाद् विरञ्चे-
र्विश्वं शश्वज्जयति परमं ब्रह्म तत्तत्त्वमाद्यम् ॥ १ ॥'

इत्यादिष्वभियुक्तकर्तृकप्रयुक्तिविषयतादर्शनात् । तस्माद्विभक्तिकृतपदे यतिप्रतिषेधो निर्मूल इति चेदत्रोच्यते ।—

इह हि छन्दोवृत्तजाते मात्रावर्णान्यतरनियतस्थाने यति कर्तव्या इत्येको विधि' । सा च यतिर्नामविभक्तिमध्यवर्तिनी यथा स्यात्तथा विभक्तिकृतपदं न प्रयोज्यमित्यपरो विधि । तत्र छन्द स्वरूपं स्वाभिव्यञ्जकवर्णपरम्परामात्रसापेक्षं यद्यपि तत्तद्वर्णसमष्टेरर्थ नापेक्षत इति पूर्वेणैव विधिना छन्द सिद्धि कृतार्था भवति तथापि सार्थकपदवि-न्यासेन छन्द स्वरूपं सम्पिपादयिषून् प्रत्ययमपरो विधिरुपतिष्ठेत यत्यंवरुद्धं विभक्ति-कृतपदं न प्रयोज्यमिति । अयं भाव । पदं द्विविधं यतिकृतमर्थकृतं च । तदुभयवि-धमेवानवच्छिन्नवर्णपरम्परासापेक्षमित्यवश्यं यतियोग्यस्थाने विभक्तिकृतपदप्रयोगे विप्रतिषेध. प्राप्नोति ।

अर्थानुरोधिनी हि पदयतिर्विभक्त्यन्ते स्थानं लभत इत्यवश्यं विभक्ते प्रागनवच्छे-दमपेक्षते । अथ छन्दोऽनुरोधिनी पदयतिस्तत्र विभक्ते प्रागेव स्थानं लभत इत्यवश्यं विभक्तिविभक्तिमतोरनवच्छेदं प्रतिपेधति । तत्रेदं द्वैधमिव स्यात्—अर्थगतिमनपे-क्षमाणो हि प्रयोजयिता छन्द स्वरूपमात्रदिदर्शयिषया प्रवर्तमानोऽवश्यं छान्दसयति

प्राधान्याद् विभक्ते प्रागेव छन्दोनियताक्षरे यतिमासादयेदित्यर्थमपेक्षमाणस्य श्रोतुरमनोरञ्जन स्याद् ॥ १ ॥

अथार्थबुबोधयिषयैव प्रवर्तमानस्तु नूनमर्थानुरोधेनैव छन्दोवृत्त प्रयोजयमार्थिक यतिप्राधान्याद् विभक्त्यन्ते यतिमासादयेदिति छन्दोयाथात्म्यमपेक्षमाणस्य श्रोतुरमनो रञ्जन स्याद् ॥ २ ॥ सेयमनवस्थादुस्थि । अत स्याने कृत विभक्तिकृतपदे यतिप्रतिषेध शास्त्रमिति सिद्ध ॥

इति यतिदोषवाद ।

अथ पश्चाद्भूतावादः—

ननु यदि सर्वस्यैवार्थजातस्यैकान्ततश्छन्दोयद्धत्व स्वीक्रियते तत्तर्हि नूनमिदं छन्दो ऽपि छन्दोवद् स्यात् स तर्हि पद्यच्छन्दोवेद किमिति पद्याद्भ एवोच्यते न च्छन्द सा पद्यभ्र प्रतिषिध्यीयते । अथ यदि नेद छन्दश्छन्दोपद्यमिति मन्यसे तत्तर्हि छन्दस सर्वानुगतस्वप्रतिज्ञाहानिरिति चेत्सत्यम् । यथेद ब्रह्मणो व्यापकत्व मन्यन्ते तथेदं द्रष्ट व्यम् । यदि नामास्य ब्राह्मणो ब्रह्मवृत्तित्वमास्मायते तत्तर्हि द्वैतं भवति । अद्वितीयं तु ब्रह्मेत्याचक्षते ब्रह्मविद । यदि तु ब्रह्मवृत्तित्वं नास्तीत्यभिमन्यते तत्तर्हि तस्य व्यापकत्वप्रतिज्ञाहानि प्रसज्यते । अथ यथनवस्थादोषात् तेन शब्दप्रमाणादि यदस्य ब्रह्मण स्वरूपेणावभासमानस्य नेतरापेक्षेत्युच्यते तत्तर्हि तुल्यं छन्दोवेदे ऽपि । स्वरूपेणैव छन्दसां छन्दोवद्धत्वादितरच्छन्दोऽनपेक्षणात् । परे त्वाहु—भवति नूनं गद्यपद्यपरिच्छित्तिर्नाम छन्दसां छन्दो लिप्यक्षरपरिच्छित्तेश्छन्दोलिपिच्छन्दस्त्व वत् । सा चाक्षरपरिच्छित्ति प्रत्ययो भवति । यया परिच्छिन्नानामनेकेषामायतन साम्येन प्रवर्तनं दृश्यते । आयतनमेव तस्मात्तीयेतरायतनसाम्यापेक्षया अक्षरपरिच्छि-त्तिरित्युच्यते । अवश्यं हि सर्वस्याप्येतस्य वस्तुजातस्य स्वरूपसंपादनायान्योन्येन प्रवर्तमानस्य कथिदक्षा भवति । तेनाक्षरेण प्रक्रममाणस्य सौकर्यं सौन्दर्यं चानुभूयते । स्वमार्गात् प्रच्यवमानस्य च तस्य क्लिष्टत्वं कुरूपत्व च जायते । तस्मादयमक्षरो गद्यछन्दसां छन्द । मन्येवं तर्हि पद्यच्छन्दोवेदस्य पद्भिरहैर्भवितव्यमिति चेत्सत्यम् । अस्ति पद्भ्यो वेदत्वात् । वेदस्य पद्भ्यस्त्वनियमात् । स्वल्पविषयत्वात्तु नायमक्षरयोग पार्थक्येनेह निरूपित इति द्रष्टव्यम् ॥

इति छन्दोवेदपद्याद्भवाद ।

अथ छन्दोविज्ञानसार्थकत्वावाद ।

इदं तावच्छन्दोविज्ञानशास्त्रमनारम्भणीयमनर्थकत्वात् । चतुर्वेदं हि शास्त्रमा रभ्यते—अविज्ञातार्थज्ञापनार्थं हेयार्थनिरसनार्थं सामर्थ्यविशेषोद्रेकार्थमितरवेदोपकारार्थं चेति । तत्रेद छन्दोविज्ञानशास्त्र नैषामन्यतमं कर्मप्यर्थं संसाधयितुमीष्टे—

(१) कस्तावच्छन्दसामविज्ञातोऽर्थ शास्त्रेण विज्ञाप्य. । स्वरूपं वा नामधेयं वा प्रयोगनियमो वा छन्दोविज्ञानमात्रेणाभ्युदययोगो वा । नाद्य· । ऋङ्मन्त्रादिपाठाद् वैदिकानां काव्यादिपाठाद् लौकिकाना यावत्प्रयुक्तच्छन्दसा स्वरूपस्य प्रतिपत्तिसौलभ्यात्, प्रयुक्तातिरिक्तच्छन्दसां तु वैदिकानामनभिधानमेव लौकिकाना पुन साकल्येन विज्ञानस्येहाप्यसंभवोऽनन्तत्वात् "शेष प्रचित ।" "अत्रानुक्तं गाथा" इति सूत्राभ्यां पिङ्गलेन विशेषत सर्वच्छन्द स्वरूपनिर्वचनाशक्यत्वप्रतिबोधनात्,

"कश्छन्दसा योगमावेद धीर को धिष्ण्या प्रति वाचं पपाद ।
कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य निचिकाय क स्वित् ॥" (१०।१०।११४॥९।)

इति मन्त्रयता भगवता वेदपुरुषेणापि सर्वात्मना छन्दोयोगविज्ञानस्याशक्यत्वप्रतिबोधनात् ॥ १ ॥ न द्वितीय·—नामविशेषेण छन्द स्वरूपे विशेषाधानादिच्छानुरोधितया तादृशतुच्छफलार्थमेतावतो महत शास्त्रौघस्यारम्भानावश्यकत्वात् ॥ २ ॥ न तृतीय —अमुष्मिन्नवकाशे स्रग्धरैव प्रयोक्तव्या न शार्दूलविक्रीडितं मन्दाक्रान्ता वेत्येवं विध्यभावात्, तत्तच्छन्द प्रयुक्तावद्यापि लोके कामचाराच्च ॥ ३ ॥ न तुरीय — छन्दोविज्ञानमात्रेणादृष्टाभ्युदयकल्पनाया निर्बीजत्वात् । तस्मान्नाविज्ञातार्थज्ञाप्नार्थं छन्दोविज्ञानशास्त्रमारम्भणीयं भवति ।—

(२) अथ न हेयार्थनिरसनायापीदं शास्त्रमुपयुज्यते । गौ शब्दः प्रयोक्तव्यः साधुत्वान्न गावी गोणी गोता गोपोतलिकेत्येवमादयोऽसाधुत्वादिति हि यथा व्याकरणशास्त्रेण साधुशब्दान्वाख्यानेनासाधुशब्दाना हेयत्वं विधीयते न तथानेन छन्द·-शास्त्रेण छन्दसा साधुत्वासाधुत्वाभ्यामुपादेयहेयव्यवस्था क्रियते प्रस्तारसिद्धस्वरूपातिरिक्तस्य हेयस्याप्रसिद्धे. । ट ण ठं ड्ढ ढे न यत्र च्छन्द सिद्धिस्तत्र प्रमादतोऽप्येकडकाराधिक्ये टणठं डाढेनापि छन्दोऽन्तरसिद्धि सभवत्येव, न च तत्र शास्त्रविरोधं पश्याम । तस्माच्छन्द सिद्धौ हेयोपादेयव्यवस्याराहित्यादनर्थकमिदं छन्द शास्त्रम् ॥

(३) अथ न च्छन्द शास्त्रमध्येतुस्तदध्ययनेन कश्चन सामर्थ्यसमुद्रेको दृष्ट । हेयनिरसनपुर सरमुपादेयमुपाददानो हि व्यवहारकुशल साधीयसाभ्युदयेन युज्येत, वियुज्येत चानिष्टकरेणेति तत्रास्य सामर्थ्यमुद्भूतमिव विज्ञातं स्यात् । न चेह तया छन्द शास्त्रे हेयोपादेयव्यवस्था पश्यामस्ततो नैतदध्ययनेन कथंचित्कुत्रचिदर्थे सामर्थ्यातिरेकमनुभावयाम ॥—

(४) अथ नेतरवेदोपकारकत्वमप्यस्य शास्त्रस्य सभवति । यथा हि—नाट्यवेदोपकारको नृत्यवेद , नृत्यवेदोपकारको वाद्यवेद , वाद्यवेदोपकारकश्च गेयवेद । यथा वा वाग्वेदाङ्गवेदक्रियावेदा सर्ववेदोपकारका इष्यन्ते ।—न च तथेह कश्चिद्वेदं पश्यामो योऽन्तरेण छन्दोविज्ञानमपर्याप्त· स्यात् ॥

ननु चास्ति यजुर्वेदो योऽन्तरेण छन्दोविज्ञानमपर्याप्त स्यात्, तथाहि—गवामयने पूर्वस्मिन् पक्षनि एकचत्वारिंशदधिकशतसख्याकेषु चतुर्विंशाभिद्धविकस्वरसामाभिधा-

16823 L

नेष्वहःसु प्रथमसाम्नोऽभिवर्तस्यैकत्वेऽपि प्रगाथा प्रत्यहं भेदेन प्रयुज्यन्ते । तत्र के ते स्तोत्रीया प्रगाथा इत्याकाङ्क्षायाम् "पञ्चसु मा सु वाहसा प्रगाथा आप्यन्ते । तेष्वा तेषु छन्दसी संयुज्यैतव्यम् । चतुरुत्तरैरेव छन्दोभिरेतव्यम् । तदाहुरनवह्वसानि वा एतानि छन्दांसि माप्यन्दिने, बृहत्या चैव त्रिष्टुभा चैतव्यम्"—इत्येष ताण्डिश्रुतौ दाशतयीसमाम्नातेनाथर्विसविशतप्रमितप्रगाथबृचसमुदायेन तावद्रहःसु प्रगाथलाभे व दतिरिक्तेषु त्रयोदशस्वहःसु प्रगाथलाभार्थं त्रय पक्षा विधीयन्ते । ते चैते प्रगाथा न थान्तरेण शास्त्रमप्यधस्तिनु शक्त्या —नापि वा तमन्तरेण प्रगाथप्रयोग ज्योतिष्टोम पर्यौम्नोति एवमितरत्राऽप्येकान्ततश्छन्दोविज्ञानमपेक्ष्यते प्रतिपद्यम्। अत एव च यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणु वच्छेति गर्तं वा पात्यते प्रमीयते वा पापीयान् भवति तस्मादेतानि मन्त्रे मन्त्रे विद्यात्' इति श्रूयते

'मन्त्राणां दैवत छन्दो निरुक्तं ब्राह्मणान् ऋषीन् ।
कृत्तद्धितादीन्याख्यातं यजन्तो यागकण्टका ॥ १ ॥
अविदित्वा ऋषिच्छन्दोदैवत योगमेव च ।
योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु स ॥ २ ॥
ऋषिच्छन्दोदैवतानि ब्राह्मणार्षं स्वराद्यपि ।
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते ॥ ३ ॥

इति स्मर्यते च । भगवान् कात्यायनोऽप्याह— छन्दांसि गायत्र्यादीनि एतान्यवि दित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजति याजयते तस्य ब्रह्म निर्वीर्यं यातयाम भवति अथान्तरा श्वगर्तं वापद्यते स्थाणु वच्छेति प्रमीयते वा पापीयान् भवति अथ विद्यायैतानि योऽधीते तस्य वीर्यवत्—अथ योऽर्षेयादीनां वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते' इति ॥ तस्मात् सन्त्येव भूयांसि छन्द'शास्त्रस्य प्रयोजनानि तद्विज्ञानमन्तरेण चार्यं मन्त्रवेदो निर्वीर्यो यातयामो भवति तस्मादस्ति मन्त्रवेदोपकार कत्व छन्द'शास्त्रस्य—

यदपि दृष्टान्तमुद्दिश्य नाव्यवृत्तमवाद्यगेयवेदानामुत्तरोत्तरस्य पूर्वपूर्ववेदोपकारकत्वमा म्नायते तावतापि छन्दोवेदस्यैव सर्वोपकारकत्वमाम्नातं भवति गेयवेदस्य छन्दो वेदानतिरिक्तत्वात् । तस्मादस्ति वाद्यादिवेदोपकारकत्वं छन्द'शास्त्रस्य ॥—

अथ किं बहुना शिल्पविद्या लोकनितान्तफलोपधायकतया प्रतिपद्यते सैषा नूनमर्थच्छन्दोविद्योपजीव्या भवति अर्थच्छन्दोविद्यानतिरिक्तैव वा । शिल्प छन्द इति श्रुते । सर्वे वेद सचराचरं जगन्मण्डल दृश्यते विश्वकर्मीय शिल्पम् । तथा प्राणिजा तैरपि क्रियमाण तत्तत्कर्म दृश्यते शिल्पमेवानुच्छम्बितम् । सर्वे च विद्यानिबन्धा रच नाविच्छिन्नात्मकेन केनापि शिल्पेनैवानुगता भवन्ति । तस्माच्छिल्पविद्यात्मनाप्यस्त्येव सर्ववेदोपकारकत्व छन्द'शास्त्रस्य ॥ १ ॥

यदप्युक्तं नास्य छन्द.शास्त्रस्य विज्ञातृषु सामर्थ्यविशेषोद्रेकादिफलोपधायकत्वमस्तीति तदप्यत एव प्रत्याख्यातं भवति "अविदित्वा योऽधीते तस्य ब्रह्म निर्वीर्यं स पापीयान् भवति अथ विज्ञायैतानि योऽधीते तस्य ब्रह्म वीर्यवत् स जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते"—इत्येवमाचक्षाणेन भगवता कात्यायनेनान्वयव्यतिरेकाभ्या छन्दोविज्ञाने एव यज्ञवेदसाध्ययावत्फलोपधायकत्वप्रतिपादनात् । श्रूयते चाभ्युदयसमर्पकत्वं छन्दोविज्ञानस्य । तथाहि—"तस्योष्णिग् लोमानि, त्वग् गायत्री, त्रिष्टुब्मासम्, अनुष्टुप् स्नावानि, अस्थि जगती, पङ्क्तिर्मज्जा, प्राणा वृहती, स छन्दोभिरछन्न । यच्छन्दोभिरछन्नस्तस्माच्छन्दासीत्याचक्षते ।" इत्याख्याय "छादयन्ति ह वा एनं छन्दासि पापात्कर्मणो यस्या कस्याचिद्दिशि कामयते" इत्यारण्यके समाम्नायते तस्मात् पुरुषस्य पापसबन्धं वारयितुमाच्छादकत्वाच्छन्द इत्युच्यत इत्यस्ति प्रयोजनं छन्द शास्त्रस्य ॥

तथा तैत्तिरीया अप्यामनन्ति—"प्रजापतिरग्निं चिनुते स क्षुरयाविर्भूत्वा तिष्ठन् तं देवा बिभ्यतोपायन् ते छन्दोभिरात्मानं छादयित्वोपायन् तच्छन्दसा छन्दस्त्वम्"—इति । तस्माच्चीयमानाग्निसन्तापस्य छादकत्वाच्छन्दस्त्वमित्यस्ति प्रयोजनं छन्द.शास्त्रस्य । तथा छान्दोग्योपनिषदि श्रूयते—"देवा वै मृत्योर्बिभ्युस्त्रयीं विद्या प्राविशन् ते छन्दोभिरात्मानमाच्छादयन् यदेभिराच्छादयंस्तच्छन्दसा छन्दस्त्वम्"—इति तस्मादपमृत्युं वारयतीति छन्द इत्युच्यते । ततोऽस्ति प्रयोजनं छन्द शास्त्रस्य । अथान्यो मन्त्रवर्ण श्रूयते "गायत्रेण च्छन्दसा त्वा छादयामि त्रैष्टुभेन च्छन्दसा त्वा छादयामि जागतेन च्छन्दसा त्वा छादयामि" इति ततश्छन्दसामेषा रक्षानुकूलसवरणसाधनत्वादस्ति प्रयोजनं छन्द शास्त्रस्य ॥ २ ॥

अथ पुरा असुरै पराभूता सुरा यदेभिर्गायत्रादिभि· स्वमात्मानं प्रच्छाद्य पुनस्तान् जिग्युस्तच्छन्दसा छन्दस्त्वमिति वृद्धपराशराद्युक्तेश्छन्द सवृतशरीरस्य शत्रुपरिभावकत्वं विजयशालित्वं च ससिद्धं भवतीत्यस्ति प्रयोजनं छन्द शास्त्रस्य । स्मर्यते चायमर्थो भगवता कात्यायनेनापि सर्वानुक्रमणीसूत्रे—"अर्यैप्सव ऋषयो देवताश्छन्दोभिरुपाधावन्"—इति । अन्नपुत्रादिमोक्षान्तं फलमात्माधीनं कर्तुमिच्छन्तो मधुच्छन्द.प्रभृतय संवननान्ता ऋषयो देवता सूक्तहविर्भागिभश्छन्दोभिर्गायत्र्यादिभिरुपायभूतैस्तद्युक्तमन्त्रैर्वा 'अर्थस्य प्राप्तावयमेवोपाय इति दृढसकल्पा. श्रद्धयागच्छन्निति-हि तदर्थमाह षड्गुरुशिष्योऽपि । अन्यच्चायमाह—

'ऋषिनामार्षगोत्रज्ञ ऋषे. सस्थानतामियात् ।
एकैकस्य ऋषेर्ज्ञानात् सहस्राब्दा स्थितिर्भवेत् ॥ १ ॥
छन्दसा चैव सालोक्यं छन्दोज्ञानादवाप्नुयात् ॥ २ ॥
तस्यास्तस्या देवतायास्तद्भावं प्रतिपद्यते ।
या या विजानाति नरो देवतामिति निर्णय ॥ ३ ॥
ऋष्यादिविज्ञानफलमनुभूय सुपूजितः ।
स्वाध्यायस्य फलं पश्चाच्छ्रुत्या दत्तं प्रपद्यते ॥ ४ ॥' इति ।

तस्मादप्युत्रादिमोक्षान्तफलसाधनत्वादस्ति प्रयोजन छन्द शास्त्रस्य ।

अथ यदुक्त छन्द सिद्धौ हेयोपादेयव्यवस्याराहित्यादनर्थकमिद छन्द शास्त्रमिति तदप्यत एव नावकल्पते । सर्वं हि विधिवाक्य सावधारण भवति न चावधारणमन्तरेतर निश्चितिमन्तरा दृष्टम् । यत्तर्हि छन्दोविधायक शास्त्रमतो नूनमितरवारकेणानेन भवितव्यमिति सिद्ध हेयोपादेयव्यवस्याप्रयोजकस्य छन्दःशास्त्रस्य । सा च हेयोपादेयव्यवस्था त्रेधा ।—विज्ञातव्यान्येव छन्दांसि न तु न विज्ञातव्यान्यपीति—विज्ञायैव च जपहोमयज्ञादिषु प्रवर्तेत न त्वविज्ञायापीति भाषामात्रातिरेकप्रधाना त्रैका ॥ १ ॥ अथ 'अनुष्टुभा यजति बृहत्या गायति गायत्र्या स्तौतीति" श्रूयते तत्रानुष्टुभैव यजेत न बृहत्या न गायत्र्या तथा बृहत्यैव गायेत नान्यथा एव गायत्र्यैव स्तुवीत नान्यथेत्येव विजातीयमात्रद्वयातिरेकप्रधाना द्वितीया ॥ २ ॥ अथ— पादस्यानुष्टुप् वक्रम्' न प्रथमात् स्त्री ।" 'द्वितीयचतुर्थयोरर्थेति" सूत्रेभ्यो 'वक्रेषु तथा" स्मरा अदमाप्या र्दम् ।" अत्रायुङ्नज् पष्टो त्रिति" सूत्रस्य आयासप्रधाना तृतीया ॥३॥ यदि चेद शास्त्र न स्यादवस्य तत्तर्हि तेष्वेतेषु कामचार स्यादनर्थ प्रपद्येत । ततो नु खलु हेयान् हापयितुमुपादेयान् संचारयितुमुपदिशन्ति स्म ते कारुणिका भगवन्त आप्तायां ॥—॥ ३ ॥

(१) अथ यदप्युक्त नाविज्ञाताथज्ञापनार्थमिद शास्त्रमारब्धव्यमिति एतदप्यत एव प्रत्याख्यात वेदितव्यम् । अन्तरेण शास्त्रारम्भमसम्भवाच्छन्द खल्वप्यागमस्यैकान्तमुपयुक्तस्य ॥ 'अनुष्टुभा यजति बृहत्या गायति गायत्र्या स्तौतीति' श्रूयते । तत्र न ज्ञायते कानुष्टुप् का बृहती का गायत्रीति । अज्ञात्वा प्रवर्तमानश्च पापीयान् स्यात् । यत्रापि सतोबृहती महाबृहती महासतोबृहतीत्याऽऽम्नायन्ते तत्रैतांस्तावच्छान्दसिको बृहतीविकारान् प्रतिपद्येत । छान्दसिकश्च पादविशेषव्यवस्थया पङ्क्तिविकारः सतो बृहती त्रिष्टुब्विकारो महाबृहती, जगतीविकारो महासतोबृहती इत्येवमप्यवस्यति । तथा च साधु यज्ञे प्रवर्तते । अन्यथा प्रवर्तमानस्यैतानि छन्दांसि यातयामानि स्युरित्यवश्यमेषां स्वरूपज्ञानायोपयुज्यते छन्दःशास्त्रारम्भः ॥ १ ॥

यदपि तैत्तिरीयका आमनन्ति— तद्यदाह वै सूतग्रामण्यः—एव छन्दांसि । तेष्व सावादित्यो बृहतीरभ्यूह । सतोबृहतीषु स्तुवते सतोबृहत् प्रजया पशुभिरसानीत्येव' —इति तत्र प्रजया पशुभिरित्याह सन्मार्गवर्तिन पुरुषादधिको भवानीत्याशयेन सतो बृहत्या स्तौतीत्यर्थप्रतिपत्तेरवश्यमर्थापेक्षित्वमुपदिश्यते नामधेयस्येति नामधेयागमा र्थमुपयुज्यते छन्दःशास्त्रारम्भः ॥ २ ॥

अथामनन्ति— व्यतिषत्काभिः स्तुवते' —इति । न चान्तरेण छन्दोवेदमन्त्र शक्या व्यतिषत्का कर्तुमित्युपयुज्यते छन्दःशास्त्रारम्भः ॥ ३ ॥

भूयोसध्यार्थवादा श्रूयन्ते छन्दोवेदस्येति तत्तदभ्युदयसिद्धयुपयुज्यते शास्त्रारम्भः॥४॥

इमानि च भूयश्छन्दोऽनुशासनस्य प्रयोजनानि यान्यत ऊर्ध्वमनुक्रमिष्यामः। बह्वृचाना श्रुतौ तावदाम्नायते—"प्रजापतिर्वै यज्ञं छन्दासि देवेभ्यो भागधेयानि व्यभजत्। स गायत्रीमेवाग्नये वसुभ्य प्रात सवनेऽभजत्—त्रिष्टुभमिन्द्राय रुद्रेभ्यो मध्यन्दिने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवने। अथास्य यत् स्वं छन्द आसीदनुष्टुप्—त्वं न्वेव देवानां पापिष्ठोऽसि, यस्य तेऽहं स्व छन्दोऽस्मि या मोदन्तमभ्युदौहीरच्छावाकीयामभीति। तदजानात् स स्वं सोममाहरत् स स्वे सोमेऽग्र मुखमभिपर्याहरदनुष्टुभम्। तस्मादनुष्टुवग्निया मुख्या युज्यते"—इति। तदेतच्छन्दोवेदं विद्वांसमन्तरेण कोऽन्य शक्नोत्येतदर्थं विज्ञातुमतो दिव्यवेदार्थप्रतिपत्त्यर्थमारम्भणीयश्छन्दोवेद ॥ १ ॥

अथो पञ्चवीर्यं वा एतच्छन्दो यद्विराद् यत्रिपदा तेनोष्णिहा गायत्र्यौ यदस्या एकादशाक्षराणि पदानि तेन त्रिष्टुभ्। यत् त्रयस्त्रिंशदक्षरा तेनानुष्टुप्। न वा एकेनाक्षरेण छन्दसा वीर्यमवरुन्धे सर्वैषा छन्दसा वीर्यमश्नुते सर्वैपा छन्दसा सायुज्यं सरूपता सलोकतामश्नुते। अन्नादोऽन्नपतिर्भवति अश्नुते प्रजयान्नाद्यं य एव विद्वान् विराजौ कुरुते—इत्येवं विराजोऽर्थवाद श्रूयते स न पञ्चवीर्यत्वमवगन्तुं शक्नोत्यन्तरेण च्छन्दोवेदमित्यारम्भणीयश्छन्दोवेद ॥ २ ॥

सर्वैश्छन्दोभिर्यजेदित्याह। "सर्वैर्वै छन्दोभिरिष्ट्वा देवा स्वर्ग लोकमजयंस्तयैवैतद्यजमान सर्वैश्छन्दोभिरिष्ट्वा स्वर्गं लोकं जयति। एतानि वाव सर्वाणि छन्दासि गायत्रं त्रैष्टुभं जागतमन्वन्यानि। एतानि हि यज्ञप्रतिमामिव क्रियन्ते। एतैर्हवा अस्य छन्दोभिर्यजत सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद"—इति हि श्रूयते। तत्र किं तावत्सर्वैपा छन्दसा स्वरूपं कानि वान्यानीति न तत्त्वत शक्नोत्यवधारयितुमच्छान्दसिको न वा यष्टुमित्यारम्भणीयश्छन्दोवेद ॥ ३ ॥

"स एवं विद्वांश्छन्दोमयो देवतामयो ब्रह्ममयोऽमृतमय. सभूय देवता अप्येति य एवं वेद। यो वै तद्वेद यथा छन्दोमयो देवतामयो ब्रह्ममयोऽमृतमय सभूय देवता अप्येति तत् सुविदितमिति" श्रूयते। तदेतस्य छन्दोमयस्य देवताप्ययो यथा भवति तथा ज्ञानं हि सुज्ञानमित्यस्माकं सुज्ञानं यथा स्यादित्यारम्भणीयश्छन्दोवेद ॥ ४ ॥

"तद्यदाग्नेन्द्रया यजति विजित्या एव सा विराट् त्रयस्त्रिंशदक्षरा भवति त्रयस्त्रिंशद्वै देवा—अष्टौ वसव एकादश रुद्रा· द्वादशादित्या प्रजापतिश्च वषट्कारश्च। तत् प्रथम उक्थमुखे देवता अक्षरभाज· करोति अक्षरमक्षरमेव तद्देवता अनुप्रापिवति देवपात्रेणैव तद्देवतास्तृप्यन्ति" इति श्रूयते तदेवं देवता यद्यक्षरभाज कल्प्यन्ते तत्तर्हि नान्तरेणाक्षरच्छन्दोविज्ञानमेता विज्ञातुं शक्यन्ते तदेताश्छन्दोभिर्यथा विजानीयामित्यारम्भणीयश्छन्दोवेदः ॥ ५ ॥

"म्रन्तो'वा एताभिर्देवा· पुरो भिन्दन्त आयन्, यदुपसद सछन्दस. कर्तव्या न विछन्दसः। यद्विछन्दस कुर्याद् ग्रीवासु तद्दण्डं दध्यादीश्वरो ग्लावो जनितो।

तस्माद् सछन्दस एव कर्तव्या न विछन्दस "—इत्युपसदां सछन्दस्त्वकरणमनुक्रामते तदन्तरेण छन्दोवेदमशक्त्य सछन्दस्त्वकरणमित्यारम्भणीयश्छन्दोवेद ॥ ६ ॥

'गायत्रीं ब्राह्मणस्यानुब्रूयात् । गायत्रो वै ब्राह्मणः । तेजो वै ब्रह्मवर्चसं गायत्री । तेजसैवैन तद्ब्रह्मवर्चसेन समर्धयति त्रिष्टुप् राजन्यस्यानुब्रूयात् त्रैष्टुभो वै राजन्य । ओजो वा इन्द्रिय वीर्यं त्रिष्टुप् । ओजसैवैन तदिन्द्रियेण वीर्येण समर्धयति । जगतीं वैश्यस्यानुब्रूयात् । जागतो वै वैश्य । जागता पशव । पशुभिरेवैनं तत्समर्धयति"—इति श्रूयते । तत्र गायत्र्या ब्रह्मवर्चसं तेजस्त्रिष्टुभा त्विन्द्रिय वीर्यमोजो जगत्या च पश्वादय पदार्था लक्ष्यन्ते । तदन्तरेण गायत्र्यादिविज्ञानमशक्त्यमर्थां विज्ञानमित्या रम्भणीयश्छन्दोवेद ॥ ७ ॥

चतुरुत्तरैर्वै देवाश्छन्दोभि सयुग्भूत्वा एतां श्रियमारोहन् यस्यामेत एतर्हि प्रतिष्ठिता । अग्निर्गायत्र्या—सवितोष्णिहा—सोमोऽनुष्टुभा—बृहस्पतिर्बृहत्या—मित्रा वरुणौ पङ्क्त्येन्द्रस्त्रिष्टुभा—विश्वेदेवा जगत्या । त एत अभ्यनूच्येते—अग्निर्गायत्र्यभवत् सयुग्वेति । कल्पते ह वा अस्मै योगक्षेम । उत्तरोत्तरिणीमिह श्रियमश्नुते अश्नुते प्रजानामैश्वयमाधिपत्य य एवमेता अनुदवता एतामासन्दीमारोहति क्षत्रियः सभिति" हि श्रूयते । तत्र देवताछन्दसो सयुक्त्वास्थानादुत्तरोत्तरिणीं श्रियं प्रजामैश्वयमाधि पत्य चापेक्षमाणानामवश्यमेषां छन्दसां चतुरुत्तरत्वविज्ञानमपेक्षित भवतीत्यारम्भणी यश्छन्दोवेद ॥ ८ ॥

यद् गायत्रे अधिगम्यत्रमाहित त्रैष्टुभाद्वा त्रैष्टुभ निरतक्षत, यद्वा जगत्यगस्यादित पद य इत्तद्विदुस्ते अमृतत्वमानशु । इत्यतद्वै तत्छन्दश्छन्दसि प्रतिष्ठापयेति कल्प यति वेदविदो य एव वेदेति श्रूयते । तदतश्छन्द प्रतिष्ठापद विदित्वामृतत्वमश्नुवीर्यै त्यारम्भणीयश्छन्दोवेद ॥ ९ ॥

त सप्तभिश्छन्दोभि प्रातरुपयन् । तस्मात् सप्तचतुरुत्तरापि छन्दांसि प्रातरनुवाकेऽ नूच्यन्ते । इति हि तैत्तिरीयका आमनन्ति । मैत्रायणीनामप्यराद्धिविधावप्याम्नायते । 'देवेभ्य प्रातर्यावभ्योऽनुब्रूहीति छन्दांसि वै देवा प्रातर्यावाण । छन्दोभ्यो वा एतद् अनुवाच आह' –इति । तथा चैतरेयकेऽपि—

देवेभ्य प्रातर्यावभ्योऽनुब्रूहीत्याहाश्वर्यु । एते वाव देवा प्रातर्यावाणो यदग्निरपा मश्विनौ । त एते सप्तभि सप्तभिश्छन्दोभिरागच्छन्ति । आस देवा प्रातर्यावाणो ह्य गच्छन्ति य एव वेद सप्तामेयानि छन्दांस्यन्वाह सप्तोपस्थानि छन्दांस्यन्वाह सप्ता श्विनानि छन्दांस्यन्वाह—सप्तपदा वै बार्हतम् । तावद्वै बार्हतम् सर्वस्मै वाव सर्वस्य ब्रह्मणः परिगृहीत्यै । तिस्रो देवता अन्वाह । त्रयो वा इमे त्रिवृतो लोका । एषामेव लोकानामभिजित्यै । तदाहु—कथमनूच्य प्रातरनुवाक इति । यथाच्छन्दसमनूच्य प्रातरनुवाक । प्रजापतेर्वा एतान्यङ्गानि यच्छन्दांसि । एष उ एव प्रजापतिर्यो यजते । इति श्रूयते । न चैतच्छन्दोविज्ञानमन्तरेणानुवचनं साधीय सेभवतीत्यारम्भणीयश्छन्दोवेद ॥ १० ॥

'तदाहु स वै होता स्याद्य एतस्यामृचि सर्वाणि छन्दासि प्रजनयेदिति । एषा वाव त्रिरनुक्ता सर्वाणि च्छन्दासि भवति । एषा छन्दसां प्रजाति ।" इति श्रूयते । तदतश्छन्द प्रजननविद्याया होतृत्वमासादयेयमित्यारम्भणीयश्छन्दोवेद ॥ ११ ॥

"अग्निर्वै देवानामवमो विष्णु परमस्तदन्तरेण सर्वा अन्या देवता । आग्नावैष्णव पुरोडाशं निर्वपन्ति दीक्षणीयमेकादशकपालं सर्वाभ्य एवैनं तद्देवताभ्योऽनन्तरायं निर्वपन्ति । अग्निर्वै सर्वा देवता विष्णु सर्वा देवता एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च । तद्यदाग्नावैष्णवं पुरोडाशं निर्वपन्ति । अन्तत एव तद्देवानृध्नुवन्ति । तदाह—यदेकादशकपाल· पुरोडाशो द्वावग्नाविष्णू । कैनयोस्तत्र कृप्ति , का विभक्तिरिति । अष्टाकपाल आग्नेयोऽष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्द त्रिकपालो वैष्णवस्त्रिर्हीद विष्णुर्व्यक्रमत । सैनयोस्तत्र कृप्ति सा विभक्तिरि"त्याम्नायते । तत्रैवमेकादशकपाले देवतयो· कृप्तिविभक्ती कर्तुं पारयेमेत्यारम्भणीयश्छन्दोवेद ॥ १२ ॥

"तेजो वै ब्रह्मवर्चस गायत्री ॥ १ ॥ आयुर्वै उष्णिग् ॥ २ ॥ वाग्वा अनुष्टुप् ॥३॥ श्रीर्वै यशश्छन्दसा वृहती ॥ ४ ॥ पाङ्क्तो वै यज्ञ ॥ ५ ॥ ओजो वा इन्द्रियं वीर्यं त्रिष्टुप् ॥ ६ ॥ जागता पशव ॥ ७ ॥" इति श्रूयते । तदतस्तत्तच्छन्दोयाज्यामनुरुन्धाना यथा तत्तत्कामेषु कृतकृत्या स्युरित्यारम्भणीयश्छन्दोवेद ॥ १३ ॥

"ते देवा अब्रुवन्—विराड्याज्यास्तु निष्कैवल्यस्य । या त्रयास्त्रिंशदक्षरा । त्रयस्त्रिंशद्वै देवा । अष्टौ वस्तव । एकादश रुद्रा । द्वादशादित्या प्रजापतिश्च वषट्कारश्च । देवता अक्षरभाज· करोति । अक्षरमक्षरमेव तद्देवता अनुप्रपिवन्ति देवपात्रेणैव तद्देवतास्तृप्यन्ति ।यं कामयेत—अनायतनवान् स्यादिति—अविराजास्य यजेद् गायत्र्या वा त्रिष्टुभा वान्येन वा छन्दसा वषट् कुर्यादनायतनवन्तमेवैन तत्करोति । यं कामयेत—आयतनवान् स्यादिति । विराजास्य यजेदायतनवन्तमेवैन तत्करोति ।"—इति श्रूयते । तदन्तरेण छन्दोवेदमवाक्यं तु यथाकामं याज्या विशेषोपधानमित्यारम्भणीयश्छन्दोवेद ॥ १४ ॥

"यो धाता स वषट्कार , यानुमति सा गायत्री, या एका सा त्रिष्टुप्, या सिनीवाली सा जगती, या कुहू सानुष्टुप् । एतानि वा व सर्वाणि च्छन्दासि गायत्रं त्रैष्टुभं जागतमानुष्टुभमन्वन्यानि । एतानि हि यज्ञे प्रतमामिव क्रियन्ते । एतैर्ह वा अस्य छन्दोभिर्यजत सर्वैश्छन्दोभिरिष्ट भवति । य एवं वेद । य सूर्य स धाता स उ एव वषट्कार , या द्यौ सानुमति सो एव गायत्री, योषा सा एका सो एव त्रिष्टुप्, या गौ सा सिनीवाली सो एव जगती, या पृथिवी सा कुहू सो एवानुष्टुप् । एता वाव सर्वाणि च्छन्दासि । गायत्रं त्रैष्टुभं जागतमानुष्टुभमन्वन्यानि एतानि हि यज्ञे प्रतमामिव क्रियन्ते । इत्यादैतरेयके श्रूयते ॥ मैत्रायणीयाना राजसूयब्राह्मणेऽप्याम्नायते—"गायत्र्यनुमति । त्रिष्टुब् एका । जगती सिनीवाली । कुहूरनुष्टुप् । धाता वषट्कार ॥ या पूर्वा पौर्णमासी सानुमति योत्तरा सा एका । या पूर्वामावास्या सा सिनीवाली । योत्तरा सा कुहू । चन्द्रमा एव धाता ।" इत्यादि । तदन्तरेण च्छन्दोवेदमशक्यमासामनुमतिराकासिनीवालीकुहूना सर्वच्छन्दोभिसारूप्यमवगन्तुमित्यारम्भणीयश्छन्दोवेद ॥१५॥

"अतिच्छन्दस शंसति। छन्दसां वै यो रसोऽक्षरत् सोऽतिच्छन्दसमभ्यलक्षत्। तदतिच्छन्दसोऽतिच्छन्दस्त्वम्। सर्वेभ्यो वा एष छन्दोभ्य संनिर्मितो यत् पोडशी। तयदतिच्छन्दसः शसति सर्वेभ्य एवैन तच्छन्दोभ्य सनिर्मिमीते सर्वेभ्यश्छन्दोभ्य संनिर्मितेन पोडशिना राध्नोति य एवं वेद।' इत्यैतरेयकाणां पोडशीब्राह्मणे श्रूयत। सदिदमतिच्छन्दस शसेय पोडशिना च राध्नुयामित्यारम्भणीय"छन्दोवद" ॥ १६ ॥

'सोमो वै राजाऽमुष्मिंलोके आसीत्। त देवाश्च ऋषयश्चाभ्यध्यायन्'—कथम यमस्मान्त्सोमो राजागच्छेदिति। तेऽश्रुवंश्छन्दांसि। यूय न इमं सोम राजानमाहर तेति। ते सुपणा भूत्वोदपतन्। छन्दांसि वै तत्सोम राजानमच्छा चरन्। तानिह तर्हि चतुरक्षराणि चतुरक्षराण्येव छन्दांस्यासन्। सा जगती चतुरक्षरा प्रथमोदपतत्। सा पतित्वार्धमभ्वनो गत्वाथाभ्यत्। सा परास्य श्रीण्यक्षराण्येकाक्षरा भूत्वा दीक्षां च तपश्च हरन्ती पुनरभ्यवापतत्। तस्मात्तस्य त्रिसादीक्षा त्रिस तपो यस्य पशव" सन्ति। जागता हि पशव। जगती हि तानाहरत्॥ अथ त्रिष्टुबुदपतत्। सा पतित्वा भूमोदा दध्वनो गत्वाभ्यत्। सा परास्यैकमक्षरं त्र्यक्षरा भूत्वा दक्षिणा हरन्ती पुनरभ्य वापतत्। तस्मान्मध्यन्दिने दक्षिणानीयन्ते त्रिष्टुभो लोके। त्रिष्टुभ्मिवा अहरत्॥ ते देवा अब्रुवन् गायत्रीम्। त्वं न इम सोम राजानमाहरतीति सा तथेत्यब्रवीत्। सा पतित्वा सोमपाठान् भीपयित्वा पक्ष्यां च मुखेन च सोम राजान समगृभ्णात्। यानि चेतरे छन्दसी अक्षराण्यजिहसां तानि चोपसमगृभ्णात् सा यद्दक्षिणेन पदा समगृभ्णात्। तत् प्रात'सवनमभवत्। तद्गायत्री स्वमायतनमकुरुत। तस्मात् तत् सर्वदेवतम मन्यन्ते सर्वेषां सवनानाम्। अथ यत्सव्येन पदा समगृभ्णात् तन्माध्यन्दिनं सवनममवत्। तद्विक्षस्त नान्वाप्नोत् पूर्वं सवनम्। ते देवा प्राजिज्ञासन्त। तस्मित्त्रिष्टुभ छन्दसामदधुरिन्द्र देवतानाम्। तन तत् समावद्वीयम मवत् पूर्वेण सवनेन [illegible] ग यन्मुखेन समगृभ्णात् तत् तृतीयसवनमभवत्। तस्य पतन्ती रसमधय[illegible] सरसं नान्वाप्नोत् पूर्वे सवने। ते देवा' प्राजिज्ञासन्त। तत्पशुष्वपश्यन् [illegible]राशिरसमधनयन्ति आज्येन पशुना चरन्ति तन तत् समावद्वीयमभवत् पूर्वाभ्यां सवनाभ्याम्। ते वा इमे इतरे छन्दसी गायत्रीमभ्यव देताम्। वित्त नावक्षराण्यनुपर्यागुरिति। नेत्यब्रवीद्गायत्री। यथावित्तमेव न इति। ते देवेषु प्रथमैताम्। ते देवा अब्रुवन्—यथा वित्तमेव न इति। तस्माद्वाप्ये तर्हि वित्त्यौ ब्याहु'—यथावित्तमेव न इति। ततो वा अष्टाक्षरा गायत्र्यभवत्। त्र्यक्षरा त्रिष्टुप्। एकाक्षरा जगती। साष्टाक्षरा गायत्री प्रात सवनमुदयच्छत् नाशक्नोत्त्रिष्टुप् त्र्यक्षरा माध्यन्दिन सवनमुद्यन्तुम्। तां गायत्र्यब्रवीद्—अन्यापि मेऽस्तीति। सा तथेत्यब्रवीत् त्रिष्टुप्। तां वै मैतैरष्टाभिरक्षरैरुपसमेहीति। तथेति वामुपसमयात् सैकादशाक्षरा भूत्वा माध्यन्दिन सवनमुदयच्छत्। नाशक्नोज्जगत्यै काक्षरा तृतीयसवनमुद्यन्तुम्। तां गायत्र्यब्रवीद्—आमान्यपि मेऽस्तीति। सा

तथेत्यब्रवीज्जगती । ता वै सैतैरेकादशभिरक्षरैरुपसन्धेहीति । तथेति । तासुप- ५
समदधात्–सा द्वादशाक्षरा भूत्वा तृतीयसवनमुदयच्छत् । ततो वा अष्टाक्षरा गायत्र्य-
भवत् । एकादशाक्षरा त्रिष्टुप् । द्वादशाक्षरा जगती । एकं वै सत्त्त्रेधाभवत् । तस्मा-
दाहु.—दातव्यमेवं विदुषे इति । एकं हि सत्त्त्रेधाभवत् । इति हि सौपर्णकमाख्यान-
माख्यानविदामामनन्त्यैतरेयका । को ह्येतदर्थं विज्ञापयितुं शक्नोति । यावता याथात्म्ये-
न च्छन्दोवेदं न जानीयादित्यारम्भणीयश्छन्दोवेद ॥ १७ ॥

गायत्री	।।।।	।।।८-७,	।।।'।।।'।'	।।।'।।।''	८
त्रिष्टुप्	।।।।	।।-८।७,	।।।•••••,	।।-।।।'।।।''	११
जगती	।।।।	।-८।।।७,	। • ••,	।-।।।-।।।'।।।''	१२

"आदित्याश्चाङ्गिरसश्च सुवर्गे लोकेऽस्पर्धन्त । वयं पूर्वे सुवर्गं लोकमियाम । वयं पूर्व
इति । त आदित्या एतं पञ्चहोतारमपश्यन् तं पुरा प्रातरनुवाकादाग्नीध्रेऽजुहवु । ततो
वै ते पूर्वे सुवर्गं लोकमायन् । सवत्सरो वै पञ्चहोता । सवत्सर सुवर्गो लोक तेऽब्रुवन्ना-
ङ्गिरस आदित्यान् क[illegible]पद्रयो हव्यं वक्ष्याम इति । छन्द सु इत्यब्रुवन् ।
गायत्र्यां त्रिष्टु[illegible]भे जगत्यामिति । तस्मे[illegible]च्छन्द सु सद्रय आदित्येभ्य आङ्गिरसी प्रजा
हव्यं व[illegible]न्ति ।" इति हि तैत्तिरीयका आमनन्ति । छन्द सु सद्रय आदित्येभ्यो हव्यं
वहन्[illegible]ति जानीयामेत्यारम्भणीयश्छन्दोवेद ॥ १८ ॥

मैत्रायणीयानामाम्नायते "गायत्रीं च सम्पादयति[illegible] जगतीं च । तद्वे छन्दसी एकं
छन्दोऽभिसम्पादयति वृहतीम् । त्रिष्टुभं च ककुभं च[illegible]। तद्वे च्छन्दसी एकं च्छन्दोऽभि-
सम्पादयति वृहतीम् । अनुष्टुभ च पङ्क्तिं च । तद्वे च्छन्दसी एकं छन्दोऽभिसम्पादयति
वृहतीम् । तत् षट् च्छन्दास्येक च्छन्दोभिसम्पादयति वृहतीम्[illegible] इत्यादि ।

[illegible] गा[illegible]
एवै

गा० ।।।।।००० ज० ।।।।।।।।–।।।	क० ।।।।।।०० त्रि० ।।।।।।।।-।।	अ० ।।।।।।० प० ।।।।।।।।–।
६ १२	७ ११	८ १०
वृ ९ + वृ ९	वृ ९ + वृ ९	वृ ९ + वृ ९

ऐतरेयकेऽपि—"तस्या वाचोऽवपादादयिमयु —तमेवेषु सप्तसु छन्द स्ययन्। यदध्ययन् तच्छाय तीयस्य धायन्तीयत्वम्—यदवारयन्—तद्वारयन्तीयस्य वारय ती यस्वम्। तस्या वाच एतावपादादयिमयु । तस्मा एतानि सप्त चतुरुत्तराणि छन्दांस्य पादयु । तेषामतिश्रीण्यतिरिच्यन्ते। न त्रीण्युदस्तवत् स बृहतीमेवास्पृशत्—द्वाभ्यामक्ष राभ्यामहोरात्राभ्यामेव । तदाहु —कस्मा सा देवाक्षरा बृहती—अस्मां तत् प्रत्यतिष्ठत्। द्वादश पौर्णमास्य —द्वादशाष्टका —द्वादशामावास्या । एषा वाव सा देवाक्षरा बृहती यस्यां तत् प्रत्यतिष्ठदिति । यानि च छन्दांस्यत्यरिच्यन्त यानि च नोदमयन्—तानि निर्वीर्याणि हीनान्यमन्यन्त । साऽब्रवीत् बृहती । मामेव भूत्या मामुपसंश्रयतेति । चतुर्भिरक्षरैरनुष्टुप बृहतीं नोदमयत् । चतुर्भिरक्षरै पङ्क्तिर्बृहतीमत्यरिच्यत । तस्मामेता नि चत्वार्यक्षराण्यपच्छिद्यादधात् । ते बृहती एव भूत्वा बृहतीमुपसमश्रयताम्। अष्टाभिरक्षरैरुष्णिग् । बृहतीं नोदमयत् । अष्टाभिरक्षरैस्त्रिष्टुप् बृहतीमत्यरिच्यते । तस्मा मेतान्यष्टावक्षराण्यपच्छिद्यादधात् । ते बृहती एव भूत्वा बृहतीमुपसममश्रयताम् ॥ द्वादशभिरक्षरैर्गायत्री बृहतीं नोदमयत्, द्वादशभिरक्षरैर्जगती बृहतीमत्यरिच्यत। तस्मा मेतानि द्वादशाक्षराण्यपच्छिद्यादधात्। ते बृहती एव भूत्वा बृहतीमुपसमश्रयताम् ॥" इत्याम्नायते । तत्रान्तरेण च्छन्दोवेदमशक्त्यमासां गायत्र्युष्णिगनुष्टुभामनुद्वचनमन्यासां च पङ्क्तित्रिष्टुब्जगतीनामतिरेचनं यथायथादृष्टिज्ञातुमित्यारम्भणीयछन्दोवेद ॥ १९ ॥

इतीमान्य यानि चैवंविधानि भूयांसि प्रयोजनानि पश्याम इत्यारम्भणीयश्छन्दोवेद ।२०

अथ कश्चिद् ब्रूयात्—यान्येतानि प्रयोजनान्युक्तानि तत्तो नु खलु वैदिकान्येव च्छन्दसां विधानशास्त्रस्यावश्यकर्त्तव्यं प्राप्नोति । न पुनर्लौकिकानामपीति । तत्रोच्यते । त्रिविधानि हि वाचां छन्दांसि कानिचिद्वैदिकान्येव कानिचिद्वैदिकानि च लौकिकानि च, कानिचित् पुनर्लौकिकान्येव । तत्रावश्यमुभयेषां निदर्शनाय शास्त्रारम्भ प्रवर्त्तनीयस्तेन यदि—

'घटायोन्मीलित चक्षु किमन्यत्र प्रकाशयेत्"—इति न्यायेन लौकिकान्यपि दर्शये रन्। तत्तर्हि तावता छन्दोयाधारम्यविभिज्ञासूनां छन्दोविज्ञानसौकर्यानुग्रहो भवति । अत एव तु वैदिकानि च्छन्दांसि साकल्येन प्रदर्श्य लौकिकानां दिग्दर्शनेनानुगृह्णाति भग वान् पिङ्गलाचार्य । अनेन चाधिशिष्टबुद्धिरपि तानि तानि छन्दोवृत्तानि यथावदवगम्य सत्प्रचनाभिनयादिना कृतकृत्य कवितानन्दमासादयेत् ॥—

'काम्य यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्य परनिवृतये कान्तासम्मिततयोपदेशयुजे ॥"

इति हि भूयांसि प्रयोजनानि काव्यस्य पठन्ति । छन्दोभिर्नेयं तु वाक्य रसोद्बोधे काव्यमित्युच्यते । तदतश्छन्दोमात्रो रसापकर्षिसया काव्यत्वव्याघातको भवति ।

तस्माच्च छन्दोमात्रदोषेण काव्यप्रयोजनेभ्यो भाव्यतिरेचिष्णुभीरुपेक्षमाणानामारम्भ णीय लौकिकानामपि च्छन्दसां विज्ञानशास्त्रम् । उक्त च प्राकृते पैङ्गले—

जेम ण सहई कणअतुला तिलतुलिअं अद्ध अद्धेण ।
तेम ण सहई सवणतुला अवच्छन्दं छन्दभङ्गेण ॥ १ ॥
अवुह वुहाणं मज्झे कव्वं जो पढइ लक्खणविहूणम् ।
भूअगालगाखगाहिं सीसं खुडिअं ण जाणेइ ॥ २ ॥

यथा न सहते कनकतुला तिलतुलितमर्द्धार्द्धेन ।
तथा न सहते श्रवणतुला अपच्छन्दस्कं छन्दोभङ्गेन ॥ १ ॥
अवुधो वुधाना मध्ये काव्यं य पठति लक्षणविहीनम् ।
भुजाग्रलग्नखड्गेन शीर्षं खण्डितं न जानाति ॥ २ ॥

इति हि तदर्थं —तदिदमपच्छन्दस्क लक्षणविहीनं मा प्रयुङ्क्ष्महीत्यारम्भर्ण छन्दोविज्ञानशास्त्रम् ॥ २१ ॥

इति छन्दोवेदसार्थकतावाद ।

अस्मद्गुरुचरणै श्री ६ श्रीमधुसूदनशर्ममहानुभावैर्यावतो विषयस्य कृते आज्ञप्त नावान् विषयस्तदीयच्छन्द समीक्षानान्नश्छन्दोग्रन्थादुद्धृत्यौपढौकित श्रीमतामग्रे ।

अधुना पिङ्गलाचार्यहलायुधयोर्विषये किमपि वक्तुमिच्छाम —न नामाद्यापि निश्चि यत् पातञ्जलदर्शनत्रिंधातु पतञ्जले पृथक् कति पतञ्जलयोऽन्ये वभूवुरिति । छन्द शास्त्रस्य प्रथम आविष्कर्ता पिङ्गलो नाम । सोऽयं पिङ्गलनाग , पिङ्गलाचार्य , पत लिरित्येवमनेकवाख्यायते । श्रीमतो व्याकरणमहाभाष्यकर्तु पतञ्जलेर्नागत्वेन प्रसि र्नागशब्दसयुक्तेन पिङ्गलशब्देन बहवश्छन्द शास्त्रविधातृत्वेन श्रीमन्तं भगवन्तं पत लेमेव गृह्णन्ति । षड्गुरुशिष्य सर्वानुक्रमणिकाटीकाया पाणिन्यनुजत्वेन छन्दं शा निर्मातार न्यदर्शयत् । किमाकूतमत्र षड्गुरुशिष्यस्येति स एव जानातु । नात्र वयम किंकर्तव्यविमूढा वक्तुमधिकमिच्छाम ।

श्रीमान् मृतसंजीवनीवृत्तिकर्ता हलायुधस्तु श्रीभट्टनारायणान्वये प्रसूत । ना यणस्य पिता श्रीधनंजयभट्ट । यो मालवदेशे मुञ्जराजाश्रितो बभूव । हलायुधभ निजग्रन्थे ब्राह्मणसर्वस्वनाम्नि स्वीयो वृत्तान्त एवमुट्टङ्कितस्तदाधारेण ज्ञायते—

'असाधारणधीसंपत्तिप्रभावतो निखिलविद्यापारावारपारगतत्वाद् विविधसद्गुणाध तया च श्रीलक्ष्मणसेननृपतिर्बाल्य एवास्मै राजपण्डितपदम्, यौवने मन्त्रिपदम्, यौ नान्ते च धर्माधिकारिपदं च ददाविति । श्रीलक्ष्मणसेनोऽयं श्रीयुक्तराजेन्द्रलालमि महाशयस्य मतानुसारेण खिस्तद्वादशशताब्दया प्रारम्भे समभवत्। हलायुधो हि विवि विद्याविशारदत्वेन वहून् ग्रन्थान् रचयामास । तेषु ब्राह्मणसर्वस्वम्, पण्डितसर्वस्व शिवसर्वस्वम्, न्यायसर्वस्वम्, मत्स्यसूक्ततन्त्रम्, कविरहस्यम्, अभिधानरत्नमाला मृतसंजीवनीत पृथगन्यान्यपि रचयामासेति विदाकुर्वन्तु पाठका —

निवेदकौ

केदारनाथ—वासुदेवशास्त्रिणौ

छन्दःशास्त्रस्य विषयानुक्रमः ।

	पृष्ठे	सूत्रम्
प्रथमेऽध्याये—		
(पारिभाषिकसंज्ञाः)		
अत्र, गणसंज्ञा	२–३	१–८
लघुसंज्ञा	४	९
गुरुसंज्ञा	४	१०
गुरुव्यवस्था	५	११–१३
अधिकारसूत्रम्	५	१४
संख्यापरिमाणा	५	१५
द्वितीयेऽध्याये—		
(गायत्र्यादिच्छन्दसामक्षरसंख्या)		
अधिकारसूत्रद्वयम्	६	१–२
दैवी गायत्री	६	३
आसुरी गायत्री	६	४
प्राजापत्या गायत्री	६	५
याजुषी गायत्री	६	६
साम्नी गायत्री	६	७
आर्ची गायत्री	७	८
उष्णिगनुष्टुब्बृहतीत्रिष्टुब्जगतीछन्दांसि	७	९–१४
आद्यो गायत्र्याधा	७	१५
आर्ची गायत्र्याधा	८	१६
तृतीयेऽध्याये—		
(गायत्र्यादिवैदिकच्छन्दसां लक्षणानि)		
अधिकारसूत्रम्	१०	१
इत्यादिभि पादपूरणम्	१०	२
[गायत्र्यधिकारः]		
परिभाषासूत्राणि ...	११	३–९
पादनिचृत्	११	१०
अतिपादनिचृत्	१२	११
भागी	१२	१२

	पृष्ठे	सूत्रम्
वाराही	१२	१३
वर्धमाना	,,	१४
प्रतिष्ठा	,,	१५
द्विपाद् विराट् ...	,,	१६
त्रिपाद् विराट्	१३	१७
[उष्णिगधिकारः]		
उष्णिक्	१२	१८
ककुप्	१३	१९
पुरउष्णिक्	१३	२०
परोष्णिक्	१३	२१
चतुष्पादुष्णिक्	१४	२२
[अनुष्टुबधिकार]		
चतुष्पादनुष्टुप्	१४	२३
त्रिपादनुष्टुप् ,	१४	२४
अनुष्टुप्	१४	२५
[बृहत्यधिकार]		
बृहती	१५	२६
पथ्या	१५	२७
न्यङ्कुसारिणी ,	१५	२८
स्कन्धोग्रीवी	१५	२९
उरोबृहती ...	१५	३०
उपरिष्टाद्बृहती ...	१६	३१
पुरस्ताद्बृहती ,	१६	३२
नवाक्षरा बृहती ,,	१६	३३
शुद्धबृहती —	१६	३४
महाबृहती ,	१६	३५
सतोबृहती , ,	१७	३६
पङ्क्ति , ,	१७	३७
सतःपङ्क्ति , ,	१७	३८
,, ,,	१७	३९

	पृष्ठे.	सूत्रम्.
आस्तारपङ्क्तिः... ...	१७	४०
प्रस्तारपङ्क्तिः	१७	४१
विष्टारपङ्क्तिः	१८	४२
संस्तारपङ्क्तिः	१९	४३
अक्षरपङ्क्तिः	१९	४४
अल्पश.पङ्क्तिः ...	१९	४५
पदपङ्क्तिः	१९	४६
,, ...	१९	४७
पथ्यापङ्क्तिः	२०	४८
जगती	२०	४९
त्रिष्टुप् ज्योतिष्मती ...	२०	५०
ज्योतिष्मती	२१	५१
पुरस्ताज्ज्योतिः ...	२१	५२
मध्येज्योतिः	२१	५३
उपरिष्टाज्ज्योति. ...	२१	५४
शङ्कुमती	२२	५५
ककुभ्मती	२३	५६
पिपीलिकमध्या ...	२३	५७
यवमध्या	२४	५८
निचृत्-भुरिक् ...	२४	५९
विराट्-स्वराद ...	२५	६०
संदिग्धे निर्णय ...	२६	६१
देवतादित्वेन निर्णय ...	२६	६२
गायत्र्यादिछन्दसा देवताः	२६	६३
गायत्र्यादीना स्वराः ...	२६	६४
,, वर्णाः ...	२६	६५
,, गोत्राणि ...	२६	६६

चतुर्थाध्याये—

(वैदिकछन्दांसि)

उत्कृतिः	२७	१
उत्कृतेरक्षरत्यागः ...	२८	२
अभिकृतिः	२८	३
संस्कृतिः	२८	,,
विकृतिः	२८	३
आकृतिः	२८	,,
प्रकृति.	२९	,,
कृति. उपसर्गवर्जितः...	२९	४
धृत्यष्टिशक्करीजगत्यः ...	२९	५
पृथक्प्रकारेण न्यास ...	२९	६
अतिधृतिः	२९	७
धृतिः	३०	,,
अत्यष्टिः	३०	,,
अष्टिः	३०	,,
अतिशक्करी	३०	,,
शक्करी	३०	,,
अतिजगती	३०	,,
जगती	३१	,,
(लौकिकछन्दांसि) ...	३१	८
आर्षवत्काव्यादौ ...	३१	९
पादलक्षणम्	३१	१०
वृत्तेन पादलक्षणम् ...	३१	११
गणलक्षणम्	३२	१२
गणविन्यासभेदः ...	३२	१३

(आर्याधिकारः)

आर्याधलक्षणम् ...	३२	१४
आर्यास्वयुग्गणः ...	३३	१५
आर्यासु गणनियमः ...	३३	१६
,, षष्ठसर्वलघुः ...	३३	१७
द्वितीयादिपदम् ...	३४	१८
सप्तमादि	३४	१९
अन्त्ये पञ्चमः ...	३४	२०
षष्ठापवादोलक्कारः ...	३४	२१
पथ्यालक्षणम्... ...	३५	२२
विपुलालक्षणम् ...	३५	२३
चपलालक्षणम् ...	३६	२४
मुखचपला	३६	२५

	पृष्ठे	सूत्रम्
अपनचपला ...	३६	२६
महाचपला ..	३७	२७
गीति·	३७	२८
उपगीति·	३८	२९
उद्गीति	३५	३०
(वैतालीयाधिकारः)		
आर्यागीति	४०	३१
वैतालीयम् ..	४१	३२
औपच्छन्दसिकम् ..	४२	३३
आपातलिका	४२	३४
मिश्रलक्षणोदाहरणम्	४३	३५
अयुङ्मिश्रोदाह० ...	४३	३६
प्राच्यवृत्तिः	४३	३७
उदीच्यवृत्तिः ..	४४	३८
प्रवृत्तकम् ..	४४	३९
चारुहासिनी	४४	४०
अपरान्तिका ..	४५	४१
(मात्रासमकाधिकारः)		
मात्रासमकम् ..	४५	४२
वानवासिका ..	४६	४३
मिश्रश्लोकः ..	४६	४४
चित्रा ..	४६	४५
उपचित्रा ..	४६	४६
पादाकुलकम्	४७	४७
मीमार्या	४८	४८
शिखा ..	४९	४९
ज्योति·	४९	५०
सौम्या ..	४९	५१
चूलिका ..	५०	५२
गण्मात्राछन्दस· ...	५१	५३
पञ्चमाध्याये—		
(वृत्तमधिकारः)		
वृत्तलक्षणम्	५२	१

	पृष्ठे	सूत्रम्
समाक्षिप्तयो भेदा· ..	५२	२
समम् ..	५२	३
विषमम्	५३	४
अर्द्धसमम्	५३	५
समानी	५३	६
प्रमाणी	५४	७
वितानम्	५४	८
अनुष्टुब्वक्त्रम्	५५	९
गणप्रयोगरीति·	५५	१०
,,	५५	११
,,	५५	१२
,,	५६	१३
पथ्यावक्त्रम्	५७	१४
पथ्या मतान्तरेण	५७	१५
चपला	५७	१६
विपुला ..	५८	१७
वैतलमते विपुला	५८	१८
पुनर्विपुला ..	५९	१९
पंक्तिवृत्तम्	६४	२०
आपीडः	६४	२१
प्रख्यापीड·	६५	२२
'	६५	२३
मंजरी	६१	२४
लवली	६६	,,
अमृतधारा	६६	,,
व्यूहता	६७	२५
सौरभकम्	६८	२६
ललितम्	६९	२७
उपस्थितप्रचुपितम्	६९	२८
वर्धमानम्	७०	२९
हृदयविदृपनम् ..	७१	३०
अर्धे इत्यधिकार	७१	३१
उपचित्रकम्	७२	३२

	पृष्ठे.	सूत्रम्
द्रुतमध्या	७२	३३
वेगवती	७३	३४
भद्रविराट्	७४	३५
केतुमती	७४	३६
आख्यानकी	७५	३७
विपरीताख्यानकी ...	७६	३८
हरिणप्लुता	७७	३९
अपरवक्त्रम्	७७	४०
पुष्पिताग्रा	७८	४१
यवमती	७९	४२
शिखा	८०	४३
खञ्जा	८१	

षष्ठाध्याये—

यतिलक्षणम्	८१	१
श्रीछन्दः	८५	,,
कामच्छन्दः	,,	,,
मधुच्छन्दः	,,	,,
मदच्छन्दः	,,	,,
सारुच्छन्दः	,,	,,
तालीच्छन्दः	,,	,,
प्रियाच्छन्दः	८६	,,
शशीच्छन्दः	,,	,,
रमणच्छन्दः	,,	,,
पाश्चालच्छन्दः ...	,,	,,
मृगेन्द्रच्छन्दः ...	,,	,,
मन्दरच्छन्दः	,,	,,
कमलच्छन्दः	,,	,,
तीर्णोच्छन्दः	,,	,,
धारीच्छन्दः	,,	,,
नगाणीच्छन्दः	,,	,,
सतीच्छन्दः	,,	,,
संमोहाच्छन्दः	,,	,,
तनुमध्या	८७	२

	पृष्ठे.	सूत्रम्.
कुमारललिता	८८	३
माणवकाक्रीडितकम् ...	८९	४
चित्रपदा	९१	५
विद्युन्माला	९०	६
हंसरुतम्	९१	७
भुजगशिशुभृता ...	९२	७
हलमुखी	९२	८
शुद्धविराट्	९४	९
पणवः	९५	१०
मुरजः	९५	११
मयूरसारिणी	९५	१२
मत्ताच्छन्द	९६	१३
उपस्थिता	९६	१४
इन्द्रवज्रा	९७	१५
उपेन्द्रवज्रा	९९	१६
उपजातयः	९९	१७
दोधकम्	१११	१८
शालिनी	११२	१९
वातोर्मी	११२	२०
भ्रमरविलसिता ...	११३	२१
रथोद्धता	११३	२२
स्वागता	११४	२३
वृत्ता	११४	२४
श्येनी	११५	२५
विलासिनी	११५	२६
जगती	११५	२७
वंशस्था	११५	२८
इन्द्रवंशा	११७	२९
द्रुतविलम्बितम् ...	११७	३०
तोटकम्	११८	३१
पुटः	११८	३२
जलोद्धतगतिः ...	११९	३३
ततम्	११९	३४

	पृष्ठे	सूत्रम्
कुसुमविचित्रा	११९	३५
कमलालिका	१२०	३६
भुजङ्गप्रयातम्	१२०	३७
लक्ष्मिणी	१२१	३८
प्रमिताक्षरा	१२१	३९
कान्तोत्पीडा	१२१	४०
वैश्वदेवी	१२२	४१
वाहिनी	१२२	४२
नवमालिनी	१२३	४३
सप्तमाध्याये—		
प्रहर्षिणी	१२३	१
रुचिरा	१२५	२
मत्तमयूरम्	१२५	३
गौरी	१२५	४
असंबाधा	१२६	५
अपराजिता	१२७	६
प्रहरणकलिता	१२८	७
वसन्ततिलका	१२८	८
सिंहोन्नता	१२९	९
उद्धर्षिणी	१२९	१०
चन्द्रावर्ता	१२९	११
माल्य	१३१	१३
मणिगुणनिकर	१३१	१३
मालिनी	१३२	१४
रूपमगजविलसितम्	१३२	१५
हरिणी	१३४	१६
पृथ्वी	१३५	१७
वंशपत्रपतितम्	१३६	१८
मन्दाक्रान्ता	१३७	१९
शिखरिणी	१३७	२०
कुसुमितलतावेष्टिता	१३८	२०
शार्दूलविक्रीडितम्	१३०	२१
सुमदमा ..	१४१	२२

	पृष्ठे	सूत्रम्
शुद्धम्	१४४	२३
सुग्धरा	१४४	२४
मदकम्	१४५	२५
अश्वललितम्	१४६	२६
मत्ताक्रीडा	१४७	२७
तन्वी	१४८	२८
कोमपदा	१४९	२९
भुजङ्गविजृम्भित	१५०	३०
अपभ्राहक	१५१	३१
दण्डक	१५३	३२
चण्डवृष्टिप्रपातः	१५४	३३
रातमाण्डव्यमतम्	१५४	३४
प्रचितसंज्ञा	१५४	३५
अष्टमाध्याये—		
गाथालक्षणम्	१५५	१
कुञ्जलदन्ती	१५६	२
वरतनु	१५६	३
अलघरमाला	१५७	४
गौरी	१५७	५
लक्ष्मना	१ ७	६
चर्चिकप्रभा	१५८	७
कुटिलगति	१५९	८
वरसुन्दरी	१५९	९
कुटिला	१६०	१०
वेलशिखा ..	१६०	११
वरयुवती	१६१	१२
अतिधामिनी	१६१	१३
अवितथम्	१६२	१४
कोकिलकम्	१६२	१५
विबुधप्रिया	१६३	१६
माराचकम्	१६३	१७
विस्मिता	१६४	१८
शशिवदना	१६५	१९
इत्य प्रस्तारादि	१६६	२०-३४

॥ श्रीः ॥

काव्यमाला ।

श्रीमत्पिङ्गलाचार्यविरचित

छन्द शास्त्रम् ।

श्रीमद्भट्टहलायुधप्रणीतमृतसंजीविन्याख्यवृत्तिसमेतम् ।

प्रथमोऽध्यायः ।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यगगनारम्भमूलस्तम्भाय शम्भवे ॥
वेदानां प्रथमाङ्गस्य कवीनां मयनस्य च ।
पिङ्गलाचार्यसूत्रस्य मया वृत्तिर्विधास्यते ॥
क्षीराब्धेरमृतं यद्वत्सुरैः सदानवैः ।
छन्दोऽब्धेः पिङ्गलाचार्यैश्छन्दोऽमृतं तथोद्धृतम् ॥
श्रीमत्पिङ्गलनागोक्तछन्द शास्त्रमहोदधौ ।
वृत्तानि मौक्तिकानीव क्वचिच्चिद्विविनोम्यहम् ॥
म-य-र स त-ज-भ-न-स-ग सैमित भ्रमति पाद्यमं ग ति यस्य ।
स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमति ॥
त्रिगुरुं विदि मकारं लप्तादिसमन्वितं यकाराख्यम् ।
लघुमध्यमं तु रेफ रकारमन्ते गुरुनिबद्धम् ॥
लप्तन्यं हि तद्वरं जकारमुभयोर्मध्ये विजानीयात् ।
आदिगुरु च भद्वरं भकारमिह पैङ्गले त्रिलघुम् ॥
वीर्यं संभोगपरं तथा मृत म्यञ्जनान्तमूष्मान्तम् ।
सानुस्वारं च गुरुं क्वचिदवसानेऽपि लप्तन्यम् ॥

---

१ म्यञ्जनान्तोपादानेनोष्मान्तस्यापि लाभात्पुनरूष्मान्तकथनेन विसर्जनीयजिह्वामू-लीयोपध्मानीयानां ग्रहणम् यथाह पाणिनीयशिक्षायाम्—'ओमावथ विसृतिश्च क्षपसा रेफ एव च । जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥' इत्यत ऊष्मसम्यो विसर्ज-नीयादेरपलक्षकत्वे बोद्धव्यः

आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥
त्रिविरामं दशवर्णं षण्मात्रमुवाच पिङ्गलः सूत्रम् ।
छन्दोवर्गपदार्थप्रत्ययहेतोश्च शास्त्रादौ ॥

इह हि त्रैवर्णिकाना साङ्गवेदाध्ययनमाम्नायते । अर्थावबोधपर्यन्तश्चाध्ययनविधिः । वेदाङ्गं च छन्द । ततस्तदध्ययनविधित्वात्तदनुष्ठेयम् । अथ 'त्रिष्टुभा यजति, बृहत्या गायति, गायत्र्या स्तौति' इत्येवमादिश्रवणात् अर्थायातमनुष्टुभादिज्ञानम् । किं च छन्द-सामपरिज्ञानात्प्रत्युत प्रत्यवायः श्रूयते । यथा—'यो ह वा अविदितार्षेयच्छन्दोदैवत-ब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स स्थाणुं वर्च्छति[1] गर्तं वा पतति[2] प्रमीयते वा पापीयान् भवति यातयामान्यस्य छन्दासि भवन्ति ।' तस्माच्छन्दोज्ञान कर्तव्यं तदर्थमिदं शास्त्रमारभ्यते । तथा लघुनोपायेन शास्त्रावबोधसिद्ध्यर्थं संज्ञाः परिभाषते सूत्रकारः—

धीश्रीस्त्री ॐ[3] । १ । १ ॥

---

१. स्थाणुं वृक्षादियोनिम् . ऋच्छति प्राप्नोति. २ 'पतते, पात्यते' इति वा पाठान्तरम्.
३ छन्द कौस्तुभे तु—

'मयरसतजभनसज्ञारछन्दस्यष्टौ गणास्त्रिवर्णा स्यु. ।
भूम्यम्बुवह्निवायुव्योमार्कसुधाशुनाकदेवास्ते ॥
क्रमत श्रीवृद्धिस्मृतिप्रयाणरिक्तत्वरुग्यशोमोदान् ।
यच्छन्ति फलानि गणा माद्यास्तेऽष्टौ प्रयोक्तृभ्यः ॥
सर्वगुर्ॐ कथितो भजसा गुर्वादिमध्यान्ता' ।
छन्दसि नः सर्वलघुर्यरता लघ्वादिमध्यान्ताः ॥
मनौ सखायौ कथितौ भयौ भृत्यावुदीरितौ ।
उदासीनौ तजौ प्रोक्तौ सरौ शत्रू मताविह ॥
सिद्धिर्भवेत्सखिभ्या सखिभृत्याभ्या जयस्थिरत्वं च ।
स्याद्भृत्यमित्रभृत्यैः शुभं स्वपीडा तु मित्रशत्रुभ्याम् ॥
अफलमुदासीनाभ्यां शत्रुसखिभ्या च तद्भवति ।
शत्रुभ्या तु विरोधो नायकनाशश्च संप्रोक्तः ॥
शत्रूदासीनाभ्या हानिरुदासीनभृत्याभ्याम् ।
अस्वायत्तिर्गदिता श्रीनाशः शत्रुभृत्याभ्याम् ॥
क्षयवैरिभयप्राप्तिर्भवत्युदासीनशत्रुभ्याम् ।
मित्रोदासीनाभ्यामश्रीरिति गणफलान्याहुः ॥'

घीभीमी इत्यनेन गुरुत्रयं संक्षिप्येनोपलक्षयति, मकारस्य संज्ञारूपेण। ततश्चायमर्थः — सर्वगुरोस्त्रिकस्य (SSS) म' इति संज्ञा परिभाष्यते । ध्यादीनामुपादानप्रयोजनमुपरि प्रदर्शयाम' । मप्रदेशा विद्युन्माला मौ गौ' (पि०सू० ६।६) इत्येवमादय ॥

वरासा य् । १ । २ ॥

वरासा इत्यनेनादिलघोस्त्रिकस्य (।SS) य' इति संज्ञा परिभाष्यते । यप्रदेशा 'भुजङ्गप्रयात य' (पि० सू० ६।३६) इत्येवमादय ॥

कागुहा र् । १ । ३ ॥

कागुहा इत्यनेन मध्यलघोस्त्रिकस्य (S।S) 'र' इति संज्ञा परिभाष्यते । रप्रदेशा 'स्रग्विणी र (पि० सू० ६।३७) इत्येवमादय ॥

वसुधा स् १ । ४ ॥

वसुधा इत्यनेनान्त्यगुरोस्त्रिकस्य (।।S) स' इति संज्ञा परिभाष्यते । सप्रदेशा 'तोटकं स ' (पि० सू० ६।३१) इत्येवमादय ॥

सातेक त् । १ । ५ ॥

सातेक इत्यनेनान्त्यलघोस्त्रिकस्य (SS।) 'त' इति संज्ञास्त्वेनोपादीयते । तप्रदेशा 'तनुमध्या स्यो' (पि० सू० ६।२) इत्येवमादय ॥

कदास ज् । १ । ६ ॥

कदास इत्यनेन मध्यगुरोस्त्रिकस्य (।S।) 'ज' इति संज्ञा परिभाष्यते । जप्रदेशा 'कुमारललिता जसा ग्' (पि० सू० ६।३) इत्येवमादय ॥

किंवद भ् । १ । ७ ॥

किंवद इत्यनेनाद्यिगुरोस्त्रिकस्य (S।।) भ' इति संज्ञा क्रियते । भप्रदेशा चित्रपदा भौ गौ' (पि० सू० ६।५) इत्येवमादय ॥

नहस न् । १ । ८ ॥

नहस इत्यनेन सर्वलघोस्त्रिकस्य (।।।) 'न' इति संज्ञोपदिश्यते । नप्रदेशा दण्डको नौ र (पि० सू० ७।३१) इत्येवमादय ॥

इजघा हिंसजीवनधनहरा मृषक्रोधकुद्वेषः
तनुपीडास्त्रमणदा यनस्ता म इहातिदूरगतिदायी ॥
गणा दुष्टफला राधा दग्धवर्णाश्च हादय ।
श्लोकमुखेनैते प्रयोक्तव्या शुभार्थिभिः ॥

अत्रापवादः—

देवतावाचका शब्दा ये च मन्त्रादिवाचका ।
ते सर्वे न च निन्द्या स्युरिंपितो गणतोऽपि च ॥' इति

गृ ल् । १ । ९ ॥

गृ इत्यनेनोपलक्षितस्य ह्रस्वस्य (।) 'ल' इति संज्ञा परिभाष्यते । लशब्दश्च लघु-वाचक· । तेन ह्रस्वमक्षर लघुसञ्ज्ञं भवतीत्येवमर्थ प्रपद्यते। लप्रदेशा 'ल. समुद्रागण' (पि० सू० ४।१२) इत्येवमादय ॥

गन्ते[1] । १ । १० ॥

गृग्रहणमनुवर्तते । गृशब्दोपलक्षितस्य ह्रस्वाक्षरस्य पदान्ते वर्तमानस्य गुरुसज्ञातिदिश्यते । 'ग' इति प्रथमाक्षरप्रतीकेन गुरुशब्दस्य ग्रहणम् ॥

ननु 'ग्लिति समानी' (पि० सू० ५।७) इत्यादीना पादान्ते वर्तमानस्य ह्रस्वस्य गुरुत्वं न दृश्यते । नैष दोष । सर्वत्र पादान्ते वर्तमानस्य ह्रस्वस्य गुरुत्वमुत्सर्गसिद्धम् । तच्च लकारश्रुत्यापवादेन बाध्यते । यथा—'ग्लिति समानी' (पि०सू० ५।७), 'गीत्यार्या ल' (पि० सू० ४।४७) इत्यादौ सामान्येन विशेषस्य बाध· कस्य न संमत., तस्मात्कुचोद्यमेतत् । केचिदिदं सूत्रं व्यवस्थितविभाषया व्याचक्षते । 'ग्लिति प्रमाणी' (पि० सू० ५।८) इत्यादीनामन्ते गुरुत्वमेव, 'समानी' (पि० सू० ५।७) इत्यादीनामन्ते लघुत्वमेव । तस्मादियं व्यवस्था प्रमाणम् । शेषाणामिच्छया गुरुत्वं लघुत्वं चेत्यनुपपन्नम्, विकल्पस्याप्रस्तुतत्वात्कस्य व्यवस्थेति न विद्म ॥ ननु केनाप्युक्तम् 'वा पदान्ते गवक्र·' इति गुरुत्वम् । सत्यमुक्तम् । दुरुक्तं हि तत् । 'वान्ते गवक्र इति प्रोक्तं यैश्च श्वेतपटादिभि[2] । तदुत्सर्गापवादेन बाधस्तैर्नावधारित ॥' इच्छया गुरुत्वं लघुत्वं नोपपद्यते । कस्येच्छया । किं शास्त्रकारस्य, कवेर्वा । न तावदाद्य पक्ष , सूत्रेष्वदर्शनात् । नापि द्वितीय , कवेरपीच्छाया व्यवस्थाभावात् । को जानाति कस्य कीदृशीच्छेति ॥ अन्ये त्वाहु —ननु पदान्ते वर्तमानस्य ह्रस्वस्य पाणिनिना गुरुसज्ञा न कृता । तेनोक्तम् 'सयोगे गुरु' (पा० सू० १।४।११), 'दीर्घ च' (पा०सू० १।४।१२) इति । नायं सयोगादिर्नच दीर्घ । तस्मात् 'गन्ते' इति सूत्रमयुक्तम् । अत्रोच्यते—पाणिनिना स्वशास्त्रप्रयोजनार्थं गुरुसज्ञा कृता । 'गुरोश्च हल' (पा०सू० ३।३।१०३) इत्यकारप्रत्ययो यथा स्यात्—कुण्डा, द्रुण्डा, ईहाञ्चक्रे, ऊहाञ्चक्रे, इत्येवमादीनाम् 'इजादेश्च गुरुमतोऽनृच्छ' (पा० सू० ३।१।३६) इत्याम्प्रत्ययश्च । पदान्ते वर्तमानस्य लघोर्गुरुत्वातिदेशे पाणिने प्रयोजनमेव नास्ति । किंचानुस्वारादिपूर्वस्य वर्णस्य वलं सपदित्यादौ स्थितस्य गुरुसज्ञा पाणिनिना न कृता, किमेतावतान्यैरपि न कर्तव्या तस्मात्सूक्तमिदम् 'गन्ते' इति । गप्रदेशा 'गावन्त आपीड' (पि० सू० ५।२२) इत्येवमादय· ॥

---

१. 'गुर्गश्च गुरुरेक स्याल्लस्त्वेको लघुरुच्यते ।
रेखाभ्यामृजुवक्राभ्या ज्ञेयौ लघुगुरू क्रमात् ॥
अनुस्वारी विसर्गी च दीर्घो युक्तपरस्तथा ।
वर्णो गुरुर्मतो हेम्रे पादान्ते चापि वा लघु ॥' इति छन्द·कौस्तुभे

२. श्वेतपटादिभिर्जैनविशेषैरित्यर्थ..

घादिपरः । १ । ११ ॥

घ इति व्यञ्जनसंयोगस्योपलक्षणार्थमेतत् । घ आदिर्येषां ते घादय । आदिशब्देन विसर्जनीयानुस्वारजिह्वामूलीयोपध्मानीयानां ग्रहणम् । घादय परे यस्मात्स घादिपर । ततश्चाय सूत्रार्थ —व्यञ्जनसंयोगात्पूर्वस्य ह्रस्वस्यानुस्वारविसर्जनीयजिह्वामूलीयोपध्मानीयेभ्यश्च पूर्वस्य गुरुसंज्ञातिदिश्यते ॥

हे । १ । १२ ॥

ग इत्यनुवर्तते । हे इति द्विमात्रोपलक्षणार्थम् । ततश्चाय सूत्रार्थ —द्विमात्रिकस्य दीर्घस्य ग' इति संज्ञा क्रियते ॥

लौ सः । १ । १३ ॥

स इति गकारस्य परामर्श । स गकारो द्विमात्रो गणनायां द्वौ लकारौ कृत्वा गण मितव्यः ॥

ग्लौं । १ । १४ ॥

अधिकारोऽयमाधारूपपरिसमाप्ते । यत्र विशेषान्तरं न श्रूयते तत्र 'ग्लौं' इत्युपतिष्ठते । गायत्र्या वसव' (पि० सू० ३।३) इत्येवमादिवत् । इतेनेह व्यवहारो नास्ति ॥

अष्टौ वसव इति । १ । १५ ॥

अत्र शास्त्रे वसव इत्युच्यमानेऽष्टसंख्योपलक्षिता, गुरुलघुस्वरूपा वर्णा गृह्यन्ते । लौकिकप्रसिद्धयुपलक्षणार्थमिद सूत्रम् । तेन चेतुर्णां समुद्रा पञ्चानामिन्द्रियाणि इत्येवमादय संज्ञाविशेषा अलौकिकेऽप्य प्रत्येतव्या' । इतिकारोऽध्यायसमाप्तिसूचक ॥

इद घ्यादीनामुपादानप्रयोजन वर्ण्यते—अध्ययनादीभवति । यस्य श्रीखस्य श्री, बुद्धिपूर्वकत्वाद्विभूतेः । यस्य श्रीखस्य श्री अयमूलकत्वाद्ग्रहस्यस्य । वरा सा' इत्यनेन सर्वेषां श्रीसाधनोपायानां बुद्धेरुपायस्य माहात्म्यं दर्शयति । तथा चोक्तम्—'अधो ग्रहपरीणाहविद्याप्रायासभीरव । सर्वाश्रीणपरिक्लेशमबुधा कर्म कुर्वते ॥ तत्राह शिष्यः—'का गुहा' गुहाशब्दः स्थानवाचकः । का गुहा यत्रासौ तिष्ठति । उपाध्यायो ब्रूते—'बुद्धि' । पृथिव्यां लभ्यते श्रीनात्र विषाद कर्तव्य । पुनरप्याह शिष्य — सा ते क' सा श्रीस्त्वयोपदिश्य पृथिव्यो क्वायत्यिसेन लभ्यते । तत्र पुनराचार्य आह— गृहे' । पुनरप्याह शिष्यः— कदा स स गृहस्थ' पुरुषः कदा कस्मिन्काले तां श्रियं प्राप्नोति । ततोऽनन्तरं गुरुराह— घादिपर' धारणायावबोधपरोऽसौ यदा स्यात्तदा श्रियं लभते ।

---

१ चन्द्र एक', नञौ द्वौ गुणाश्चय वेदा' समुद्राश्च चत्वार बाणा पञ्च च सव पद् मुनयः सप्त, सिद्धयोऽष्टौ रन्ध्रा नव दिशो दश, रुद्रा एकादश आदित्या द्वादश मनवश्चतुर्दश' इत्यादि

भूयोऽपि शिष्य पृच्छति—'कि वद' कि कुर्वन्नसौ ता धियं लभते तद्वद । तत्राह गुरुः—'न हसन्' हासादिचापल्यमकुर्वाणस्तां धियं लभत इति ॥

इति भट्टहलायुधकृताया छन्दोवृत्तौ प्रथमोऽध्यायः ।

द्वितीयोऽध्याय ।

छन्दः । २ । १ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्ते । इत ऊर्ध्वं यद्वक्ष्यामश्छन्दस्तत्रोपतिष्ठते । छन्द-शब्देनाक्षरसख्यावच्छेदोऽत्राभिधीयते ॥

गायत्री । २ । २ ॥

अधिकारोऽयमाद्वादशसूत्रपरिसमाप्तेः । 'तान्युष्णिग्-' (पि० सू० २।१४) इत्यादि-सूत्रात्प्राग्यदुच्यते छन्दस्तद्गायत्रीसज्ञं वेदितव्यम् ॥

दैव्येकम् । २ । ३ ॥

एकाक्षरं छन्दो दैवी गायत्रीति संज्ञायते । तत्रायं प्रदर्शनोपाय —चतुरङ्गक्रीडाया-मिव चतुःषष्टिकोष्ठान् लिखित्वा तत्र प्रथमपङ्क्तौ आर्षीनाम लिखित्वा द्वितीयादिकोष्ठेष्व-ङ्कानामुपरि गायत्र्यादिसप्तच्छन्दसा नामानि विन्यसेत् । ततो द्वितीयाया पङ्क्तौ प्रथम-कोष्ठे दैवीशब्दं विन्यसेत्, सज्ञाज्ञापनार्थम् । द्वितीये एक(१)सख्याङ्कं विन्यसेत् ॥

आसुरी पञ्चदश । २ । ४ ॥

आसुरी गायत्री पञ्चदशाक्षरा । तानि चाक्षराणि 'ग्लौ' (पि० सू० १।१४) इत्यधि-काराद्गुरूणि लघूनि वा यथासभवं द्रष्टव्यानि । अत्र तृतीयायां पङ्क्तौ प्रथमे कोष्ठे आसु-रीशब्दं लिखित्वा द्वितीये कोष्ठे पञ्चदश(१५)सख्याङ्कं लिखेत् ॥

प्राजापत्याष्टौ । २ । ५ ॥

प्राजापत्या गायत्र्यष्टाक्षरा भवति । यत्र क्वचिद्वेदेऽष्टाक्षर छन्दस्तत्प्राजापत्या गाय-त्रीति ज्ञेयम् । चतुर्थ्यामत्र पङ्क्तौ प्रथमे कोष्ठे प्राजापत्याशब्दं लिखित्वा द्वितीयेऽष्ट(८) सख्याङ्कं लिखेत् ॥

यजुषां षट् । २ । ६ ॥

यजुषा गायत्री षडक्षरा भवति । यत्र क्वचिद्वेदे षडक्षर छन्दस्तद्याजुषी गायत्रीति संज्ञायते । अत्र पञ्चम्या पङ्क्तौ प्रथमे कोष्ठे याजुषीशब्दं व्यवस्थाप्य द्वितीये षट् (६) संख्याङ्कं लिखेत् ॥

साम्नां द्विः । २ । ७ ॥

षडित्यनुवर्तते । द्विरिति क्रियाभ्यावृत्तिदर्शनात्करोतिरध्याहियते, द्वादशाक्षरेत्यभ्या-

पूरया क्रियते । येन द्वि कृता द्विगुणिता पद्संख्या साम्नां गायत्री भवति। यत्र क्वचि द्वेदे द्वादशाक्षरं छन्द तत्साम्नां गायत्रीति संज्ञायते । अत्र पक्त्यां पङ्क्तौ प्रथमे कोष्ठ सामशब्द लिखित्वा द्वितीये द्वादश(१२)संख्याङ्कं लिखेत् ॥

ऋचां त्रि॰ । २ । ८ ॥

पङ्क्तिमनुवर्तते । अत्रापि पूर्ववत् क्रियाभिव्याहृति , येन त्रिगुणा पद्संख्या ऋचां गायत्री भवति । यत्र क्वचिद्वेदेऽष्टाक्षरं छन्द॰ सा ऋचां गायत्री ज्ञेया । अत्र सप्त मपङ्क्तौ प्रथमे कोष्ठे ऋक्शब्द व्यवस्याप्य द्वितीयेऽष्टाक्षर(८)संख्याङ्क लिखेत् ॥

द्वौ द्वौ साम्नां वर्धेत । २ । ९ ॥

गायत्रीत्यनुवर्तते । साम्नां पङ्क्तौ गायत्री द्वौ द्वौ संख्याङ्कौ गृहीत्वा वर्धिता पूर्वाद्वर्धेत यावदष्टम कोष्ठं प्राप्नोति । तत्र साम्नां पङ्क्तौ तृतीयादिषु कोष्ठेषु क्रमेण वर्धिता न्यक्षराभ्यङ्केन विन्यसेत् ॥

त्रींस्त्रीनृचाम् । २ । १० ॥

गायत्रीत्यनुवर्तते । ऋचां गायत्री त्रींस्त्रीन्त्रिसंख्याङ्कान् गृहीत्वा पूर्ववद्वर्धेत । अत्रा प्यृचां पङ्क्तौ तृतीयादिषु कोष्ठेषु त्रि(३)संख्याङ्कक्रमेण पद्मङ्क स्थापयेत् ॥

चतुरश्चतुर॰ प्राजापत्याया॰ । २ । ११ ॥

प्राजापत्यापङ्क्तौ गायत्री चतुरश्चतुर॰ संख्याङ्कान् गृहीत्वा वर्धेत । अत्रापि तृतीया दिषु कोष्ठेषु विन्यास पूर्ववदेव ॥

एकैक शेषे । २ । १२ ॥

अनुक्त शेष । यत्र गायत्र्यां संख्याशब्दिनोक्ता सैकैक संख्याङ्कं गृहीत्वा वर्धेत । दैवी याजुषी च शेषशब्देनोच्यते । प्राजुर्या विशेषाभिधानात् । तेन दैवी तृतीयादिषु कोष्ठेषु क्रमेणैकैकमक्षरं गृहीत्वा वर्धेत । तथैव याजुषी ॥

जक्षादासुरी । २ । १३ ॥

एकैकमित्यनुवर्तते । आसुरी गायत्री एकैकमक्षरं सृजेत् । उत्तरेषु कोष्ठेषु पूर्वो प्रासाया हासो विधीयते । सेऽङ्का क्रमेण स्याप्या॰ ॥

वान्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यः । २ । १४ ॥

वानीति छन्दांसि गायत्र्याः पुरस्तात् उष्णिग्-अनुष्टुप्-बृहती-पङ्क्ति-त्रिष्टुप्-जगत्या ख्यानि क्रमेण भवन्ति ॥

तिस्रस्तिस्र॰ सनाम्न्य एकैका प्राक्त्र्यः । २ । १५ ॥

याजुषीं पङ्क्तिमारभ्य तिस्रो याजुषी साम्नी आर्षी चेति गायत्र्यो मिलिता एका पद्त्रि शदक्षरा प्राक्त्री गायत्री भवति । सनाम्न इत्येकसंज्ञा इत्यर्थः । तिस्रस्तिस्र इति वीप्सया परेषामुष्णिगादीनामिह ग्रहणम् । तथैकैकेति वीप्सया ता एवं प्राक्त्र्यो भवन्तीति विधीयते ।

ब्राह्म्य इति गायत्र्यादीनां जगतीपर्यन्तानां विशेषणमेव । याजुषी साम्नी आर्ची चोष्णिग्मिलिता एकीकृता द्वाचत्वारिंशदक्षरा ब्राह्म्युष्णिग्भवति। एवं तिस्रोऽनुष्टुभ सगता सत्यो-ऽष्टाचत्वारिंशदक्षरैका ब्राह्म्यनुष्टुव् भवति । ता एव तिस्रो वृहत्य· संगता सत्यश्चतु प-ञ्चाशदक्षरा एका ब्राह्मी बृहती भवति । ता एव तिस्र पङ्क्तय संगता. षष्ट्यक्षरा एका ब्राह्मी पङ्क्तिर्भवति। ता एव तिस्रस्त्रिष्टुभ संगता षट्षष्ट्यक्षरा एका ब्राह्मी त्रिष्टुप् भवती । ता एव तिस्रो जगत्य संगता द्वासप्तत्यक्षरा एका ब्राह्मी जगती भवति । अत्राष्टम्यां पङ्क्तौ प्रथमे कोष्ठे ब्राह्मीशब्दं व्यवस्थाप्य द्वितीयादौ क्रमेण गायत्र्यादीना षट्त्रिंशदा-(३६) यङ्कान् विन्यसेत् ॥

प्राग्यजुषामार्ष्य इति । २ । १६ ॥

तिस्रस्तिस्र इत्यनुवर्तते । यजुषा पङ्क्ते प्राक् प्राजापत्या आसुरी दैवीति यास्तिस्रो गायत्र्य सगता सत्यश्चतुर्विंशत्यक्षरा एका आर्षी गायत्री भवति । ता एव तिस्र उष्णिहः सगता अष्टाविंशत्यक्षरा एका आर्षी उष्णिक् संपद्यते । ता एव तिस्रोऽनुष्टुभः संगता द्वात्रिंशदक्षरा एका आर्षी अनुष्टुव् भवति। ता एव तिस्रो वृहत्य· सगता षट्त्रिंशदक्षरा एका आर्षी बृहती भवति । ता एव तिस्र· पङ्क्तय संगताश्चत्वारिंशदक्षरा एका आर्षी पङ्क्तिर्भवति । ता एव तिस्रस्त्रिष्टुभ संगताश्चतुश्चत्वारिंशदक्षरा एका आर्षी त्रिष्टुव् भवति । ता एव तिस्रो जगत्य संगताः अष्टाचत्वारिंशदक्षरा एका आर्षी जगती भवति । अत्र प्रथमायां पङ्क्तौ प्रथमे कोष्ठे आर्षीशब्दं व्यवस्थाप्य द्वितीयादिषु क्रमेण चतुर्विंशत्याद्यङ्कान्विन्यसेत् । प्रथमपङ्क्तेर्द्वितीयादिकोष्ठेष्वङ्कानामुपरि गायत्र्यादीनि ना-मानि विन्यसेत् । अयं स्पष्टतर· प्रदर्शनोपायः[1] ।

छन्द	गायत्री	उष्णिग्	अनुष्टुब्	वृहती	पङ्क्ति	त्रिष्टुब्	जगती
आर्षी	२४	२८	३२	३६	४०	४४	४८
दैवी	१	२	३	४	५	६	७
आसुरी	१५	१४	१३	१२	११	१०	९
प्राजापत्या	८	१२	१६	२०	२४	२८	३२
याजुषी	६	७	८	९	१०	११	१२
साम्नी	१२	१४	१६	१८	२०	२२	२४
आर्ची	१८	२१	२४	२७	३०	३३	३६
ब्राह्मी	३६	४२	४८	५४	६०	६६	७२

इति भट्टहलायुधकृताया छन्दोवृत्तौ द्वितीयोऽध्याय· ।

---

१ गायत्र्यादिसप्तच्छन्दसामार्ष्यादयष्टसज्ञाभि षट्पञ्चाशद्भेदा । तेषामुदाहरणानि वृत्तिकृता न दर्शितानि । प्रचलितवेदशाखासु तेषा कात्स्न्र्येन प्राप्तेर्दुर्घटत्वाद्यथाप्राप्तं कानिचित्प्रदर्श्यन्ते—तत्रार्ष्यस्तत्प्रकरणे दर्शयितव्या । **दैवी गायत्री**—'ओम्' । **दैव्युष्णिग्**—'भुव·' । **दैवी बृहती**—'भुर्भुव स्व ' । **आसुरी गायत्री**—'आपो ज्यो-

निरगोऽमृत प्रजापतिर्भुव स्वरोम्' । प्राजापत्या गायत्री—"अग्निर्ज्योतिर्ज्योतिरग्निः (यजुर्वेदे—अ० ३ म० ९)। साम्नी त्रिष्टुप्—"महिरापो मिश्वर्धन्व दर्वानाम्भुरण्वा नान् सार्ङ्गयो मुर्म्यपद (ऋग्वेदे—म० ४ अ० ७ व० ३४ म० २५) 'पुरुतम पुरूणां म्नोतृणां पिवाचि' (सामवेदे—उ० प्र० १ अ० २)। आर्ची गायत्री—'अग्ना ३ इ पर्सा-यस्मुर्देपेन्र स्यद्वा सोमंम्पिव म्याहा' (यजुर्वेदे—अ० ८ म० १०)। आर्ची त्रिष्टुप्— अग्निं नरो दीधितिभिरण्योहमाप्युत जनयत प्रशस्त । दूरेदृशं गृहपतिमथ युम' (सामवेदे—उ० प्र० ६ अ० १म० १०)। प्राजापत्या त्रिष्टुप्— परेहि मृत्युग्मृतं न आगाद्वयम्यत्तो मो अमय कृणोतु । पर मृत्यो अनु परेहि पन्थां यस्ते स इतरा देव यानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा न प्रजां रीरिषो मोत वीरान् ॥ इति मषदेव इति दिक्

अत्रेदमवधेयम्—पिङ्गलाचार्यकृतगायत्र्यादिलक्षणेन यैर्मन्त्रा व्यभिचरिता भवन्ति प्रत्युतार्ष्यक्षपिमिमतच्छन्दोभिरुक्ताम्ते यज्यमाणनिचृद्-भुरिग विराद्-स्वराड् रूप समाधेया । यथा स्वरित्यस्यैकाक्षरत्वेऽपि नानुष्टुप्छन्दस्त्वं विरुद्धम् । एव च ये केषु ये मन्त्रा गन्ति तेषां कात्यायनादिभिः सर्वानुक्रमणिकाकारैर्मन्त्यादिभिस्व यानि च्छन्दांसि विहितानि तेषामेव स्थितगतिधिन्तनीया' इति न्यायावधारणत्व प्रतिपादनार्थमेव भगवता पिङ्गलाचार्येणेदं छन्द शास्त्रं प्रणीतम् न तु तेषां बाधकम् तथाह्यक्षरादिक्रमेण गायत्र्यादिच्छन्दसां शास्त्रविहितस्व प्रदर्श्यते—

अक्षरा	गायत्री	
(१)	दैवी	•
(२)	,,	भुरिक्
(३)		स्वराट्
(४)	मानुषी	विराट्
(५)		निचृत्
(६)	,,	•
(७)		भुरिक्, प्राजापत्या निचृत्
(८)	प्राजापत्या	
(९)	,	•
(१०)	,,	स्वराट्, साम्नी, विराट्
(११)	साम्नी	निचृत्
(१२)	,,	•
(१३)	,,	भुरिक्, आसुरी, विराट्
(१४)	,,	स्वराट्, , निचृत्
(१५)	आसुरी	•
(१६)	,,	भुरिक्, आर्ची विराट

तृतीयोऽध्याय ।

पादः । ३ । १ ॥

अधिकारोऽयमाध्यायपरिसमाप्ते. । यदित ऊर्ध्वमनुक्रमिष्यामस्तत् 'पाद ' इत्यधिकृतं वेदितव्यम् । वक्ष्यति च—'गायत्र्या वसव ' (पि० सू० ३।३) इति ॥

इयादिपूरणः । ३ । २ ॥

'पादः' इत्यनुवर्तते । इयादि· पूरणो यस्य स इयादिपूरण· । आदिकरणेन उवादयोऽपि गृह्यन्ते । तत्रायमर्थ —यत्र गायत्र्यादिच्छन्दसि पादस्याक्षरसख्या न पूर्यते,

---

(१७)	आसुरी	स्वराट्,	आर्ची निचृत्
(१८)	आर्ची	०	
(१९)	,,	भुरिक्	
(२०)	,,	स्वराट्	
(२१)	पादनिचृत्	०	
(२२)	आर्षी	विराट्	
(२३)	,,	निचृत्	
(२४)	,,	०	
(२५)	,,	भुरिक्	
(२६)	,,	स्वराट्	
(३४)	ब्राह्मी	विराट्	
(३५)	,,	निचृत्	
(३६)	,,	०	
(३७)	,,	भुरिक्	
(३८)	,,	स्वराट्	

उष्णिगादिच्छन्दसामप्यनया रीत्याक्षरसंख्योहनीया एवमेवाथर्ववेदोक्तमन्त्रेष्वपि छन्द समाधानमूह्यम्

१. 'उवादय ' इत्यादिशब्देन यण्संयोगसवर्णदीर्घगुणवृद्धिव्यूहादयो गृह्यन्ते । तथा च **सर्वानुक्रमणिका**कार —'पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेत' । अत्रैतद्भाष्यकारश्च क्षैप्रसंयोगो यकारवकारसंयोगो यण्संयोग इत्यन्ये, कुत एतत्, यण् हि क्षिप्रं भवति इति क्षैप्र· । मध्वत्रेत्यादावेकमात्रामर्धमात्रा करोतीति । 'एक. पूर्वपरयो ' (पा० सू० ६।१।८४) इत्यधिकारसंपन्नसंधिरेकाक्षरीभाव । तत्र द्वे अक्षरे एकाक्षरीक्रियेते इति । तत्र यण्व्यूहो यथा 'त्वामिन्द्र वज्रिन्' इत्यादौ वजरिन्नित्यादि, सवर्णदीर्घव्यूहो यथा—'यं त्रायध्वेऽस्मासते' इत्यादौ 'अस्य आसते' इति, गुणव्यूहो यथा—'उप इन्द्र सुपर्वणीम्' इत्यादि, वृद्धिव्यूहो यथा—'ब्रह्मा एतु सदनात्' इत्यादि.

तत्रेयादिभि पूरयितव्या। तथा—'तत्सवितुर्वरणियम्' (यजुर्वेद-अ० ३० म० २) 'दिवं गच्छ सुव पुत्र' इत्यादयः॥

गायत्र्या वसव'। ३। ३॥

'पाद' इत्यनुवर्तते। परिभाषणम्। गायत्र्या पादो वसवोऽनुगामिनि भवन्ति। यत्र गायत्र्या पादोऽभिधास्यते तत्राष्टाक्षरा प्राप्त॥

जगत्या आदित्या। ३। ४॥

'पाद' इत्यनुवर्तते। जगत्या पादा द्वादशाक्षरो भवति। यत्र जगत्यागत पादस्तत्र द्वादशाक्षरा गृह्यते॥

विराजो दिश। ३। ५॥

पाद इत्यनुवर्तते। यत्र विराजः पाद इत्युच्यते, तत्र दशाक्षर प्रकल्पयेत्॥

त्रिष्टुभो रुद्रा'। ३। ६॥

त्रिष्टुभः 'पाद' इत्युक्ष सर्वत्रैकादशाक्षरो गृह्यते। अभिधानाभाव परिभाषा एषा श्रयते॥

एकद्वित्रिचतुष्पादुक्तपादम्। ३। ७॥

एभिश्चतुर्भिर्लक्षणैश्च पादो यस्य तत् 'उक्तपाद' छन्द। यस्य छन्दसो यावत पाद परिमाणमिच्छन्दसश्च पादस्य यावदक्षराणि, तावद्भिर्वा तावद्भिर्वा तच्चतुष्पाद् भवति। गायत्री च त्रिपदर्चे। चतुर्भिरक्षरैः पादैरनुष्टुप च स्यात्॥

आद्य चतुष्पादनुष्टुभि। ३। ८॥

'ऋतु पञ्चम लक्षणया पञ्चमः पादोऽभिधीयते' इति पादश्चतुष्पाद गायत्र्यं छन्दो भवति। एवं चतुर्विंशत्यक्षराणि भवन्ति। यथा—

'इन्द्रः सुत्रामणि (१) वैस्त्र पीपेति (२)।
सुम्नयन्ता मृपा (३) यमत्तु गार्गहि (४)॥

क्वचिन्त्रिपादपिपि'। ३। ९॥

क्वचिदेते यथोक्तलक्षणोपलक्षित पादत्रिभिर्गायत्र्यश्च भवन्ति। एवमष्टाविंशत्यक्षराणि जायन्ते। यथा—

'युवाकु हि शचीनां (१) युवाकु सुमतीनाम् (२)।
भूयाम वाजदाम्नाम् (३)॥' (ऋग्वेद-अ० १ अ० १ व० १२ म०४)

सा पादनिचृत्। ३। १०॥

सर्वा गायत्री 'पादनिचृत्' इति सज्ञा-लभते। प्रयोक्तुरदृष्टाभ्युदयसंपादनार्थमियं संज्ञा। यदभ्यानादित्वान्महर्षेरपि च न दुष्यति॥

---

१ छन्दोमात्रविषयकमिदम् शास्त्रिक तु 'पादश्चतुर्भागः (पि० सू० ४।१०) इति विशेषोऽत्र यक्ष्यते

षट्कसप्तकयोर्मध्येऽष्टावतिपादनिचृत् । ३ । ११ ॥

प्रथम षडक्षर, द्वितीयोऽष्टाक्षर, तृतीय सप्ताक्षरः । एवं त्रिभि पादैर्या गायत्री सा 'अतिपादनिचृत्' इति सज्ञा लभते । 'त्रिपात्' इत्यनुवर्तनीयम् । यथा—

['प्रेष्ठं वो अतिथिं (१) स्तुषे मित्रमिव प्रियम् (२) ।
अग्निं रथं न वेद्यम् (३) ॥'] (ऋग्वेदे–अ० ६ अ० ६ व० ५ म० १)

द्वौ नवकौ षट्कश्च नागी । ३ । १२ ॥

द्वौ नवाक्षरौ पादौ, षडक्षरस्तृतीयः । एवं त्रिभि पादै 'नागी' नाम गायत्री भवति । यथा—

['अग्ने तमद्याश्वं न स्तोमै (१) क्रतुं न भद्रं हृदिस्पृशम् (२) ।
ऋद्धामा त ओहैः (३) ॥'] (ऋग्वेदे–अ० ३ अ० ५ व० १० म० १)

विपरीता वाराही । ३ । १३ ॥

इयमेव नागी गायत्री विपरीता यदा भवति तदा 'वाराही' नाम भवति । प्रथमः षडक्षर पादो, द्वितीयतृतीयौ नवाक्षरौ । यथा—

['अग्ने मृळमहाँ (१) असि यऽईमा देवयुं जनम् (२) ।
इयेर्थ बर्हिरासदम् (३) ॥'] (ऋग्वेदे–अ० ३ अ० ५ व० ९ म० १)

षट्कसप्तकाष्टकैर्वर्धमाना । ३ । १४ ॥

षडक्षर प्रथम पाद, द्वितीयः सप्ताक्षर, तृतीयोऽष्टाक्षर । एवं त्रिभि पादैः 'वर्धमाना' गायत्री भवति । यथा—

'अग्ने स्तवानो (१) होता विश्वेषां हितः (२) ।
देवेभिर्मानुषे जने (२) ॥' (सामवेदे–पू० प्र० १ अ० १ म० २)

विपरीता प्रतिष्ठा । ३ । १५ ॥

सैव वर्धमाना गायत्री विपरीता यदा भवति तदा 'प्रतिष्ठा' नाम गायत्री भवति । अष्टाक्षर प्रथम पाद, द्वितीयः सप्ताक्षर, षडक्षरस्तृतीय । यथा—

'आपः पृणीत भेषजं (१) वरूथं तन्वे ३ मम (२) ।
ज्योक्च सूर्यं दृशे (३) ॥' (ऋग्वेदे–अ० १ अ० २ व० १२ म० २१)

तृतीयं द्विपाज्जागतगायत्राभ्याम् । ३ । १६ ॥

तृतीयशब्देनैतदध्यायस्थसूत्रपाठक्रमापेक्षया विराजमाह । तथा चोक्तम्—'विराजो दिशः' (पि० सू० ३।५) इति । यदा द्वादशाक्षरोऽष्टाक्षरश्च पाद स्यात्, ततस्ताभ्या 'द्विपाद् विराड्' नाम गायत्री भवति । यथा—

'नृभिर्येमानो हर्यतो विचक्षणो (१) ।
राजा देवः समुद्रियः (२) ॥' (ऋग्वेदे–अ० ७ अ० ५ व० १५ म० १६)

---

१ 'इया इथ' इति गुणव्यूहान्नवाक्षरत्वम्

त्रिपाभैष्टुभैः । ३ । १७ ॥

तृतीयम्' इत्यनुवर्तते । एकादशाक्षरे पादे त्रिपाद् विराड् नाम गायत्री भवति ।

था—

'दुहीयन्मित्रधितये युवाकु राये च नो मिमीत वाजवत्ये ।
इषे च नो मिमीत धेनुमत्यै ॥' (ऋग्वेदे—अ० १ अ० ८ व० २३ म० १)
[पूर्णदोम यशसे जुहोमि यो (१) ऽस्मै जुहोति धरमन्न ददाति (२) ।
वरं वृणे यशसा मामि स्वेके (३) ॥ इति भवदेव ॥]

इति गायत्र्यधिकार ।

उष्णिग्गायत्रौ जागतश्च । ३ । १८ ॥

यत्र गायत्र्यावष्टक्षरौ पादौ जागतश्च द्वादशाक्षरः, एष त्रिभि उष्णिग्' नाम न्दो भवति । अत्र च क्रमो न विवक्षित । पादसंख्यामात्र विधीयते ॥

ककुम्मध्ये चेदन्त्यः । ३ । १९ ॥

गायत्रयो पादयोर्मध्ये जागतश्चेत्पादो भवति तदेयम् उष्णिक् 'ककुप्'सज्ञां लभते ।

था—

सुवेव समहासति (१) सुवीरो नरो मरुत स मर्त्य (२) ।
प आदित्ये स्वाम् ते (३) प' (ऋग्वेदे—अ० ४ अ० ३ व० १३ म० १५)

पुरउष्णिक्पुर' । ३ । २० ॥

स एव पादो जागतश्चेत् प्रथमो भवति गायत्री च परत तदा पुरउष्णिक् नाम वति । यथा—

'अप्स्व१न्तरमृतमप्सु भेषजं (१) अपामुत प्रशस्तये (२) ।
देवा भवत वाजिनः (३) प' (ऋग्वेदे—अ० १ अ० २ व ११ म० १९)

परोष्णिक्पर । ३ । २१ ॥

---

१ 'गातारं त्रायत इति गायत्री' इति निरुक्तकार अत्र सर्वानुक्रमणिकायां निक्षेपो यथा—'प्रथम छन्दस्त्रिपदा गायत्री (१) पञ्चकाश्चत्वारः (२) पङ्क्त्यैकः (३) चतुर्थश्चतुष्को वा पदपङ्क्तिः (४) पट्सप्तैकादश उष्णिग्गर्भा (५) त्रयः सप्तकाः पादनिचृत् (६) मध्यमः पङ्क्त्येदसिनिचृत् (७) दश कपथ्यबृहतीमध्या (८) यस्यास्तु पङ्क्तसप्तकाष्टकाः सा वर्धमाना (९) विपरिता प्रतिष्ठा (१०) द्वौ पङ्क्तौ सप्तकश्च हसीयसी (११)' इत्येकादशविधा गायत्री सत्र त्रिप्रकारा पदपङ्क्त्य पङ्क्त्यछन्दसि भगवता सूत्रकारेण निवेशिता 'हसीयसी' इत्यधिकोक्ता अन्यानि च सर्वत्र तुल्यान्येवति २—३ मर्तीय ' इतीय शब्देन अस्य आसते' इति दीर्घव्यूहाश्च पादपूर्तिः

एवं जागत पाद परतश्चेद्भवति, पूर्वौ च गायत्रौ, तदा 'परोष्णिक्' नाम च्छन्दो भवति ।

'उष्णिग्गायत्रौ जागतश्च' (पि० सू० ३।१८) इत्यनेन गतार्थमेतत् । विशेषसंज्ञाभिधानार्थं पुनरुच्यते प्रथमसूत्रे (पि० सू० ३।२०) उष्णिग्ग्रहणमधिकारार्थम् ॥

यथा—

'अग्ने॒ वाज॑स्य॒ गोम॑तु (१) ईशा॑नः सहसो यहो (२) ।
अ॒स्मे धे॑हि जातवेदो॒ महि॒ श्रवः॑ (३) ॥' (ऋग्वेदे–अ०१अ० ५,व० २७म०४)

चतुष्पाद्दषिभिः । ३ । २२ ॥

सप्ताक्षरैश्चतुर्भि पादै 'उष्णिक्' एव भवति । यथा—

न॒दं व॒ ओद॑तीनां (१) न॒दं यो युव॒तीनाम् (२) ।
पति॑ वो॒ अद्र्या॑नां (३) धेनू॒नामि॑षुध्यसि (४) ॥'

(ऋग्वेदे–अ० ६ अ० ५ व० ५ म० २)

इत्युष्णिगधिकार ।

अनुष्टुब्गायत्रैः । ३ । २३ ॥

'चतुष्पाद्' इत्यनुवर्तते । गायत्रैरष्टाक्षरै पादैश्चतुष्पाच्छन्द. 'अनुष्टुप्'संज्ञं भवति । यथा—

स॒हस्र॑शीर्षा॒ पुरु॑षः (१) सहस्राक्ष स॒हस्र॑पात् (२) ।
स भूमि॑ꣳ स॒र्वत॑ः स्पृ॒त्वा (३) अत्य॑तिष्ठद्दशाङ्गु॒लम् (४) ॥ '(यजुर्वेदे–अ ३१म १)

त्रिपात्क्वचिज्जागताभ्यां च । ३ । २४ ॥

'अनुष्टुब्' इत्यनुवर्तते । चकाराद्गायत्रग्रहणं च । गायत्रेणैकेन ततो द्वाभ्या जागताभ्या क्वचित् 'त्रिपादनुष्टुब्' भवति ॥

मध्येऽन्ते च । ३ । २५ ॥

जागतयोः पादयोर्मध्येऽन्ते च यदा गायत्र पादो भवति, तदाप्यनुष्टुबेव स्यात् । यथा—

---

१ 'अग्नीयानाम्' इतीयशब्देन पूर्ति . २ 'चतुर्वृद्धारम्भादूर्ध्वं निह्यत इत्युष्णिक् इति निरुक्तम् । अयमेव शब्द आकारान्तोऽपि यथा—'उ॒ष्णिहा॒ छन्द॑ इन्द्रि॒यम्', (यजुर्वेदे–अ० २१ म० १३) 'बृ॒हत्यु॒ष्णिहा॑ क॒कुप्सू॒चीभि॑. शम्यन्तु त्वा' (यजुर्वेदे-अ० २३ म० ३३), 'शृ॒णा॒तु॒ ग्रीवाः॑ प्र शृ॑णातू॒ष्णिहा॑ वृ॒त्रस्ये॒व॒ शची॒पति॑ ' (अथर्ववेदे-का० ६ अ० १३४ सू० १) । भगवता कात्यायनोक्ता यथा—'द्वितीयमुष्णिक्त्रपदा, आद्यो द्वादशश्चेत्पुरउष्णिक् (१) मध्यमश्चेत्ककुप् (२) त्रैष्टुभजागतचतुष्का न्यङ्कुशिराः (३) एकादशिनोऽपरस्तनुमध्या (४) आद्यः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भाः (५) मध्यश्चेत्पिपीलिकमध्या (६) चतुःसप्तक उष्णिगेव (७) इति' सप्तविधा उष्णिक्.

'पर्षूषु मेघम्व पार्वसातये (१) परिवृग्राणि सुक्रणिः (२) ।
द्विपस्तुरण्या कृणुषा मं हंमसे (३) ॥' (ऋग्वेदे—अ० ७ अ० ५ व० २२म० १)

अन्तपक्ष उदाहरणम्—

'मा कस्मै धातमेर्म्यमित्रिणे नो (१) माकुर्या नो गृहेभ्यो पेनयो गु (२) ।
स्तनामुज्रोर्मेधिभी (२) ॥' (ऋग्वेदे—अ० १ अ० ८ व० २३ म० ८)

इत्यनुष्टुबधिकार ।

बृहती जागतस्त्रयश्च गायत्राः । ३ । २६ ॥

एको जागत पाद, त्रयश्च गायत्रा, तदा 'बृहती' नाम छन्दो भवति ॥

यथा—

'मत्स्वा सुशिप्र हरिवस्तदीमहे (१) त्वे आ भूषन्ति वेधसः (२) ।
तव श्रवांस्युपमान्युक्थ्या (३) सुतेष्विन्द्र गिर्वणः (४) ॥'
(ऋग्वेदे अ० ६ अ० ७ व० ३ म० २)

पथ्या पूर्वश्चेत्तृतीयः । ३ । २७ ॥

बृहती' इत्यनुवर्तते । पूर्वः पादो जागतो यदि तृतीयो भवति, अन्ये गायत्रा, तदा बृहती पथ्या' नाम छन्दो भवति । यथा—

'मा चिदन्यद्विशंसत (१) सखायो मा रिषण्यत (२) ।
इन्द्रमित्स्तोता वृषणं सचा सुते (३) मुहुरुक्था च शंसत (४) ॥'
(ऋग्वेदे—अ० ५ अ० ७ व० १० म० १)

न्यङ्कुसारिणी द्वितीयः । ३ । २८ ॥

१–२ प्रथमतृ० अथिया' इत्युपरिमृक्षन्देन पादपूर्तिं ३ ४ अमिम अ अश्वी' इति पादपूर्ति सायणभाष्ये कृतिरस्य नाम । ५ सर्वानुक्रमणिकायां था—'तृतीयमनुष्टुप्, चत्वारोऽष्टकाः (१) पञ्च पञ्चकाः षट्कश्चैको म ापद्पङ्क्तिः (२) जागतावष्टकश्च कृतिः (३) मध्ये वेदशकाः पिपीलिका ध्या (४) नवकयोर्मध्ये जागतः कावितृद् (५) नवधैराजस्त्रयोदशैर्न रूपी (६) दशकास्त्रयो विराट् (७) एकादशको वा (८)' इत्यथवनुष्टुभ । मनुष्योमनावनुष्टुप्' इति ब्राह्मणे निरुक्ते ६ इतोऽग्रे वैदिकान्युदाहरणानि कल्पि-कातानुमितेषु पुस्तकेषु न वर्तन्ते तान्यन्विष्य लिख्यन्ते । ७ पूर्वसूत्रपठित । प्रथम इत्यर्थः ।

'पूर्वश्चेद्' इत्यनुवर्तते । पूर्वश्चेज्जागत पादो द्वितीयो भवति, शेषाश्च गायत्र्या, तदा 'न्यङ्कुसारिणी' नाम्नी बृहती भवति । यथा—

'मत्स्यपायि ते महः (१) पात्रस्येव हरिवो मत्सरो मदः (२) ।
वृषा ते वृष्ण इन्दुः (३) वाजी सहस्रसातमः (४) ॥'

(ऋग्वेदे—अ० २ अ० ४ व० १८ म० १)

स्कन्धोग्रीवी क्रौष्टुकेः । ३ । २९ ॥

इयमेव 'न्यङ्कुसारिणी' क्रौष्टुकेराचार्यस्य मतेन 'स्कन्धोग्रीवी' नाम छन्दो भवति । आचार्यग्रहणं पूजार्थम् ॥

उरोबृहती यास्कस्य । ३ । ३० ॥

इयमेव न्यङ्कुसारिणी यास्कस्याचार्यस्य मतेन 'उरोबृहती' नाम्नी भवति ॥

उपरिष्टाद्बृहत्यन्ते । ३ । ३१ ॥

यदा जागत पादोऽन्त्ये भवति, तदा 'उपरिष्टाद्बृहती' नाम भवति । यथा—

'न तमंहो न दुरितं (१) देवासो अष्ट मर्त्यम् (२) ।
सजोषसो यमर्यमा (३) मित्रो नयन्ति वरुणो अतिद्विषः (४) ॥'

(ऋग्वेदे अ० ८ अ० ७ व० १३ म० १)

पुरस्ताद्बृहती पुरः । ३ । ३२ ॥

स एव जागत पाद पूर्वश्चेद् भवति, शेषाश्च गायत्र्या, तदा 'पुरस्ताद्बृहती' नाम भवति । यथा—

'महो यस्पतिः शवसो असाम्या (१) महो नृम्णस्य तूतुजिः (२) ।
भर्ता वज्रस्य धृष्णोः (३) पिता पुत्रमिव प्रियम् (४) ॥'

(ऋग्वेदे—अ० ७ अ० ७ व० ६ म० ३)

'बृहती जागतस्त्रयश्च गायत्र्या' (पि० सू० ३।२६) इत्यनेनैव गतार्थमेतत् । सज्ञा-विशेषप्रदर्शनार्थं पुनरुच्यते ॥

क्वचिन्नवकाश्चत्वारः । ३ । ३३ ॥

क्वचिद्वेदे नवाक्षराश्चत्वार पादा दृश्यन्ते, सापि बृहत्येव ।

---

१ 'मत्सीय' इति पूर्त्या निचृत्त्वान्न दोष २. 'यदि जागत पादः पुरो भवति, 'अन्ते च त्रयो' इति लिखितपुस्तकयो । ३. 'असामिया' इति पूरणात्पादपूर्ति । ४ 'गतार्थत्वात्' इति लिखितपुस्तकयोः ।

यथा—

'ध्रुव द्यावा॑ पृथि॒वी रन् ध्रुव (१) वा॒मद्रि॑रर्तसखम् (२) ।
ता नो॑ वसू सुगोपा स्यात (३) पात॒ नो॒ दुर्का॑दघा॒योः (४) ॥'

(ऋग्वेद—अ॰ १ अ॰ ८ व॰ २३ म॰ ७)

वैराजौ गायत्रौ च । ३ । ३४ ॥

यत्र वैराजौ पादौ पूर्वौ दशाक्षरौ भवत ततो गायत्रौ च सापि बृहती। यथा—

'अग्ने पि॑पर्षपु॒रसं॑ नि॒त्र (१) राधो॑ अमर्त्य॒ आ दा॒शुषे॑ (२) ।
जातवेदो॒ बृह॒ा व॑ह (३) मृ॒ा दे॒वाँ इ॑ह॒ुध॑ः (४)' ॥

(ऋग्वेदे—अ॰ १अ॰३व २८ म॰ १)

त्रिभिर्जागतैर्महाबृहती । ३ । ३५ ॥

त्रिभिर्जागतै पादैश्छन्दो महाबृहती' नाम । यथा—

'अभी॑अमो अमृत॒ मर्त्ये॒ष्वा॑ (१) ऋ॒तस्य॒ धर्मं॑ऋ॒तस्य॒ चार्क॑ण (२) ।
सदा॑सरो॒ वाज॒मच्छा॑स नि॑ष्यदत् (३) ॥

(ऋग्वदे—अ॰ ७ अ॰ ५ व॰ २२ म॰ ४)

सतोबृहती वाष्टिनः । ३ । ३६ ॥

इमामेव महाबृहतीं वाष्टिन आचार्यस्य मतेन सतोबृहती' नाम भवति ॥

इति बृहत्यधिकार ।

---

१ सायणभाष्ये तु—'ध्रुवं द्यौरिति—' सप्तमी [ऋग्] विष्टारबृहती । अष्टिनोर्मध्ये दशकौ विष्टारबृहतीति ताण्डिनोपेतत्वात् । २—३ अमर्तिय 'वरुण' इति पूर्त्या पादपूरणम् ४ ऋग्वेद एतल्लक्षणोपेता महाबृहत्यूष्णबृहतीनाम्नोपलभ्यते सायणभाष्ये भाष्यक्षराण्यष्टार पादा एको द्वादशाक्षर सा महाबृहतीत्येतल्लक्षण चतुर्थाष्टकस्याष्ट माध्याये प्राप्यते । एवमत्रैवायुजौ आगतौ सतोबृहती अष्टाक्षराण्य पादा द्वादशाक्षरौ द्वौ पादौ सा महासतोबृहती, अष्टिनकयो द्वौ जागतौ सा (अपि) महासतोबृहती, अथ च तृतीयाष्टकस्य प्रथमाध्याये विराड्रूपा सतोबृहती, प्रथमा ष्टकस्य सप्तमाध्याय आद्यौ द्वादशाक्षरौ पादौ द्वादशाक्षरस्तृतीयस्ततो द्वादशाक्षरौ सा भवमध्या महामहाबृहती, ककुभतीसाधाम्य बृहतीमेवा ५ सर्वानुक्रमणिकायां यथा—'चतुर्थे बृहती, तृतीयो द्वादशाद्यश्चेत्पुरस्ताद्बृहती (१) द्वितीय श्चेन्न्यङ्कुसारिणी, उरोबृहती, स्कन्धोग्रीवी वा (२) मध्यश्चेदुपरिष्टाद्बृहती (३) अष्टिनोर्मध्ये दशकौ विष्टारबृहती (४) त्रिजागतोर्ध्वबृहती (५) त्र योदशिनोर्मध्येऽष्टकः पिपीलिकमध्या (६) नवकाष्टैकादशाष्टिनो विषम पदा (७) चतुर्नवका बृहत्येव (८) इत्यष्टविधा बृहत्य परिवर्हणाद् बृहतीति निरुक्तकार

पङ्क्तिर्जागतौ गायत्रौ च ३ । ३७ ॥

यदा द्वौ पादौ जागतौ भवतस्ततो गायत्रौ च, तदा 'पङ्क्ति[1]' नाम छन्द. ॥

पूर्वौ चेदयुजौ सतः पङ्क्तिः । ३ । ३८ ॥

यत्र पूर्वोद्दिष्टौ पादावयुजौ भवत', प्रथमतृतीयौ पादौ जागतावित्यर्थ, द्वितीयचतुर्थौ च गायत्रौ तच्छन्द. 'सत पङ्क्ति' नाम भवति ॥ यथा—

'यं त्वा देवासो मनवे दधुरिह (१) यजिष्ठं हव्यवाहन (२) ।
यं कण्वो मेध्यातिथिर्धनस्पृतं (३) यं वृषा यमुपस्तुतः (४) ॥'

(ऋग्वेदे[2]—अ० १ अ० ३ व० ९ म० १०)

विपरीतौ च । ३ । ३९ ॥

यदा तावेव पादौ विपरीतौ भवतः, तदापि सत पङ्क्तिरेव । अयमर्थ —प्रथमतृतीयौ पादौ गायत्रौ, द्वितीयचतुर्थौ [च] जागतौ तदापि सत पङ्क्तिरेव भवति ॥ यथा—

'य ऋष्व. श्रावयत्सखा (१) विश्वेत्स वेद जनिमा पुरुष्टुतः (२) ।
तं विश्वे मानुषा युगे (३) न्द्रं हवन्ते तविषं यतः स्वुचः (४) ॥'

(ऋग्वेदे[3]—अ० ६ अ० ४ व० ३ म० १२)

प्रस्तारपङ्क्तिः पुरतः । ३ । ४० ॥

यदा जागतौ पादौ पूर्वौ भवत , गायत्रौ च परतः, तदा 'प्रस्तारपङ्क्ति' नाम । यथा—

'आ विद्युन्मद्भिर्मरुत. स्वर्कै रथेभि (१) र्यात ऋष्टिमद्भिरश्वपर्णैः (२) ।
आ वर्षिष्ठया न इषा (३) वयो न पप्तता सुमाया. (४) ॥'

(ऋग्वेदे—अ० १ अ०६ व० १४ म० १)

'पङ्क्तिर्जागतौ गायत्रौ च' (पि० सू० ३।३७) इत्यनेन गतार्थमिदं संज्ञाविशेषज्ञापनार्थं पुनरुच्यते ॥

आस्तारपङ्क्तिः परतः । ३ । ४१ ॥

यदा जागतौ पादौ परौ भवत , गायत्रौ च पूर्वौ, तदा 'आस्तारपङ्क्ति' नाम । यथा—

'भद्रं नो अपि वातय (१) मनो दक्षमुत क्रतुम् (२) ।
अधा ते सख्ये अन्धसो वि वो मदे (३) रणन् गावो न यवसे विवक्षसे (४)॥'

(ऋग्वेदे अ० ७ अ० ७ व० ११ म० १)

विष्टारपङ्क्तिरन्तः । ३ । ४२ ॥

यदा जागतौ पादौ मध्ये भवत , आद्यन्तयोश्च गायत्रौ, तदा 'विष्टारपङ्क्तिः' नाम यथा—

---

१. उदाहरणमस्याः प्रस्तारपङ्क्त्या द्रष्टव्यम् । २–३. सायणभाष्ये तु सतोबृहती नाम । ४. कलिकातामुद्रितपुस्तके प्रथममास्तारपङ्क्तिः ।

'अग्ने सप्त अवो पयो (१) महि आगन्ते मुर्वया विभावसो (२) ।
पृक्षमाणो शर्यसा वाजमुक्थ्यम् (३) दधासि द्राशुषे कवे (४) ॥'
(ऋग्वेदे–अ० ८ अ० ७ व० २८ म० १)

संस्तारपङ्क्तिर्वाहि० । ३ । ४३ ॥

यदा तावेव आगती पादौ पङ्क्तिभवत मध्ये च गायत्री, तदा 'संस्तारपङ्क्ति' नाम छन्द । यथा—

'पितुभृतो न तन्तुमित्सुदानवः (१) प्रति दध्मो यजामसि (२) ।
उपा अप स्वसुष्टमः (३) संयतैनि सुजातता (४) ॥'
(ऋग्वेदे–अ० ८ अ० ८ व० १० म० १, ४)

अक्षरपङ्क्तिः पञ्चकाश्चत्वार[1] । ३ । ४४ ॥

पञ्चाक्षरैश्चतुर्भि पादै अक्षरपङ्क्ति' नाम छन्द । ननु चत्वारिंशदक्षरा पङ्क्तिछन्द, सत्कर्थं पञ्चकाश्चत्वार' इत्युच्यते । तत्रोत्तरम्— द्वावप्यल्पग्रह' (पि० सू० ३।४५) इति । अस्मात् सिंहावलोकितन्यायेनाल्पग्रहणमनुवर्तते । तेन पङ्क्तेरल्पत्वं विशेषात्प्राप्ति पादितं भवति यथा—

'प्रेन्वग्नेतु (१) वेधी मनीषा (२) ।
अस्मत्सुतष्टो (३) रयो न पप्रौ (४) ॥'
(ऋग्वेदे–अ० ५ अ० ३ व० २५ म० १)

द्वावप्यल्पग्रः । ३ । ४५ ॥

पञ्चग्रहणमनुवर्तते । पञ्चाक्षराभ्यां पादाभ्यामल्पश्च पङ्क्तिनाम छन्दो भवति, क्वचिदेव वेदे न सर्वत्र ॥

पदपङ्क्ति[2] पञ्च । ३ । ४६ ॥

पञ्चका इत्यनुवर्तते । यदा पञ्चाक्षरा पञ्चपादा भवन्ति, तदा 'पदपङ्क्ति' नाम छन्द । यथा—

'पूर्तं न पूर्तं (१) तनूररेपाः (२) ।
शुचि हिरण्यम् (३) वर्त क्रमो म (४) रोचत स्वधावः (५) ॥'
(ऋग्वेदे–अ० ३ अ० ५ व० १० म० ६)

चतुष्कपङ्क्तौ त्रयश्च । ३ । ४७ ॥

चकार 'पञ्चका' इत्यनुकर्षणार्थं । यदा प्रथमश्चतुरक्षर पाद द्वितीय पञ्चाक्षर, तत त्रय पञ्चाक्षराश्चदा पञ्चपदा पङ्क्तिरेव । यथा—

---

१ कात्यायनाचार्येणेद छन्दो गायत्रीछन्दोभेदमध्ये परिगणितम्, सायणाचार्येण तु 'द्विपदा' इत्युक्तम् २ भुरिग्रूपत्वादेकाक्षराधिक्यम्

'अधाह्यग्ने (१) क्रतोर्भद्रस्य (२) दक्षस्य साधोः (३) ।
रथीर्ऋतस्य (४) बृहतो बभूथ (५) ॥'
(ऋग्वेदे—अ० ३ अ० ५ व० १० म० २)

पथ्या पञ्चभिर्गायत्रैः । ३ । ४८ ॥

पञ्चभिरष्टाक्षरै पादै 'पथ्या' नाम पङ्क्तिर्भवति । अस्योदाहरणम्—
'अक्षन्नमीमदन्त हि (१) अवप्रिया अधूषत (२) ।
अस्तोषत स्वभानवो (३) विप्रा नविष्ठया मती (४) योजा न्विन्द्र ते हरी (५)॥'
(ऋग्वेदे—अ० १ अ० ६ व० ३ म० २)

इति पङ्क्त्यधिकारः ।

अथ त्रिष्टुब्जगत्यधिकार ।

जगती षड्भिः । ३ । ४९ ॥

'गायत्रै' इत्यनुवर्तते । गायत्रै षड्भि पादै 'जगती' नाम छन्दो भवति । यथा—
'आपो न देवीरुपयन्ति (१) होत्रियमव. पश्यन्ति (२) विततं यथा रजः (३) ।
प्राचैर्देवासः प्रणयन्ति (४) देवयुं ब्रह्मप्रियं (५) जोषयन्ते वरा इव (६) ॥'
(ऋग्वेदे—अ. १ अ. ६ व. ४ म. २)

एकेन त्रिष्टुब्ज्योतिष्मती । ३ । ५० ॥

त्रिष्टुभ प्रस्तुतत्वात्प्रत्यासत्तेश्च तस्या एव संवन्ध । एकेन त्रैष्टुभेन पादेनाधिकाराच्चतुर्भिर्गायत्रै पञ्चपात् 'त्रिष्टुब्ज्योतिष्मती' नाम छन्दो भवति । त्रैष्टुभेन सह 'पञ्चभिर्गायत्रै' (पि० सू० ३।४८) इत्युक्ते चत्वार एव गायत्रा पादा लभ्यन्ते । यथोपाध्यायेन सह पञ्च शिष्या आगता इत्युक्ते उपाध्यायपञ्चमा प्रतीयन्ते ॥

---

१ 'नु इन्द्र ते' इति व्यूहात्पादपूर्ति　२ **सर्वानुक्रमणिकायां कात्यायनोक्ता यथा—'पञ्चमं पङ्क्तिः पञ्चपदा (१) अथ चतुष्पदी. विराड्दशका (२) अयुजौ जागतौसतोबृहती (३) युजौ चेद्विपरीता (४) आद्यौ चेत्प्रस्तारपङ्क्तिः (५) अन्तौ चेदास्तारपङ्क्ति (६) आद्यन्तौ चेत्संस्तारपङ्क्तिः (७) मध्यमौ चेद्विस्तारपङ्क्तिः (८)'** इत्यष्टविधा पङ्क्तय पङ्क्ति पञ्चपदेति निरुक्तकार　३ 'जगतीनाम पङ्क्तिर्भवति' इति लिखितपुस्तके ४. एकपदा त्रिष्टुब् जगती च वाह्वृच्ये प्राप्येते । ५. 'एकेनेति 'पथ्या पञ्चभिर्गायत्रै ३ । ४८ ॥' इत्यतो गायत्रपादस्य प्रस्तुतत्वात् प्रत्यासत्तेश्च तस्यैव संवन्ध'। गायत्रेणैकेन पादेनाधिकारात् त्रिभिस्त्रैष्टुभै· पादैश्चतुष्पात् त्रिष्टुप् 'ज्योतिष्मती' नाम । ' इति कलिकातामुद्रितपुस्तकस्य टिप्पण्या लिखितपुस्तके च पाठभेद ।

तथा जगती । ३ । ५१ ॥

एकेन जागतेन पादेन चतुर्भिर्गायत्रै पादै पञ्चपाज्जगती 'ज्योतिष्मती' नाम छन्दो भवति ॥

पुरस्ताज्ज्योतिः प्रथमेन । ३ । ५२ ॥

प्रथमेन त्रैष्टुभेन पादेन शेषैश्च गायत्रै पादै 'पुरस्ताज्ज्योति' नाम त्रिष्टुप् भवति । यथा—

'सर्मु ष्टुहीन्द्र यो हु सत्रा यः शूरो (१) मघवा यो रेवेता (२) ।
प्रतीषमिन्द्रियोऽधीयाम् (३) पूर्वणवाम् मघवन्पूर्वः (४) चित्तमसो विहुस्वा (५)॥'
(ऋग्वेदे—अ० २ अ० ४ व० १३ म० ५)

पूर्वेणैव गतार्थत्वाद्विशेषसंज्ञाज्ञापनार्थमिदम् । तथा जगती' दत्यनुवर्तनीयम् । तेनाधन जागतेन पादेन चतुर्भिश्च गायत्रै 'पुरस्ताज्ज्योति नाम जगती भवति । यथा—

'अधाप्नुमिर्मं उर्वति सूर्यो प्यु१पा (१) अग्मा मुहो यो अुर्विया (२) ।
आयुक्षाताम्श्विना या (३) तेये रथं प्रार्मावीद्येय (४) संविता जगत् पूर्येफ्५॥'
(ऋग्वेदे—अ० २ अ० २ व २७ म० १)

मध्येज्योतिर्मध्यमेन । ३ । ५३ ॥

यैदा मध्यमस्त्रैष्टुभ पादो भवति, उभयतश्च द्वौ द्वौ गायत्रौ, तदा 'मध्येज्योति नाम त्रिष्टुप् भवति । मध्येज्योतिरित्यनुवर्तते ।

तथा जगती' दत्यनुवर्तनीयम् । तेन मध्यमेन जागतेन एकेन जागतेन मध्यमेन तृतीयेनोभयतश्च द्वौ द्वौ गायत्रौ तदा मध्येज्योति 'नाम जगती भवति । यथा—

उपरिष्टाज्ज्योतिरन्तेन । ३ । ५४ ॥

यैदा चत्वारो गायत्रा पादा भवन्ति अन्ते च त्रैष्टुभ, तदा 'उपरिष्टाज्ज्योति' नाम त्रिष्टुप् भवति ।

---

१ एकेन गायत्रेण पादेन त्रिभिर्जागतैश्चतुष्पाद् 'ज्योतिष्मती नाम । इति च । २ प्रथमेन गायत्रेण पादेन शेषैश्च त्रैष्टुभैस्त्रिभि पुरस्ताज्ज्योति त्रिष्टुप्'।'इत्यपि च । ३ गायत्रेण पादेन त्रिभिर्जागतै इति च तत्रैव । ४ 'यदा मध्यमो गायत्रस्तृतीय पादो भवति उभयतश्च द्वौ त्रैष्टुभौ यदा पूर्वौ अन्तिमश्चैकस्त्रैष्टुभस्तदा मध्ये ज्योतिर्नाम त्रिष्टुप्' भवति । इतिच । सायणभाष्ये तु (अ ५ अ ८ व ३४) मध्ये ज्योतिस्त्रिष्टुप्' यतोऽष्टकस्ततो ज्योतिरिति । ५ एकेन गायत्रेण मध्यमेन तृतीयेनोभयतश्च जाग ताभ्यां प्रथमद्वितीयाभ्यां चतुर्थेन च जागतेन मध्येज्योतिर्जगती' नाम भवति । इत्यपि च । ६ यदा त्रयस्त्रैष्टुभा पादा भवन्ति, अन्ते च गायत्रस्तदा 'उपरिष्ट ज्ज्योतिस्त्रिष्टुप्' नाम भवति । इति क मु पु टिप्पण्यां लिखितपुस्तके च ।

यथा—

जर्यतं च प्रस्तुतं च (१) प्रचावतं प्रजां च (२) धत्तं द्रविणं च धत्तम् (३)।
सजोषसा उषसा (४) सूर्येण चोर्जं नो धत्तमश्विना (५) ॥'

(ऋग्वेदे—अ० ६ अ० ३ व० १५ म० ११)

तथा 'जगती' इत्यनुवर्तनीयम् । तेनान्तेन जागतेन पादेन शेषैश्च. गायत्रैश्चतुर्भिः रुपरिष्टाज्ज्योतिः'नाम जगती भवति । यथा—

'हंसाविव पतथो (१) अध्वगाविव सोमं सुतं (२) महिपेवाव गच्छथ.(३)।
सुजोषसा उषसा (४) सूर्येण च त्रिर्वर्तियातमश्विना (५) ॥

(ऋग्वेदे. अ. ६ अ. ३ व. १५ म. ८)

इति त्रिष्टुब्जगत्यधिकार. ।

एकस्मिन्पँञ्चके छन्दः शङ्कुमती । ३ । ५५ ॥

---

१ 'तथा जगतीत्यनुवर्तनीयम् । तेनान्तेन गायत्रेण शेषैश्च जागतैस्त्रिभिः 'उपष्टाज्ज्योतिर्जगती' नाम भवति' इति. क. मु. पु. टिप्पण्यां लिखितपुस्तके च । सर्वानुक्रमणिकायां कात्यायनाचार्योक्ता यथा—'षष्ठं त्रिष्टुप् त्रैष्टुभदा (१) द्वौ तु जागतौ यस्याः सा जागते जगती, त्रैष्टुभे त्रिष्टुप् (२) वैजौ जागतौ चाभिसारिणी (३) नवकौ वैराजस्त्रैष्टुभश्च (४) द्वौ वैजौ नवकस्त्रैष्टुभश्च विराट्स्थाना (५) एकादशिनस्त्रयोऽष्टकाश्च विरारूपा (६) द्वादशिनस्त्रयोऽष्टकाश्च ज्योतिष्मती (७) यतोऽष्टकस्ततो योतिश्चत्वारोऽष्टका जागतश्च महाबृहती (८) मध्ये चेद्यवमध्या ५) आद्यौ दशकावष्टकास्त्रयः पङ्क्त्युत्तरा विराट्पूर्वा वा (१०)' इति शविधास्त्रिष्टुभ ३. कात्यायनाचार्योक्ता यथा—'सप्तमं जगती, जागतपदा १) अष्टिनस्त्रयस्तौ च द्वौ महासतोबृहती (२) अष्टकौ सप्तकः षट्को शको नवकश्च षडष्टका महापङ्क्तिः (३) इति त्रिविधा जगत्य. ४. यदैक पञ्चाक्षर पादो भवति त्रयश्च द्वादशाक्षरास्तदा 'शङ्कुमती जगती' नाम न्दो भवति।' इति क. मु. पु टिप्पण्या लिखितपुस्तके च । 'अनादेशे चत्वार.' ति परिभाषया चत्वार एकादशिन पादा इत्यर्थं । 'जागतसूक्ते स्थिता गती त्रिष्टुप्सूक्ते स्थिता त्रिष्टुप्' 'नात्र क्रमादर ' इति तद्भाष्यकार । तैस्तदुदाहरणापि तत्र दर्शितानि पिङ्गलोक्ताद्विलक्षणमिदं छन्द । अत्रापि क्रमो न विवक्षितः. दमेव च्छन्द **पिङ्गलाचार्येण** जगतीज्योतिष्मतीसंज्ञकत्वेनोपादाय पुरस्ताज्ज्योतिमतीत्वादिना त्रिविधमुक्तम् **कात्यायनेन** तु चतुश्चत्वारिंशदक्षरत्वात्त्रिष्टुप्छन्दोमध्ये रिगणितम् एतेषामुदाहरणान्यप्याश्वलायनशाखाया वहूनि सन्ति वाहुल्यभयेनात्र दर्शितानि. तत्रैतादृशि त्रिष्टुप्छन्दसि विशेषमाह **कात्यायनाचार्यः**—'वहुनापि ष्टुभ एव' इति अस्यार्थस्तु त्रिष्टुभश्चतुश्चत्वारिंशदक्षरत्वे प्राप्ते सति वहुभिरक्षरैरूना

यदैक पदाक्षर पादो भवति त्रयश्च षडक्षरा, तदा 'शङ्कुमती' नाम गायत्री । छन्दोग्रहणे प्रकृते पुनश्छन्दोग्रहण छन्दोमात्रप्रतिपत्त्यर्थम् । तेन सर्वेषु छन्दःसु पदाक्षरैकपादलक्षिता शङ्कुमती भवति । इतरथा त्वनन्तरं सप्तस्थम स्यात् ॥

पट्टे ककुर्म्मती । ३ । ५६ ॥

एकस्मिन् षडक्षरे पादे, अन्येषु यथालक्षमुपपन्नेषु च्छन्दोमात्र, ककुप्मती नाम ॥

त्रिपादणिष्ठमध्या पिपीलिकमध्या । ३ । ५७ ॥

यदाद्यन्तौ पादौ षडक्षरौ मध्यमोऽल्पतराक्षर तदाणिष्ठमध्या सती पिपीलिक मध्या' नाम भवति । अयमर्थ —आद्यन्तौ पादावष्टाक्षरौ, मध्यमस्त्वेकाक्षर, एवं त्रिपादा यत्री पिपीलिकमध्या नाम भवति । एव चतुरक्षरे पदाक्षरेऽपि मध्यमे पादे पिपीलिक मध्या लिदपति । यत्किञ्चित्रिपाच्छन्दो लघुमध्यमपाद तत्सव पिपीलिकमध्यमुच्यते ॥

अपि विराट्रूपादित्रिष्टुबधिकारोक्ता त्रिष्टुभ एव स्युः एतेन पञ्चभिश्चतुर्भिस्त्रिभिरक्षरै रूना अपि क्वचित्रिष्टुप्सूक्तस्थात्रिष्टुभ एव, न तु तासां निवृत्पङ्क्तित्वभुरिक्पङ्क्तित्वादि ५. आ तृतीयाध्यायसमाप्तिसूत्राणामुदाहरणानि वृत्तिकृता न दर्शितानि यथाप्राप्त कानिचित्प्रदर्श्यन्ते तत्रसूत्रटिप्पण्याम् १ ककुभती, ककुम्मती, इति क मु.पुस्तके ।

१ उष्णिहो यथा—'उतासो दैवदिति (१) रुरुप्यसो नाम उप्र (२) । उरुसन्त भवतो (३) घृतश्चषस (४) ॥ (इति भवदेव ।) २ षडक्षरौ, एकाक्षरौ, इति ख ग घ ङ चिसपुस्तकेषु ।

अनुष्टुभो यथा—'पित्र्य मु स्तोमम् (१) महो धुर्माणं तविषीम् (२) । यस्य त्रितो व्योजसा (३) वृत्र विपर्व मर्दयत् (४) ॥' (ऋग्वेदे– अ०२अ०५व०६म० ४)

२ अनुष्टुभो यथा— स पूर्व्यो महोनां (१) वेनः क्रतुभिरानजे (२) । यस्य द्वारा मनुः पिता (३) देवेषु धिय आनज (४) ॥ (सामवेदे–पू० प्र० ४ अ० २ म ४)

बृहत्या यथा—'इन्द्र याहि मत्स्तु (१) त्रिभेण वेवरोधसा (२) । स योनः प्रात्सुदर्स (३) सपीतिभिरासोमेभिरुरु स्थिरम् (४) ॥' (इति भवदेव ।)

पङ्क्त्या यथा— सदश्र सुवीर्यं (१) ततक्षति मनाश्यम् (२) देवानां य इन्मनो (३) यजमान इयक्षति (४) ॥ (इति भवदेव ।) ३ त्र्यक्षर , पडक्षर, इति छिखित पुस्तकयो ।

त्रिष्टुभो यथा—इमन्तमुपस्थं (१) मधुना संसृजामि (२) प्रजापतेर्मुखमेतद्वि तीयं (३)। तेन पुंसोऽभिभवासि (४) सपत्नान्कामान्मयि निष्यसि राद्धी (५)॥ (इति भवदेव ।)

३ गायत्र्या यथा– मूर्भिर्येमानो हर्य्यतो (१) विचक्षणो (२) । राजा देवः समुद्रियः (३) ॥' (ऋग्वेदे–अ० ७ अ० ५ व० १५ म० १६)

उष्णिहो यथा—'हरी यस्य सुयुजा विभ्रता (१) वेरर्वन्ता मु शोभा (२)। उभा कुक्षी न केक्षिमा पतिर्वन् (३) ॥ (ऋग्वेदे–अ० ८ अ० ५ व० २६ म० २)

विपरीता यवमध्या । ३ । ५८ ॥

आद्यन्तौ पादौ लघ्वक्षरौ, मध्यमश्च वह्वक्षर , सा गायत्री 'यवमध्या' नाम भवति । एवमुष्णिगादिष्वपि योज्यम् ॥

ऊनाधिकैनैकेन निचृद्भुरिजौ । ३ । ५९ ॥

चतुर्विंशत्यक्षरा गायत्री एकेनाक्षरेण न्यूनेन सा 'निचृत्' इति विशेषसज्ञा लभते । एकेनाधिकेन 'भुरिक्' इति । एवमुष्णिगादिष्वपि द्रष्टव्यम् ॥

अनुष्टुभो यथा—'पर्यूषु प्र धन्व वाजसातये (१) परि वृत्राणि सक्षणि (२) । द्विपस्तरध्या ऋणया न ईयसे (३) ॥' (ऋग्वेदे–अ० ७ अ० ५ व० २२ म० १)

बृहत्या यथा—'अवीभोवीरमध्यसीमदेषुगाय (१) गिरे सहा विचेतम् (२) । इन्द्रं नामशून्यं शाकिनं वचो यथा (३) ॥' (इति भवदेव ।)

१ **गायत्र्या** यथा—'समुन्नेयो वसूना (१) यो रायामानेताय इडायाम् (२) । सोमो य सुक्षिमीनाम् (३) ॥' (इति भवदेव. ।)

उष्णीहो यथा—'सुदेव· सदमहासति (१) सुवीरो नरो मरुतः स मर्त्य (२) । यं त्रायध्वे स्याम ते (३) ॥' (ऋग्वेदे–अ० ४ अ० ३ व० १३ म० १५)

२ **निचृद्गायत्र्या यथा**—'अग्निमिन्धानो मनसा (१) धियं सचेतमर्त्य (२) । अग्निमिन्धे विवस्वभि. (३) ॥' (सामवेदे–पू० प्र० १ अ० १ म० ९)

निचृदुष्णिहो यथा—'इषे त्वोर्जे त्वा वायवस्थ. (१) देवो व. सविता प्रार्पयतु (२) । श्रेष्ठतमाय कर्मणे (३)।' (यजुर्वेदे–अ० १ म० १)

निचृदनुष्टुभो—'द्वेपस्ते धूम ऋण्वति (१) द्विविषच्छुक्र आतत (२) । शरो नहि द्युतात्वम् (३) कृपा पावकरोचन (४) ॥' (इति भवदेव ।)

निचृद्बृहत्या यथा–'बलं धेहि तनूषु नो (१) बलमिन्द्रानळुत्सु नः (२) । बलं तोकाय तनयाय (३) जीवसे त्वं हि बलदाऽआसि (४) ॥'

(ऋग्वेदे–अ० ३ अ० ३ व० २२ म० १८)

निचृत्पङ्क्त्या यथा—'अग्ने तव श्रवो वयो (१) महि भ्राजन्ते अर्चयो विभावसो (२) । बृहद्भानो शवसा वाजमुक्थ्यं (३) दधासि दाशुषे कवे (४) ॥'

(ऋग्वेदे–अ० ८ अ० ७ व० २८ म० १)

निचृत्त्रिष्टुभो यथा—'इदन्त एकं पर ऊत एकं (१) तृतीयेन ज्योतिषा सविशस्व (२) । सवेशनस्तन्वे चारुरेधि (३) प्रियो देवाना परमे जनित्रे (४) ॥' (सामवेदे–पू० प्र० १ अ० २ म० ३)

निचृज्जगत्या यथा—शतक्रतुमर्णवं शाकिनं नरं (१) गिरो म इन्द्रमुपयन्ति विश्वतः (२) । वाजसनिं पूर्भिदं तूर्णिमसुरम् (३) धामसाचमभिपाचं स्वर्विदम् (४)॥ (ऋग्वेदे–अ० ३ अ० ३ व० १५ म० २)

द्वाभ्यां विराट्स्वराजौ । ३ । ६० ॥

'ऊनाधिक' ग्रहणमनुवर्तते । द्वाभ्यामक्षराभ्यां न्यूनाधिकाभ्यां गायत्री यथाक्रम विराट्-स्वराट्-संज्ञा भवति । एवमुष्णिगादिष्वपि द्रष्टव्यम् ॥

---

३ भूरिग्नुष्टुभो यथा— सा म आवह जातवेदो (१) लक्ष्मीमनपगामिनीम् (२)। यस्यां हिरण्य विन्देय (३) गामश्व पुरुषानहम् (४) ॥' (इति भवदेव ।)

भूरिक्त्रिष्टुभो यथा— य ऋत्विभ्यो वृतमिव वाचमिप्य (१) उपस्तिरेबैतरो धेनुमीडे (२)। ये वातजूतस्वरणिमिरेवै (३) परिग्मो सद्मो अपसो बुभूषु (४) ॥' इति भवदेव '

भूरिग्जगत्या यथा—'इमो न विद्वां अयुजिरिय धुरि (१) त वहानि प्रसरणिमव पथम् (२)। नास्य वेश्मि विमुचनावृतं पुन (३) विद्वान्पथ पूर एत अञ्जसेपति (४) ॥ (इति भवदेव ।)

१ विराड्गायत्र्या यथा—'अ भी षु ण सखीना (१) मविता जरितृणाम् (२)। शतं भवास्यूतये (३) ॥' (इति भवदेव ।)

विराडुष्णिहो यथा— इत गायत्र नकवनस्याह (१) विविरिरे भाधिनावाम् (२)। आसीद्यमसतीदम् (३) ॥ (इति भवदेव ।)

विराडनुष्टुभो यथा—'यदि वीरो अनुष्या (१) समिमि घानमस्य (२)। अजुह्वद्व्यमानुषक् (३) ॥' (सामवेदे-पू० प्र० १ अ २)

विराड्बृहत्या यथा— अमे विवस्वदुषस (१) श्चित्र राधो अमर्त्य (२)। आ दाशुषे जातवेदो वह त्व (३) मया देवा उपर्ुषः (४) ॥' (इति भवदेव ।)

विराट्त्रिष्टुभो यथा— परिवत्त वासस्तनूं (१) दीर्घायुत्व कृणुत दीर्घमायु ( )। शत च जीव शरद सुवच्चा वसूनि चार्ये सम्पृचासि जीवन् (३) ॥ (इति भवदेव ।)

विराड्जगत्या यथा—युयमस्मभ्यं द्रविणोम्युस्पारे (१) विद्वांसो विश्वा मर्चोणि मोर्मणा (२)। युमन्त वाज्र वृषशुष्ममुत्तम (३) मार्ो रयिम्मघवस्तन्वसा वर्य (४)॥ (ऋग्वेदे-अ० ३ अ० ७ व० ८ म० ८)

२ स्वराड्गायत्र्या यथा-'विद्वांसाविदुर्ष्टे (१) वविद्वासित्यापरो मयेताः (२)। नूषिषु मर्वे मक्षौं (३) ॥ (ऋग्वेदे-अ १ अ० ८ व० २२ म० २)

स्वराडनुष्टुभो यथा—'क्षयणास्मसि जातोऽसि (१) उमोऽसि हृदय सम (२)। क्षयणस्य पृथिवी माता (३) क्षयणस्य वरुण पिता (४) ॥ (इति भवदेव ।)

स्वराड्बृहत्या यथा—'वितर्तूयन्ते मघवन् (१) विपश्चितोयों विप्रो जनानाम् (२)। उपेन्द्रमस्व सुतरूपुमा (३) भर वाज नेदीयइमूतये (४) ॥' (ऋग्वेदे-अ० ५ अ० ७ व० १० म० ४)

स्वराट्त्रिष्टुभो यथा-'इन्द्रासोमा परि वां भूत विश्वतः (१) इय मतिः कक्ष्या वेव वाजिना (२)। यां वां होत्रां परिहिनोमि मेधय (३) येमा ब्रह्माणि नृपतीव जिन्वतम् (४) ॥' (ऋग्वेदे-अ ५ अ० ७ व० ६ म० ६)

आदितः संदिग्धे । ३ । ६१ ॥

यदा षड्विंशत्यक्षरं छन्दो भवति, तदा किं प्रतिपत्तव्यम्। किं गायत्री स्वराड्, उतोष्णिग्विराड्, इति। एवं संदिग्धे सति छन्दस्यादिभूतात् पादान्निर्णय कर्तव्य । यदि प्रथम पादो गायत्र्यास्तदा गायत्र्येवासौ । अथोष्णिहस्तदोष्णिग् इति । एवं सर्वत्र ॥

देवतादितश्च । ३ । ६२ ॥

इदमपरं निर्णयनिमित्तमुच्यते । सदिग्धे छन्दसि देवतादेश्च निर्णयः कर्तव्य. । 'आदि'ग्रहणं स्वरादिपरिग्रहार्थम् ॥

कस्य छन्दस का देवता यथा निर्णय· कर्तव्य इत्यपेक्षायामिदमुच्यते—

अग्निः सविता सोमो बृहस्पतिर्मित्रावरुण विन्द्रो विश्वेदेवा देवताः । ३ । ६३ ॥

गायत्र्यादीनां जगतीपर्यन्तानां यथाक्रममग्न्यादयो देवता वेदितव्या । तत्र संदिग्धे छन्दसि यदाग्नेयं तदा गायत्री । यदि सावित्रं तदोष्णिग् । एवं सर्वत्र । वैदिकेष्वेव छन्द सु निचृद्भुरिजौ, तथा विराट्स्वराजौ च दृश्येते। न लौकिकेषु । अतो लौकिकेषु सदेहाभावात्तन्निर्णयभूता देवतादयो नेष्यन्ते ॥

स्वराः षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाः । ३ । ६४ ॥

स्वरा गायत्र्यादिषु क्रमेण द्रष्टव्या. ॥

सितसारङ्गपिशङ्गकृष्णनीललोहितगौरा वर्णाः । ३ । ६५ ॥

गायत्र्यादिषु क्रमेण वर्णा वर्णनिर्णयनिमित्तमभिधीयन्ते ॥

आग्निवेश्यकाश्यपगौतमाङ्गिरसभार्गवकौशिकवाशिष्ठानि गोत्राणि ३ । ६६ ॥

गायत्र्यादीना क्रमेणैतानि गोत्राणि भवन्तीति वाक्यशेषः । अत्र रोचनाभा कृतय , श्यामान्यतिच्छन्दासि, इत्येवमादिकमधीयते छान्दसा । तन्नोपपद्यते। कृतीनामतिच्छन्दसा च निचृद्भुरिजोर्विराट्स्वराजोश्च प्रदेशाभावात्, कश्चिन्नास्ति संशय । यस्य निर्णयनिमित्तं च वर्णोपन्यास. क्रियते । तदपि ऋषिदेवतास्वरवर्णाना ज्ञानान्नि श्रेयसमिच्छन्ति छान्दसा ॥

इति भट्टहलायुधकृताया पिङ्गलछन्दोवृत्तौ तृतीयोऽध्याय ।

---

१. यथा 'विद्वासो विदुर' (ऋग्वेदे अ० १ अ० १ व० २२) इति मन्त्रस्य स्वराड्गायत्रीविराडुष्णिक्त्वसदेहे आद्यपादस्याष्टाक्षरत्वाद्गायत्र्येवासौ । एवं निचृदादीनामुदाहरणान्यालोच्योह्यम्, वस्तुतस्तु यत्रानुक्रमणिकायां छन्दो नाभिहितं तत्रैव संदेहस्तन्निर्णयार्थमिदं तादृशां मन्त्राणां दुर्घटत्वादुदाहरणदर्शनमपि दुष्करमिति २. 'मित्रावरुणा' इति लिखितपुस्तके । ननु भगवता पिङ्गलाचार्येण कृतो

चतुर्थोऽध्याय ।

चतुःशतमुत्कृतिः । ४ । १ ॥

चतुरधिक शत चतु·शतम् । मध्यमपदलोपी समास । अथ वा चत्वारि च शतं च चतु·शतम् । द्वन्द्वसमास । कर्मधारयस्तु नेष्यते । तत्र चतु·शतानीति प्राप्नोति । यत्र चतु·शतमक्षराणां संख्या भवति तत् 'उत्कृति' नाम छन्द । यथा—

मोऽस्य देवतादिनियम स किं विधिर्नियमोऽनुवादार्थो वा । नाद्यस्तत्तद्वेदानुक्रमणिकाकारै स्मृतिकारैश्च संहितास्थमन्त्राणां कर्मकाण्डीयमन्त्राणां च देवतादीनां विहितत्वेनापूर्वत्वाभावात् । किंच 'गायत्र्या· सविता आसवेदस' इति, 'त्रिष्टुभोऽग्निर्देवता' इत्यादिना सप्तव्याहृतीनामपि छन्दसां देवतानां चानेन महाविरोधापातात् । मयाह संवर्त –'व्याहृतीनां च सर्वेषामार्षं वैव प्रजापति । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तिरेव च ॥ त्रिष्टुप् च जगती चैव छन्दांस्येतानि सप्त वै । अग्निर्वायुस्तथा सूर्यो बृहस्पतिरपांपति । इन्द्रश्च विश्वेदेवाश्च देवता समुदाहृता ॥' नापि द्वितीयोऽनन्तभ्यमिचारात् । नापि तृतीयो निष्फलत्वाद्विरोधापातात्च । अत्रेदमवधेयम्—येषां मन्त्राणां छन्दोदेवतादीनि नोक्तानि अपि तु विराट्स्वराडादिलक्षणद्वयलक्षितत्वेन गायत्र्युष्णिगभ्याम्' उष्णिगनुष्टुभ्याम्' इत्यादि संशयो भवेत् तत्राद्यपादेन क्वचिद्देवतादिभ्यश्च विरोध परिहरणीय इत्यभिप्रयता भगवता पिङ्गलाचार्येण आदित संदिग्धे' (पि॰ सू॰ ३ । ६१) इत्यादि सप्त सूत्राणि विहितानि, इति । एतेषामुदाहरणानि बहूनां वेदशाखानामनुपलम्भाद्दुर्ज्ञेयानि । यत्तु शुक्लयजुश्च विजानीयाच्चैव लोहितमेव च । श्याम तु स्वरित विद्या यमिरुच्यस्य देवता ॥ नीचे सोमं विजानीयात्स्वरिते सविता भवेत् । उदात्त ब्राह्मण विद्याच्चैवं क्षत्रियमेव च ॥ वैश्य तु स्वरित विद्यादुदात्त तु भारद्वाजम् । नीच गोतममित्याह गार्ग्यं तु स्वरित विदु ॥ विद्यादुदात्तां गायत्रीं नीचं त्रैष्टुभमेव च । जागर्त स्वरित विद्यादेवमेव नियोगत ॥ गान्धर्ववेदे ये प्रोक्ता सप्त षड्जादय स्वरा । त एव वेदे विज्ञेयास्त्रय उच्चादय स्वरा ॥ उच्चौ निषादगान्धारौ नीचावृषभधैवतौ । शेषास्तु स्वरिते ज्ञेया षड्जमध्यमषैवता ॥ इति याज्ञवल्कीयशिक्षोक्तेस्त्रिष्टुभो लोहितो वर्ण, सोमो देवता ऋषभधैवतौ स्वरौ गोतमऋषि । जगत्या श्यामो वर्ण सविता देवता षड्जमध्यमपञ्चमा स्वरा गार्ग्यऋषिरित्यादिभि पिङ्गलोक्तेनानैक्य तदपि शाखाभेदेन परिहरणीयम्

१ उत्कृत्यादिकृतिपर्यन्तानामुदाहरणानि श्रीमता हलायुधेन न दर्शितानि अतस्तान्युपक्रमणिकाभाष्योपलब्धानि, अन्यत्र सुप्रसिद्धानि च सर्वोपकृतये वृत्तिमप्येऽस्माभिर्निवेशितानि । अत्राक्षराधिक्यमपि न दोषावह चतु शतशब्दस्य त्रयोदशगायत्रीपादलक्षकत्वात्, गायत्रीपादानामष्टाक्षरन्यूनाधिक्यमपि संभवति तच्चु प्राग्व्याहृतम् । उत्कृत्यादिकृतिपर्यन्तेषु छन्दःसु पादनियमो न केनापि मुनिना दर्शित । अनुक्रमणिकाभाष्यकार दर्शिता नियमास्तु क्वचिदन्ते

'होतां यक्षद॒श्विनौ॒ छाग॑स्य (१) ह॒विष॒ आत्ता॑मद्य म॑ध्य॒ (२) तो मेद॒ उद्भृ॑तं (३) पु॒रा द्वेषो॑भ्य.(४) पु॒रा पौरु॑षेय्या गृ॒भो (५) वस्तो॑र्नूनं घा॒से अ॑ज्राणां (६) यव॑सप्रथ-मानॉ (७) सु॒मत्क्ष॑राणा॒५ शतरु॒द्रिया॑णाम् (८) अग्निष्वा॒त्ताना॒ पीवो॑पवसनानां (९) पार्श्व॑तः श्रो॒णित॑ः शि॒तामे॒तः (१०) उ॑त्सादे॒तोऽङ्गा॑दङ्गा॒दव॑त्तानां (११) कर॑त ए॒वाश्विना॑ जु॒षेता॒॑५ (१२) ह॒विरे॒वाश्विना जु॒षेता॑म् (१३)' (यजुर्वेदे—अ० २१ म० ४३)

चतुरश्चतुरस्त्यजेदुत्कृतेः । ४ । २ ॥

चतु शताक्षराच्छन्दस क्रमेण चतुरश्चतुरः सख्याविशेषांस्त्यजेत् । एतदुक्तं भवति । उत्कृतेरारभ्य चतुर्भिश्चतुर्भिरक्षरैर्न्यूनानि छन्दांस्यन्यानि स्थापयेत् । अष्टाचत्वारिंशदक्षर यावत् ॥

तान्यभिसंव्याप्रेभ्यः कृतिः । ४ । ३ ॥

तान्युत्कृतेरनन्तराणि च्छन्दासि अभि-स-वि-आङ्-प्र इत्येतेभ्य· पराणि 'कृति'सज्ञानि भवन्ति । तत्र शताक्षरं छन्द **'अभिकृतिः'** । यथा—

'दे॒वो अ॒ग्नि. स्विष्ट॒कृत् (१) दे॒वान्य॑क्षद्यथाय॒थ॒५ (२) होता॑रा॒विन्द्र॑म॒श्विना॑ (३) वा॒चा वा॒च॒५ सर॑स्वती (४) म॒ग्नि॒ं सोम॑५ स्विष्ट॒कृत् (५) स्विष्ट इन्द्रः॑ सु॒त्रामा॑ (६) सवि॒ता व॑रु॒णो भि॒ष (७) गि॒ष्टो दे॒वो वन॒स्पति॑.(८) स्वि॒ष्टा दे॒वा आ॑ज्य॒पाः स्विष्टो (९) अ॒ग्नि॒र॒ग्नि॒ना होता॑ हो॒त्रे स्विष्ट॒कृ॒ (१०) द्य॒गो न द्र॑ंधदि॒न्द्रि॒यम् (११) ऊर्ज॒मप॑-चि॒तिं स्व॒धा व॑सु॒वने॑' (१२) ॥' (यजुर्वेदे—अ० २१ म० ५८)

पण्णवत्यक्षरं **संकृतिः** । यथा—

'दे॒वो अ॒ग्निः स्विष्ट॒कृत् (१) सु॒द्र॒वि॑णा म॒न्द्रः क॒वि (२) स॒त्यम॑न्मा य॒जी होता॒ (३) होतु॑र्हो॒तुरा॑यजी या॒ (४) नम्रे यान् दे॒वान॑याड्या॑ (५) अपि॑ प्रे॒यं॑ते॒ हो॒त्रे अ॑मत्सत॒ (६) ता॑ स॑स॒नु॒षी॑ हो॒त्रा॑ देव॑ंगमां (७) दि॒वि दे॒वेषु॑ यज्ञमे॑र॒य॒मं (८) स्वि-ष्ट॒कृच्चाग्ने॒ होताभू॑ (९) व॑सु॒वने॑ वसु॒धेय॑स्य नमो वा॒के वीहि यज॑ (१०) ॥

(तैत्तिरीयब्राह्मणे अ० ३ अ० ६ अ० १३ म० १)

द्वानवत्यक्षर **विकृतिः** । यथा—

इ॒मे सोमा॑ः सु॒रामा॑ण॒. (१) छा॒गै॒र्न मे॒षै॒र्ऋ॑ष॒भै. (२) सुता॑ः श॒ष्पै॒र्न तो॒क्म॑भिः (३) लाजै॑र्महे॒स्व॒न्तो॒ मदा॒ (४) मास॑रेण॒ परि॑ष्कृता. (५) शु॒क्राः पय॑स्वन्तो॒ऽमृता॑ः (६) ग्रस्थि॑ता वो मधु॒श्चुत॒ (७) स्ता॒न॒श्वि॒ना॒ सर॑स्व॒ती (८) इन्द्रः॑ सु॒त्रामा॑ वृ॒त्र॒हा (९) जु॒षन्ता॑ सो॒म्यं मधु (१०) पिबन्तु मद॑न्तु व्यन्तु होतर्यज॑ ॥ (यजुर्वेदे—अ०२१म०४२)

अष्टाशीत्यक्षर**माकृतिः** । यथा—

'भगो अनुप्रयुक्ता (१) मिन्द्रो यातु पुरोगव (२) यस्या सदोहविर्धाने (३) पूषो

---

१ अत्रैकादश गायत्रा. पादा , एको जागत पाद . २. अत्र दश गायत्राः पादा., एको जागत. पादः.

यस्यानुमीयते (४) ब्राह्मणा यस्यामचन्ति (५) ऋग्भि साम्ना यज्ञविद (६) सुप्वन्त यस्याम्त्विजम् (७) सोममिन्द्राय पातवे (८) दामो भूतिदक्षिणायां सुश्रेपां (९) यज्ञे ददातु सुमनस्यमानो (१०) ॥'

चतुरशीत्यक्षरं प्रकृतिः । यथा—

'सूयव मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्राभ्या पापमकार्ष मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किंचिदुरित मयि इदमह माममृतयोनौ सूर्ये ज्योतिषि जुहोमि ॥

प्रकृत्या चोपसर्गवर्जित[1] । ४ । ४ ॥

उपसर्गेण वर्जित शुद्ध कृतिशब्द प्रकृत्या स्वरूपणावतिष्ठत । तमतदुक्त भवति । अशीत्यक्षरं छन्द 'कृति नाम । यथा—

'सुपर्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्र चक्षुर्बृहद्रथन्तरे पक्षौ स्तोम आत्मा छन्म्स्यङ्गानि यजूष्यात्मा साम ते । तनूर्वामदेव्यं यज्ञायज्ञिय पुच्छ विष्ण्वाः शफाः । सुपर्णोऽसि गरुत्मान् दिवं गच्छ स्वः पत ॥

(यजुर्वेद—पू० अ० १२ म० ४)

धृत्यष्टिशक्करीजगत्यः । ४ । ५ ॥

कृतेरधस्ताद्धृतिरष्टि शक्करी जगतीत्यस्ते शब्दा क्रमेण व्यवस्थापनीया ॥

पृथक्पृथक्पूर्वत एतान्येवैषाम् । ४ । ६ ॥

एषां धृत्यादीनां पूर्वस पृथक्पृथगेतान्येव शब्दरूपाणि विन्यसेत् । पृथक्पृथग्ग्रहण प्रत्येक पूर्वत्वज्ञापनार्थम् । अन्यथा हि समुदायपूर्वत्वमेषां स्यात् । तेनायमर्थ —धृति शब्दात् पूर्व धृतिशब्द । अष्टिशब्दात्पूर्वमष्टिशब्द , शक्करीशब्दात्पूर्व शक्करीशब्द । जगतीशब्दात् पूर्वं जगतीशब्दः ॥

द्वितीयं द्वितीयमतित[2] । ४ । ७ ॥

अत्र द्वितीय द्वितीय शब्दरूपमतिशब्दात्परत प्रयोक्तव्यम् । एव सत्युत्तरेषां छेन्द सामेता संज्ञा क्रमेण भवन्ति । तत्र पट्सप्तस्वक्षरमतिधृतिः । यथा—

---

१ अत्राष्टौ गायत्र्याः पादा , द्वौ जागता २ कात्यायनोक्त पादनियमो यथा—पादा अतिजगत्यास्तु त्रयो द्वादशकाः परायष्टकौ (१) शक्करीपादा सप्तैवाष्टाक्षराः स्मृताः (२) अष्टिशक्करपादौ द्वौ कर्तव्यौ षोडशाक्षरौ जागतोऽथाष्टकौ (३) चाष्टिपादाः षोडशकाक्षरयः, अष्टकौ च (४) अत्यष्टिपादौ जागतौ चाष्टकाक्षरयः, जागतश्चाष्टकाश्च (५) अथ धृति पादौ तु जागतौ पादाक्षरयोऽष्टकाश्चाथ षोडशाक्षर एव चाष्टकश्च (६) अथातिधृतौ द्वौ पादौ जागतौ ततक्षरयोऽष्टका जागतश्च तथाष्टाक्षर कापपि (७)' इति ३ एषु व्यूहान्यूनता परिहारा

'स हि शर्धो न मारुतं तुविष्वणि (१) रमस्वतीपूर्वरास्विष्टनि (२) रातिनास्विष्टनिः। (३) आदंह्रव्यान्यादृदि (४) यज्ञस्य केतुरर्हणा (५)। अधा स्मास्य हर्षतो हर्षीवतो (६) विश्वे जुषन्त पन्थां (७) नरः शुभेन पन्थाम् (८) ॥' (ऋग्वेदे—अ० २ अ० १ व० १३ म० ६)

द्वासप्तत्यक्षरं धृतिः। यथा—

'अवर्महे इन्द्र दाह्रहि श्रुधी नः (१) शुशोच हि द्यौः क्षानभीषॉ अद्रिवो (२) घृणान्न भीषॉ अद्रिवः (३) शुष्मिन्तमो हि शुष्मिभिः (४) वर्धस्रुग्रेभिरीयसे (५)। अपूरुपद्मो अप्रतीत शूर सत्त्वभि (६) स्त्रिसप्तै. शूरसत्त्वभिः (७) ॥' (ऋग्वेदे—अ० २ अ० १ व० २२ म० ६)

अष्टषष्ट्यक्षरमत्यष्टिः। यथा—

'अदर्शि गातुरुरवे वरीयसी (१) पन्था ऋतस्य समयंस्त रश्मिभिः (२) चक्षुर्भगस्य रश्मिभिः (३)। द्युक्षं मित्रस्य सादन (४) मर्यम्णो वरुणस्य च (५)। अथादधाते बृहदुक्थ्यं वय (६) उप्स्तुत्यं बृहद्वयः (७) ॥' (ऋग्वेदे—अ० २ अ० १ व० २६ म० २)

चतु पष्ट्यक्षरमष्टिः। यथा—

'त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्म(१)स्तृपत्सोमंमपिबद्विष्णुना सुतं यथावशत् (२)। स ईं ममाद महि कर्म कर्तवे महामुरुं (३) सैनं सश्चद्देवो देवं (४) सत्यमिन्द्रं सत्य इन्दुः (५) ॥' (ऋग्वेदे—अ० २ अ० ६ व० २८ म० १)

षष्ट्यक्षरमतिशाक्वरी। यथा—

'साकं जातः क्रतुना साकमोजसा विवक्षिथ (१) साकं वृद्धो वीर्यै सासहिर्मृधो विचर्षणिः (२)। दाता राधस्तुवते काम्यं वसु सै (३) नं सश्चद्देवो देवं (४) सत्यमिन्द्रं सत्य इन्दुः (५) ॥' (ऋग्वेदे—अ० २ अ० ६ व० २८ म० ३)

पट्पञ्चाशदक्षरा शाक्करी। यथा—

'प्रौष्वस्मै पुरोरथं (१) इन्द्राय शूषमर्चत (२)। अभीके चिदु लोककृत् (३) सङ्गे समत्सु वृत्रहा (४) असाकं बोधिचोदिता (५) नमस्यन्तामन्यकेषाम् (६) ज्याका अधिधन्वसुं (७)' (ऋग्वेदे—अ० ८ अ० ७ व० २१ म० १)

द्विपञ्चाशदक्षरमतिजगती। यथा—

'स आतरं वरुणमग्न आववृत्स्व (१) देवाँ अच्छा सुमती यज्ञवनसं (२) ज्येष्ठं यज्ञवनसं (३) ऋतावानमादित्यं चर्षणीधृतम् (४) राजान चर्षणीधृतम् (५) ॥' (ऋग्वेदे—अ० ३ अ० ४ व० १२ म० २)

---

१ २. ३ ४ एषु व्यूहान्यूनता परिहार्या.

अष्टचत्वारिंशदक्षरा जगती । यथा—

इन्द्रं मित्र वरुणमग्निमूतये (१) मारुत पार्वो अदितिं हवामहे (२) ।
रयिं न दुर्गा ह्रंसवः सुदानवो (३) विश्वस्माद्रो अंहसो निषिर्वन (४) ॥
(ऋग्वेदे—अ० १ अ० ७ व २४ म० १)

अत्र लौकिकम् । ४ । ८ ॥

अधिकारोऽयमाद्यात्रपरिसमाप्ते । पूर्वेषां छन्दसां वैदिकत्वमेव । इत प्रभृत्या यार्याना चूलिकापर्यन्तानां लौकिकत्वमेव । समान्यार्याना मुत्कृतिपर्यन्तानां वैदिकत्वं लौकिकत्वं च । अत्र वैदिकच्छन्दसां प्रस्तावे प्रसङ्गाद्वेदवदनादिमुनिपारम्पर्यागतं स्मृतिपुराणेतिहासादिषु दृश्यमानमार्यादिदण्डकपर्यन्त लौकिकच्छन्दोजातमधिक्रियते । तन्मूलत्वात्काव्यस्य । काव्य च प्रीतिरूपत्वादानन्दहेतुत्वाच्च पुरुषार्थ ॥

आत्रैष्टुभाच्च यदार्षम् । ४ । ९ ॥

आदमिविधौ । त्रिष्टुभेव त्रिष्टुभम् । स्वार्थे तद्धित । गायत्र्यादित्रिष्टुप्पर्यन्त यदार्ष छन्दोजातं वैदिके व्याख्यातं लौकिके च तत्तथैव द्रष्टव्यम् । किं तदार्षम् चतुर्विंशत्यक्षरा गायत्री अष्टाविंशत्यक्षरोष्णिक्, द्वात्रिंशदक्षरानुष्टुप् षट्त्रिंशदक्षरा बृहती चत्वारिंशदक्षरा पङ्क्ति चतुश्चत्वारिंशदक्षरा त्रिष्टुप् । च समुच्चये ॥

पादश्चतुर्भाग[1] । ४ । १० ॥

चतुर्भागश्चतुर्विंशत्यक्षरात्मा गायत्र्याश्चतुर्थो भाग पादसंज्ञां लभते । गायत्र्या षडक्षरपाद[2] । एवमुष्णिगादिष्वपि द्रष्टव्यम् । समवृत्तविषयमेतत् ॥

यथावृत्तसमाप्तिर्वा । ४ । ११ ॥

यस्य वृत्तस्य पादस्य पादेन्यूनाक्षरैरधिकाक्षरैर्वा समाप्तिर्दृश्यते तस्य तादृशा एव पादा ग्रहीतव्या । वार्यच्छन्दो व्यवस्थितविषया । उद्गतादिषु विषमवृत्तेषु चतुर्भागा सिद्धमेणापि पादव्यवस्थादर्शनात् ।

आदौ तावद्गणच्छन्दो मात्राच्छन्दस्ततः परम् ।
तृतीयमक्षरच्छन्दस्तच्छन्दश्चेषा तु लौकिकम् ॥
आर्योद्गीतिपर्यन्त गणच्छन्द समीरितम् ।
वैतालीयादिचूलिकान्त मात्राच्छन्द प्रकीर्तितम् ।
समान्यार्युत्कृति यावदक्षरच्छन्द एव च ॥

तत्रादौ तावदार्यालक्षणसिद्धपूर्वं गणसंज्ञां करोति—

---

१ 'गिछति समानी' (पि० सू० ५।६) इति सूत्रबोधित छन्द २ 'गायत्र्या पडक्षरपाद' (पि० सू० ३।२) इति यत्तृतीयाध्याये दर्शित तद्वैदिकविषयमात्रं सेन लौकिकच्छन्दसां त्रिपञ्चषट्पदता निषिद्धा यतो लौकिकविषमवृत्तेऽपि लौकिकविषम एव भवित्यपि नतु वैदिकोक्त किं तु चतुष्पदत्व तत्राप्यक्षतमेव ज्ञेयम्

लः समुद्रा गणः । ४ । १२ ॥

ल इत्येकमात्रिकस्याक्षरस्य ग्रहणम् । समुद्रा इति चतु·संख्योपलक्षणार्थम् । चतुर्णां लकाराणां 'गण' इत्येषा संज्ञा विधीयते ॥

गौ गन्तमध्यादिर्न्लश्च । ४ । १३ ॥

अनेन गणस्य विन्यासभेदं दर्शयति । स हि गणः कदाचिद्गुरुद्वयेन (ऽऽ) भवति, कदाचिदन्तेनैकेन गुरुणा (।।ऽ), कदाचिन्मध्यमेन (।ऽ।), कदाचिदाद्येन (ऽ।।), कदाचिच्चतुर्भिर्लघुभि (।।।।) । पष्ठस्य भेदस्याभावद् विस्पष्टार्थमिदं सूत्रम् । अन्तमध्यादिरिति प्रथमं द्वन्द्वसमासं कृत्वा पश्चाद्बहुव्रीहि । द्वन्द्वात् परो य श्रूयते लभतेऽसौ प्रत्येकाभिसंबन्धम् । द्वौ गकारौ (ऽऽ) चत्वारो लघवो (।।।।) भवन्ति । स एको (ऽऽ) गण । गकारोऽन्ते यस्य स गन्तो द्वितीयो (।।ऽ) गण । गकारो मध्ये यस्य स गमध्यस्तृतीयो (।ऽ।) गण· । गकार आदौ यस्यासौ गादिश्चतुर्थो (ऽ।।) गण । नकारलकारौ मिलितौ चत्वारो लघवो भवन्ति स पञ्चमो (।।।।) गण ॥

एवं गणेषु सिद्धेष्विदानीमार्यालक्षणं करोति—

स्वरा अर्धं चार्यार्धम् । ४ । १४ ॥

गणग्रहणमनुवर्तते । स्वरा इति सप्तानां सज्ञा । यत्र प्रस्तारे गणा सप्त भवन्ति, अर्धं च गणस्य, तदार्यार्धं निष्पद्यते । द्वितीयमप्यर्धं तादृशमेव । समप्रविभागेऽर्धशब्द· । यद्येवमर्धशब्दस्य 'अर्धं नपुंसकम्' (पा० सू० २।२।२) इत्यनेनैकदेशिसमासे सति पूर्वनिपात· प्राप्नोति । यथा—अर्धाढकम्, अर्धपलम्, अर्धखारीति । नैष दोष । सत्यपि समप्रविभागत्वे सबन्धमात्रस्यात्र विवक्षितत्वात् । समप्रविभागस्याप्यर्धशब्दस्यैकदेशिसमासव्यभिचारदर्शनात् । यथा—तुलार्धेन गा क्रीणाति ।

---

१ 'पढमं वारहमत्ता वीए अट्ठारहहिं संजुत्ता ।
जह पढमं तह तीअ दहपञ्चविहूसिआ गाहा ॥' इति प्रा० पि० सू० १।४९.
'सव्वाए गाहाए सत्तावण्णाइं होन्ति मत्ताइं ।
पुव्वद्धम्मि अ तीसा सत्ताईसा परद्धम्मि ॥' इति प्रा० पि० १।५१
'गाथा' इति नामान्तरमार्याया प्राकृतपिङ्गले २. गुरुरूपो द्विमात्र इत्यर्थ ३ इदं सूत्रं श्रीमता भगवता पतञ्जलिना प्रत्याख्यातम् 'परवल्लिङ्ग द्वन्द्वतत्पुरुषयो' (पा० सू० २।४।२६) इति सूत्रे भाष्ये तथा च भाष्यम्—'एकदेशिसमासो नारभ्यते । कथमर्धपिप्पलीति । समानाधिकरणसमासो भविष्यति । अर्धं च सा पिप्पली चार्धपिप्पलीति । न सिध्यति । परत्वात्षष्ठीसमास प्राप्नोति । अद्य पुनरयमेकदेशसमास आरभ्यमाण षष्ठीसमास बाधते । इष्यते च षष्ठीसमासोऽपि । तद्यथा—अपूपार्धं मया भक्षितम् । ग्रामार्धं मया लब्धमिति । एवं पिप्पल्यर्धमिति भवितव्यम् ।' इति अत एव 'प्रेम्णा शरीरार्धहरां हरस्य' इति कालिदासप्रयोग संगच्छते.

पणार्धक्रीतताम्बूलचर्वणाद्वर्धिताननाः ।
अनभ्यासादसम्भाला यान्त्येते वारयाशिका ॥

तथाप्रासमप्रविभागत्वेऽप्यधशब्दस्यैकदेशिसमासदर्शनाच्च ।

अवचन्द्र दधन्मूर्ध्नि पातु व पार्वतीपतिः ।
कालकूटमिव हन्तुं संगृहीतमिवामृतम् ॥

तथा च ।

तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम् ।
अधराज्यहरं मूर्खं यो न हन्यात्स हन्यते ॥

अत्राधस्य लक्षणं सुचाण एव ज्ञापयत्याचार्यो यदार्योयामवान्तरपादव्यवस्था नास्ति। येन 'द्वीपादन्यस्मादपि' इत्यादौ गणत्रयस्यान्ते गुरुत्वं न स्यात् ।




अन्त्रायुक् न ज् । ४ । १५ ॥

अन्त्रायाच्छन्दसि अयुग्गण, प्रथमस्तृतीयः षष्ठम सप्तमश्च नजगणो (।ऽ।) मध्य गुरुश्च कर्तव्य । शेषास्तु कामतो भवन्ति ॥


पैष्ठो ज् । ४ । १६ ॥

अन्त्रायाच्छन्दसि पष्ठो जगणो (।ऽ।) मध्यगुरुरेव भवति । तत्रोदाहरणम्—



न्लौ वा । ४ । १७ ॥

षष्ठ ' इत्यनुवर्तते । आर्यायां षष्ठो गण (।।।) सर्वलघुर्वा भवति । तत्रोदाहरणम्—



---

१ यदि विधिरमिमतमुत्स्त्रीभूत इत्र २ —३ —४ एतदर्थानुपादकं प्राकृतपिङ्गलसूत्रम्

सत्तगणा वीहन्सा जो छट्ठ मउहु छट्ठणेह जो ।
विसमे तह गाहे विअ अद्धे अहुअं विआणेहु ॥ (१।५०) इति




न्लौ चेत्पदं द्वितीयादि । ४ । १८ ॥

षष्ठो (।।।।) गण सर्वलघुश्चेद्भवति, तदा द्वितीयाक्षरादारभ्य पदं प्रवर्तते । पूर्वमेवोदाहरणम् ॥


सप्तमः प्रथमादि । ४ । १९ ॥

षष्ठे गणे मध्यगुरौ (।ऽ।) सर्वलघौ (।।।।) वा जाते सप्तमो गण[*] (।।।।) सर्वलघुश्चेद्भवति, तदा प्रथमाक्षरादारभ्य पदं प्रवर्तते । तत्रोदाहरणम्—



अन्त्ये पञ्चमः । ४ । २० ॥

अन्त्ये भवमन्त्यम् । दिगादित्वाद्यत् । अन्त्ये द्वितीयार्धे पञ्चमश्चेद्गण (।।।।) सर्वलघुर्भवति, तदा प्रथमादि पदं प्रवर्तते । तत्रोदाहरणम्—



षष्ठश्च लू[2] । ४ । २१ ॥


'अन्त्ये' इत्यनुवर्तते । अन्त्ये द्वितीयेऽर्धे मध्यगुरौ (।ऽ।) सर्वलघौ (।।।।) वा षष्ठे गणे प्राप्ते तदपवादो लकारो विधीयते । पूर्वमेवोदाहरणम् ॥

त्रिषु गणेषु पादः पथ्याद्ये च । ४ । २२ ॥


---

१ 'प्रलीनसामन्त' इति लिखितोदाहरणपुस्तके । २ इदं सूत्रं 'ल समुद्रा गण.' (पि० सू० ४।१२) इत्यस्यापवादभूतम्, तेन द्वितीयार्धे एकेनापि लघुना षष्ठो गणो भवतीति बोध्यम्.

चकारोऽन्त्य इलनुक्तपणार्थः । यस्या आर्याया अन्त्येऽर्धे आद्ये च त्रिषु गणेषु पाद समाप्यते, सा आर्या 'पथ्या' नाम भवति । तथया—



पथ्या—शी ल्या—भामी स्त्रीषु जि—तात्मा—नरो न रोगी—स्यात् ।



यदि पद्य—सा मन—सा वा—हृद्यति—नित्य न भूते—न्य ॥

पादग्रहणं यत्युपलक्षणार्थम् ॥

विपुलान्या । ४ । २३ ॥

यस्य आर्याया अन्त्येऽर्धे, आद्ये षोमयोवा त्रिषु गणेषु पादो न विश्राम्यति स आर्या 'विपुला' नाम । सा द्वादशान्तोमयपूर्वैकत्याभिधा भवति । सामान्येन विधानमेतत् । तत्रादिविपुला—




स्निग्ध—च्छाया स्नाय—प्यसेपि—नी कि—ञ्चिदवन—तप्रा—णा ।



मुखविपु—ला सौ—भाग्य—लभते स्त्रीया—ह—माण्ड—व्य ॥

अन्त्यविपुला—




चित्त हरन्ति हरिणी—दीपद—श का—मिनां क—लाला—पै ।



नीवी—विमोच—नम्या—ऽकथित—जघना जघनवि—पु—ला ॥

उभयविपुला—



या स्त्री—कुचकल—शनित—म्बमण्ड—ले जा—यते म—हाविपु—ला ।



गम्भी—रनाभि—रतिवी—र्यलोच—ना भव—ति सा सु—भ—गा ॥

अत्रोच्यते—पथ्याविपुलालक्षणयोः सहानवस्थानलक्षणो विरोध , तेन सिश्रीभावो नास्ति । य एवांशो विपुलस्यामिस्पृष्टस्तेनैव पथ्यात्वं नष्टं भवति, उभयाभयत्वाच्च । पथ्यालक्षणस्य विपुलायास्त्वंशेनापि प्रवेशो दुर्लभ । ततश्च पथ्यालक्षणैकांशवैकल्येऽपि तदन्यमात्रविषयत्वाद्विपुला भवत्येव । पथ्याचपलयोश्च विरोधाभावाद्वाध्यबाधकभावो नास्ति । तत्रार्यं संग्रह —

'एकैव भवति पथ्या तिस्रो विपुलाश्चतस्र एवैता ।
चपलाभेदैस्त्रिभिरपि भिन्ना इति षोडशार्या स्यु. ॥
गीतिचतुष्टयमित्थं प्रत्येकं षोडशप्रकार स्यात् ।
साकल्येनार्याणामशीतिरेवं विकल्पा स्यु ॥'

तेषामनुक्तोदाहरणान्यूह्यानि ॥

चपला द्वितीयचतुर्थौ गमध्ये जौ । ४ । २४ ॥

अधिकारोऽयम् । द्वितीयचतुर्थौ गणौ मध्यगुरू (।ऽ।) भवत । प्रथमश्चान्तगुरुः (॥ऽ), तृतीयो द्विगुरु (ऽऽ), पञ्चमश्चादिगुरु (ऽ॥) । शेषं यथाप्राप्तम् । एवं गकारयोर्मध्ये द्वितीयचतुर्थौ जकारौ भवत', सा आर्या 'चपला' नाम । उदाहरणमग्रत ॥

पूर्वे मुखपूर्वा । ४ । २५ ॥

पूर्वेऽर्धे चपलालक्षणं चेद्भवति, तदासौ 'मुखचपला' आर्या । पथ्यापूर्वकं मुखचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
। । ऽ — । ऽ । — ऽ ऽ — । ऽ । ऽ ऽ — । ऽ । — ऽ । । — ऽ,
अतिदा—रुणा द्वि—जिह्वा—परस्य [1]रन्ध्रा—नुचारि—णी कुटि—ला ।

१ २ ३ ४ ५ ६ ७
ऽ ऽ — ।।।। — ऽ ऽ ऽ ऽ ऽ ऽ — । । । । — । — ऽ,
दूरा—त्परिहर—णीया नारी नागी—व मुखच—प—ला ॥

आदिविपुलापूर्वकं मुखचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
ऽ-ऽ । ऽ । — ऽ ऽ — । ऽ । — ऽ ऽ — । ऽ । — ऽ ऽ — ऽ,
[2]यस्या विलोच—ने पि—ङ्गले भ्रु—वौ स—गते मु—खं दी—र्घम् ।

१ २ ३ ४ ५ ६ ७
।।ऽ — । ऽ । ऽ ऽ ऽ ऽ — ऽ । । — । । । । — । — ऽ,
विपुलो—न्नताश्च दन्ता कान्ता—सौ भव—ति मुखच—प—ला ॥

[3]अन्त्यविपुलापूर्वकं मुखचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
। । ऽ — । ऽ । — ऽ ऽ — । ऽ । ऽ ऽ — । ऽ । — ऽ ऽ — ऽ,
विपुला—भिजात—वंशो—द्भवापि रूपा—तिरेक—रम्या—पि ।

१ २ ३ ४ ५ ६ ७
ऽ ऽ — । ऽ । — ऽ ऽ — । ऽ । — ऽ।। — । । । । — । — ऽ,
[4]निर्वा—स्यते गृ—हाद्ध—ल्लभापि चेद्भव—ति मुखच—प—ला ॥

जघनपूर्वैतत्र । ४ । २६ ॥


द्वितीयेऽर्धे चपलालक्षणं चेद्भवति, सार्या 'जघनचपला' नाम । तत्र पथ्यापूर्वकं जघनचपलोदाहरणम्—

---


१ 'मर्मानुसारिणी' इति लिखितोदाहरणपुस्तके । २. 'यस्याश्च' इत्यपि तत्रैव । ३. 'उभयविपुलापूर्वं' इति क० मु० पुस्तके । ४ 'नि सार्यते' इत्यपि च तत्रैव ।



अन्त्यविपुलापूर्वक जघनचपलोदाहरणम्—




महाविपुलापूर्वक जघनचपलोदाहरणम्—




उभयोर्महाचपला । ४ । २७ ॥

यस्या उभयोरप्यर्धयोश्चपलालक्षणं भवति, सायं 'महाचपला' नाम । तत्र पथ्यापूर्वक महाचपलोदाहरणम्—




विपुलापूर्वक महाचपलोदाहरणम्—



आद्यर्धसमा गीति । ४ । २८ ॥

आद्यर्धेन समनन्त्यमर्धं यस्या सा आद्यर्धसमा 'गीति' नाम । अन्त्यपदलोपी समास । एतदुक्तं भवति—द्वितीयेऽन्त्यर्धे षष्ठो गणो (।ऽ।) जकारो न्लौ (।।।।) वा कर्तव्य ॥

तत्र पथ्यागीत्युदाहरणम्—




मधुरं वीणा—रणितं पञ्चम—सुभग—श्च कोकि—लाला—पः ।




गीति पौरव—धूना सुतं कुसुमा—युधं प्र—बोधय—ति ॥

आदिविपुलागीत्युदाहरणम्—




इयमप—रा विपु—ला गी—तिरुच्य—ते स—र्वलोक—हितहे—तो ।




यदनि—ष्टमात्म—नस्त—त्परेषु भवता—पि मा क्र—चित्का—रि ॥

पथ्यामहाचपलागीत्युदाहरणम्—




कामं चकास्ति—गीति—र्मृगीदृ—शां सी—धुपान—चपला—नाम् ।




सुरत—च मुक्त—लज्जं निरर्ग—लोल्ला—पमणित—रमणी—यम् ॥

महाविपुलामहाचपलागीत्युदाहरणम्—



पञ्चे—षुवल्ल—भ प—ञ्चमाश्व—निस्त—त्र भवति—यदि विपु—ल ।




चपलं—करोति कामा—कुलं म—न का—मिनाम—सौ गी—ति ॥

अन्त्येनोपगीतिः । ४ । २९ ॥

'मा' इत्यनुवर्तते । अन्त्येनार्धेन सममाद्यमर्धं यस्या', सार्या 'उपगीति' नाम ।


तत्र पथ्योपगीत्युदाहरणम्—




गान्ध—र्वं मक—रध्वज—देव—स्यास्त्रं जगद्वि—ज—यि ।

इति सम—वेक्ष्य मु—मुक्षुभि—रुपगी—तिस्त्य—ज्य—ते दे—श' ॥


महापिपुलोपगीत्युदाहरणम्—



पथ्यामहापपट्टोपगीत्युदाहरणम्—




महाविपुलमहापपट्टोपगीत्युदाहरणम्—




उत्क्रमेणोद्गीति[1] । ४ । ३० ॥

पूर्वोक्तात्क्रमाद्विपरीत क्रम उत्क्रमः । अयमर्थः —आदिमन्त्य भवति, अधमन्त्यमादौ, सा 'उद्गीति' नाम आर्या । तत्र पथ्योद्गीत्युदाहरणम्—



महापिपुलोद्गीत्युदाहरणम्—



---

१ 'हुङ्कारमुखरे' इति लि० पु० २ 'रैवतद्योपपने वस्तुमस्तु इति लि० पु०
३ 'चेत' इति लि० पु० ४ महत्युद्योपणा विपुलोद्गीतिरुच्यते

पथ्यामहाचपलोद्गीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७
ऽ ऽ— । ऽ । —ऽ ऽ —। ऽ । — ऽ ऽ — । — । । ऽ— ऽ,
उद्गी—तिरत्र नित्यं—प्रवर्त—ते का—म—चपला—नाम् ।
१ २ ३ ४ ५ ६ ७
ऽ ऽ— । ऽ । —ऽ ऽ । ऽ । —ऽ ऽ । ऽ । —ऽ ऽ— ऽ,
तस्मा—न्मुने वि—मुञ्च प्रदेश—मेतं समेत—मेता—भि ॥

महाविपुलामहाचपलोद्गीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७
। । ऽ । ऽ । —ऽ ऽ— । ऽ । — ऽ ऽ — । ऽ । — । — ऽ,
विपुला पयोध—रश्रो—णिमण्ड—ले च—क्षुषोश्च—प—ला ।
१ २ ३ ४ ५ ६ ७
ऽ ऽ— । ऽ । —ऽ ऽ— । ऽ । ऽ ऽ— । ऽ । —ऽ । । —ऽ,
उद्गी—तिशालि—नी का—मिनी च सा वा—णिनी म—नो हर—ति ॥

अर्धे वसुगण आर्यागीतिः । ४ । ३१ ॥

अष्ट गणा प्रथमेऽर्धे यस्या भवन्ति सा 'आर्यागीति.' नामार्या । अष्टमोऽपि गणश्चतुम त्रिको भवतीत्यर्थ. । विशेषाभावात् । द्वितीयमप्यर्धं तादृशमेव । अत्रापि षष्ठो ग द्विविकल्प एव न लकार । अर्धे इति वर्तमाने पुनरर्धग्रहणाद्गणग्रहणाच्च । इयम पथ्यादिलक्षणपूर्वकत्वात् तद्वदार्यागीतिः ॥ पथ्यार्यागीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८
। । । । — । । । । — ऽ ऽ ऽ ऽ — ऽ ऽ — । ऽ । — ऽ ऽ — । । ऽ,
अजमज—रममर—मेकं प्रत्य—क्चैत—न्यमीश्व—रं ब्र—ह्म परम् ।
१ २ ३ ४ ५ ६ ७ ८
ऽ ऽ — ऽ ऽ — । । ऽ । । ऽ— ऽ ऽ — । ऽ । — ऽ ऽ — ऽ ऽ,
आत्मा—नं भा—वयतो भवमु—क्ति स्या—दितीय—मार्या—[2]गीतिः

महाविपुलार्यागीत्युदाहरणम्—


१ २ ३ ४ ५ ६ ७ ८
। । ऽ — । ऽ । — । । ऽ — । ऽ । — ऽ । । — । । । । — । । । । — । । ऽ
[3]विषया—भिलाष—मृगतृ—ष्णिका ध्रु—वं [4]हर—ति हरिण—मिव हत—हृदयम्
१ २ ३ ४ ५ ६ ७ ८
। । ऽ — । ऽ । — । । ऽ — । । ऽ — ऽ ऽ — । ऽ । — । । । । — ऽ ऽ,
विपुला—त्ममोक्ष—सुखका—ङ्क्षिभिस्त—तस्य—ज्यते वि—षयरस—सङ्ग ॥

पथ्याजघनचपलार्यागीत्युदाहरणम्—


१ २ ३ ४ ५ ६ ७ ८
ऽ ऽ — । ऽ । — ऽ ऽ — । । ऽ ऽ ऽ — । । । । — । । ऽ — । । ऽ,
वाता—हतोर्मि—माला—चपलं संप्रे—क्ष्य विषय—सुखम—ल्पतरम् ।

---

१ 'मालिनी' इति लि० पु० २. 'आर्याणामासमन्ताद्गीति . ३. 'विपुलाभिलाष इति लि० पु० ४ 'हन्ति'इति लि० पु०.




महाग्निपुराणमहाकवेरसायागीत्युदाहरणम्—




इत्यार्याधिकारः ।

वैतालीय द्विस्वरा अयुक्पादे युग्वसवोऽन्ते लगाः । ४ । ३२ ॥


'ख' इत्यनुवर्तते । वैत्रायुक्पादे प्रथमे तृतीये च द्विस्वराश्चतुर्दश लकारा भवन्ति युक्पादे च द्वितीये चतुर्थे च युग्वसव एकादश लकाराः, तद् 'वैतालीय' नाम छन्द । तेषां लां मध्ये उभयोरपि पादयोरन्ते रेफलकारगकारा कर्तव्या । आदे पादे पञ्च लकारा पश्चादवशिष्यन्ते । द्वितीये षट् । एव वैतालीयार्धं सिध्यति । द्वितीयमप्यर्धं तादृशमेव । सैत्रोदाहरणम्—



अपि च ।



मया च ।



---

१ 'अयमर्थं —यन्त्रायुक्षि' इति लि० पु० २ चतुर्दशसंख्याका' इति लि० पु० ३ 'द्विर्वसव' इति लि० पु० ४ लेषां लां मध्ये' इति लि० पु० ५ 'द्वयोरपि' इति लि० पु० ६ 'द्वितीयमपि वैतालीयं' इति लि० पु० ७ अत्र' इति लि० पु ८ 'शिरोऽस्मि' लि पु० ९ 'नर ' इति लि० पु० १० 'पङ्क्तिर्वितं' इति लि० पु

१ २ ४ ५ ६ ८ ९ ११ १२ १४ २ ४ ६ ७ ८ १० ११ १३ १४ १६
।–।–ऽ–।–।–ऽ–।–ऽ–।–ऽ ऽ–ऽ–ऽ–।–।–ऽ ।–ऽ–।–ऽ,
व–पु–रं[1]–न्त–र–व–हि–दी–पि–तं वै–ता–ली–य–मि–दं वि–लो–क्य–ताम् ॥

वैतालीयमिति वेतालशब्दात्कृशाश्वा(पा० सू० ४।२।८०)देराकृतिगणत्वाच्छण्प्रत्ययश्चातुरर्थिक । अत्र पादग्रहणमिदं ज्ञापयति, यदार्यादीना[2] 'पादश्चतुर्भाग.' (पि० सू० ४।१०) इति व्यवस्था नास्ति ॥

गौपच्छन्दसकम् । ४ । ३३ ॥

अस्मिन्[3] वैतालीये छन्दस्यन्ते गकारश्चेदधिको भवति, तद् 'औपच्छन्दसकं' नाम छन्द. । तत्रोदाहरणम्—

२ ४ ५ ६ ८ ९ ११ १२ १४ १६ २ ४ ६ ७ ८ १० ११ १३ १४ १६ १८
ऽ–ऽ–।–।–ऽ ।–ऽ–। ऽ–ऽ ऽ ऽ–ऽ–।–।–ऽ–।–ऽ–। ऽ–ऽ,
वा–क्यै–र्मं–धु–रै प्र–ता–र्य पू–र्वं य प–श्चा–द–भि–स–द–धा–ति मि–त्रम् ।
२ ४ ५ ६ ८ ९ ११ १२ १४ १६ २ ४ ६ ७ ८ १० ११ १३ १४ १६ १८
ऽ–ऽ–।–।–ऽ ।–ऽ–।–ऽ–ऽ–ऽ–ऽ–ऽ–।–।–ऽ ।–ऽ–। ऽ–ऽ,
तं दु–ष्ट–म–तिं वि–शि–ष्ट–गो–ष्ठ्या–मौ–प–च्छ–न्द–स–कं व–द–न्ति वा–ह्यम् ॥
अपि च ।
१ २ ४ ५ ६ ८ ९ ११ १२ १४ १६ १ २ ४ ६ ७ ८ १० ११ १३ १४ १६ १८
।–।–ऽ–।–।–ऽ–।–ऽ–।–ऽ–ऽ ।–।–ऽ–ऽ–।–।–ऽ–।–ऽ–।–ऽ–ऽ,
प–र–म–र्मं–नि–री–क्ष–णा–नु–र–क्तं स्व-य-म-ल्य-न्त-नि-गू-ढ-चि-त्त–वृ त्तिम् ।
१ २ ४ ५ ६ ८ ९ ११ १२ १४ १६ २ ४ ६ ७ ८ १० ११ १३ १४ १७ १८
।–।–ऽ–।–।–ऽ–।–ऽ–।–ऽ–ऽ–ऽ–ऽ–ऽ–।–।–ऽ ।–ऽ–। ऽ–ऽ,
अ–न–व–स्थि–त–म–र्थ–लु–ब्ध–मा–रा–दौ-प-च्छ-न्द-स-कं ज–ही–हि मि–त्रम् ॥

उपच्छन्द शब्दादरीहृणादि(पा० सू० ४।२।८०)पाठाच्चातुरर्थिको वुञ्प्रत्यय. ॥

आपातलिका भ्गौ ग् । ४ । ३४ ॥

रेफलकारगकाराणामपवाद ।'द्वि.खरा अयुक्पादे युग्वसवोऽन्ते'(पि. सू. ४।३२) इत्यनुवर्तते । पूर्वलक्षणयोरन्ते भकारो गकारौ[4]द्वयं–च भवत , तद्वैतालीयम् 'आपातलिका' नाम लभते[5] । तत्रोदाहरणम्—

२ ३ ४ ६ ८ ९ १० १२ १४ २ ४ ६ ७ ८ १० ११ १२ १४ १६
ऽ–।–।–ऽ–ऽ ।–।–ऽ–ऽ ऽ–ऽ–ऽ ।–।–ऽ–।–।–ऽ–ऽ,
पि–ञ्ज–ल–के–शी क–पि–ला–क्षी वा–चा–टा वि–क–टो–न्न–त–द–न्ती ।
२ ४ ५ ६ ८ ९ १० १२ १४ १ २ ३ ४ ६ ७ ८ १० ११ १२ १४ १६
ऽ–ऽ–।–।–ऽ ।–।–ऽ–ऽ ।–।–।–।–ऽ–। । ऽ–।–।–ऽ–ऽ,
आ–पा–त–लि–का पु–न–रे–षा नृ–प–ति–कु–ले–ऽपि न भा–ग्य–मु–पै–ति ॥
आपातलिका अस्थिरेत्यर्थ ॥

---

१. 'रातप' इति लि० पु०. २. 'आर्यादीनाम्' इति लि. पु ३ 'तस्मिन्नेव' इति लि. पु. ४. 'गकारौ' इति लि. पु. ५. 'आपातलिका भवेत्' इति लि. पु.

शेषे परेण युङ् न साकम् । ४ । ३५ ॥

अत्र वैतालीयाधिकारे यथा लकाराणां नियम ऽैकस्वव्यतिरिक्तो लकारयण शेषस्त स्मिन्नियम क्रियते—युगलकारः परेण सार्कं न मिथीकर्तव्य । द्वितीयस्तृतीयेन, चतुर्थं पञ्चमेन युक्पादे षष्ठ सप्तमेन । एवं यदवा शेषाणां मिथीभावोऽप्यनुज्ञात । अत्रोदाहरण पूर्वमेव ॥

षट् चामिश्रा युजि । ४ । ३६ ॥

अत्र द्वितीयचतुर्थयो पादयो षट् लकारा अमिश्रा न कर्तव्याः । पृथग् म प्रयो क्तव्या इत्यर्थ । प्रथमतृतीयषोश्च पादयो स्वरुचि । तत्रोदाहरणं वैतालीये तावत्—

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
।-।-।-।-।-।-ऽ ऽ-।- ।- ।-।-।- ।-ऽ-।- ।- -।- -।-ऽ
स-म-र-शि-र सि स-ख-ये द्वि-पां न-ख-नि-शि-ता-यु-ध-वृ-ष्टि-र-भ-त ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
।-।-।-।-।-।-ऽ-।-ऽ-।-ऽ ।-।- - ।- - ।- -।-ऽ
कु-च-छ-भ-द-स-क्षी-य-च-क्षु-षां प्र-म-दा-भां म क-टा-क्ष-वी-क्षि-तैम्॥

औपच्छन्दसकोदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
।-।-।-।-।-।-ऽ ऽ-।- -।-ऽ- -ऽ -।-।- ।-ऽ ।-ऽ-
प-र-यु-व-ति-षु पु-त्र-भा-व-भा-दौ ह-स्ता प्रा-प्यै-व-ते त-त प वि-स्वम्।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
।-।-।-।-।-।-ऽ-।-ऽ ।-ऽ- -ऽ-ऽ-ऽ-।-।- -।- -। ऽ-ऽ
ह-द-म-प-र-मि-हो-च्य-ते वि-षे-षा-दौ प-च्छ-न्द-स कं स्व-रूप-स्य पृ-त्तम् ॥

आपातलिकोदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
।-।-।-।-।-।-ऽ-।-।-ऽ-ऽ ऽ-।-।-ऽ ।-।-ऽ-।-।-ऽ-ऽ
अ-मि-र-म-य-ति कि-न-र-क-ण्ठी ई-ष-ग-सि थ-व-ना-य-स-मे-त्रा ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
।-।-।-।-।-।-ऽ-।- ।-ऽ-ऽ ।-।-।- -।-।-ऽ ।-।-ऽ-ऽ
वि-श-द-क-म-ल-को-म-ल-गा-त्री यु-व-ति-रि-य इ-द-म त-रु-णा-नाम् ॥

पञ्चमेन पूर्वः सार्कं पौच्यपृत्ति[1] । ४ । ३७ ॥

इदानीं विशेषलक्षणमाह— शेषे परेण युङ् न साकम्' (पि सू ४।३५) इत्यत्र पञ्चमचतुर्थयोरेकीभावो निषिद्ध सोऽनेन विधीयते । 'युजि' इत्यनुवर्तते । यदा युक्पादे

---

१ 'व्यतिरेको' इति छि पु २ 'तत्र' इति छि पु ३ 'पूर्वोक्तमेव' इति छि पु ४ 'न पृथक्' इति छि पु ५. 'कटाक्षवीक्षिते' इति छि पु ६ 'वैतालीयप्राच्य वृत्ति, औपच्छन्दसकप्राच्यवृत्ति, आपातलिकाप्राच्यवृत्ति' इति भेदत्रयमुपलभ्यते छन्दकौस्तुभादौ

पञ्चमेन लकारेण पूर्वं संगच्छते तदा 'प्राच्यवृत्ति.' नाम वैतालीयं भवति । शेषं यथा-प्राप्तम् । तत्रोदाहरणम्—

१ २ ४ ५ ६ ८ ९ ११ १२ १४, २ ३ ५ ६ ७ ८ १० ११ १३ १४ १६
।—।— ऽ—।—।—ऽ— ।— ऽ— ।— ऽ ऽ—। ऽ—। । ।—ऽ—।—ऽ—।—ऽ,
वि–पु–ला–र्थ–सु–वा–च–का–क्ष–रा. क–स्य ना–म न ह–रन्ति मा–न–सम् ।

१ २ ४ ५ ६ ८ ९ ११ १२ १४ २ ३ ५ ६ ७ ८ १० ११ १३ १४ १६
।—।— ऽ—।—।—ऽ—।—ऽ—।— ऽ ऽ—। ऽ—। । ।—ऽ—।—ऽ—।—ऽ,
र–स–भा–व–वि–शे–ष–पे–श–ला. प्रा–च्य–वृ–त्ति–क–वि–का–व्य–सं–प–द ॥

अयुक्तृतीयेनोदीच्यवृत्तिः[1] । ४ । ३८ ॥

'पूर्वः साकम्' इत्यनुवर्तते । अयुक्पादे तृतीयेन लकारेण यदि पूर्वः संगच्छते तदा 'उदीच्यवृत्ति[2]' नाम वैतालीयम् । शेषं यथाप्राप्तमेव । तत्रोदाहरणम्—

१ ३ ४ ५ ६ ८ ९ ११ १२ १४ १ २ ४ ६ ७ ८ १० १२ १३ १४ १६
।—ऽ—।—।—।—ऽ—।— ऽ—।—ऽ ।—।—ऽ—ऽ । ।—ऽ—ऽ—।—।—ऽ,
अ–वा–च–क–म–नू–र्जि–ता–क्ष–रं श्रु–ति–दु–ष्टं य–ति–क–ष्ट–मं–क–मम् ।

१ ३ ४ ५ ६ ८ ९ ११ १२,१४ १ २ ४ ६ ७ ८ १० ११ १३ १४ १६
।—ऽ—।—।—।—ऽ । ऽ—।—ऽ ।—।— ऽ— ऽ—। —। —ऽ—।—ऽ—।—ऽ,
प्र–सा–द–र–हि–तं च ने–ष्य–ते क–वि–भि का–व्य–मु–दी–च्य–वृ–त्ति–भि ॥

आभ्यां युगपत्प्रवृत्तकम्[3] । ४ । ३९ ॥

आभ्यां पूर्वोक्तलक्षणाभ्या युगपत्प्रवृत्ताभ्या 'प्रवृत्तकं' नाम वैतालीयम् । युक्पादे पञ्चमेन पूर्वं. संगच्छते, अयुक्पादे तृतीयेन द्वितीय इत्यर्थ. । तत्रोदाहरणम्—

१ ३ ४ ५ ६ ८ ९ ११ १२ १४ २ ३ ५ ६ ७ ८ १० ११ १३ १४ १६
।—ऽ । —।—। ऽ— ।—ऽ—।—ऽ ऽ—।—ऽ ।—।—।—ऽ—।—ऽ—।—ऽ,
इ–दं भ–र–त–वं–श–भू–मृ–तां श्रू–य–ता श्रु–ति–म–नो–र–सा–य–नम् ।

१ ३ ४ ५ ६ ८ ९ ११ १२,१४, २ ३ ५ ६ ७ ८ १० ११ १३ १४ १६
।—ऽ—।—।—।—ऽ ।—ऽ—।—ऽ ऽ—।—ऽ—।—।—।—ऽ ।—ऽ—।—ऽ,
प–वि–त्र–म–धि–कं शु–भो–द–यं व्या–स–व–क्त्र–नि–र्गि–तं प्र–वृ–त्त–कम् ॥


अयुक्चारुहासिनी[4] । ४ । ४० ॥

यस्य सर्वे पादा अयुग्लक्षणयुक्तास्तद्वैतालीयं 'चारुहासिनी' नाम । किं तल्लक्षणं चतुर्दशमात्रत्वं तृतीयेन पूर्वस्य योग । तत्रोदाहरणम्—

१ ३ ४ ५ ६ ७ ८ ११ १२ १४ १ ३ ४ ५ ६ ८ ९ ११ १२ १४
।—ऽ—।—।—।—ऽ—।—ऽ—।—ऽ, ।—ऽ—।—।—।—ऽ—।—ऽ—।—ऽ
म–ना–क्प्र–सृ–त–द–न्त–दी–धि–ति· स्म–रो–ल्ल–सि–त–ग–ण्ड–म–ण्ड–ला ।


---

१ अस्यापि 'वैतालीयोदीच्यवृत्ति, औपच्छन्दसकोदीच्यवृत्ति, आपातलिकोदीच्य-वृत्ति' इति भेदत्रयमुपलभ्यते तत्रैव २. तद् उदीच्यवृत्तिः' इति लि. पु. ३. 'वैता-लीयप्रवृत्तम्, औपच्छन्दसकप्रवृत्तम्, आपातलिकाप्रवृत्तकम्' एवं त्रिविधं छन्द कौ-स्तुभादौ. ४. तथैव चारुहासिन्यपि त्रिविधा.



युगपरान्तिका । ४ । ४१ ॥

युग्लक्षणयुक्तेऽष्टमे पादे 'अपरान्तिका' नाम वैताळीयम् । किं तल्लक्षणं षोडशमात्रत्वं पञ्चमेन पूर्वस्य योगः पञ्चानां मिश्राणां प्रयोगश्च । तत्रोदाहरणम्—




अपरस्यान्तिके समीपे स्थिता । परकीयेत्यर्थः ॥

इति वैतालीयाधिकारः ।

गन्ता द्विर्षसवो मात्रासमक ल् नवमः । ४ । ४२ ॥

वैताळीयम्- (पि० सू० ४ । ३२) इत्यादिसूत्रास्यसम्बन्ध 'पाद'ग्रहणमनुवर्तते । 'ल्' इति च महानधिकारः । तेनायमर्थः—यत्र पादे गन्ता सन्त, षोडश लकारा भवन्ति तत् 'मात्रासमकं' नाम छन्दः । अन्ते द्वाभ्यामेको गुरुः (ऽ) कर्तव्यः । नवमस्थ लकार (।) एव । 'द्विर्षसवः इति द्विगुणिता नवस्व लकारा षोडशेत्यर्थः । शेषे परेण युक् न साकम्' (पि० सू० ४।३५) इत्यनुवर्तनीयम् । तत्रोदाहरणम्—



'गन्त- (पि० सू० ४ । ३२) इत्यनेनैवान्तस्य गुरुत्वे सिद्धे पुनर्गन्तग्रहणमादिदेशिकगुरुत्वनिवृत्त्यर्थम् । तेनात्र द्वौ लकारौ (।।) भवतस्ता द्विमात्रिको गुरुः (ऽ) क्रियत इति वाक्यशेषः ॥

---

१ अपरान्तिकापि त्रिषूपलभ्यते तत्रैव २ 'तद्गुरुलक्षणम्' इ लि पु १ सि तस्मिन्नासरसोक्तिपेशला इति लि पु ४ कोमलमुखी इति लि पु ५. छन्दःकौस्तु भहत्तरलकरादिग्रन्थेषु नव वैतालीयभेदा उपलभ्यन्ते परंत्वत्र तेष्वेकतमो 'दक्षिणान्तिका' इतिनामा भेदो नोपलभ्यते इयमप्यपरान्तिका पूर्वनिर्दिष्टैव तत्रोपलभ्यते ६ 'मात्रासमकं नवमो ल् गोऽन्त्य इति वृ० र० ७ मिलनासाम्र' इति कलिकाता मुद्रितपुस्तके. मलनासाम्र' इति लिखितपुस्तके पु ८ अन्त्यस्य' इति लि० पु०

द्वादशश्च वानवासिका । ४ । ४३ ॥

यस्य मात्रासमकस्य पादे द्वादशो लकार· (।) स्वरूपेणावतिष्ठते चकारान्नवमश्च, तन्मात्रासमकं 'वानवासिका' नाम । तत्रोदाहरणम्—

२ ३ ४ ६ ८ ९ १० ११ १२ १४ १६ १ २ ३ ४ ६ ७ ८ ९ १० ११ १२ १४ १६
ऽ–।–।– ऽ–ऽ–।–।–।–।–ऽ–ऽ, ।–।–।–।–ऽ–।–।–।–।–।–।–ऽ–ऽ,
म–न्म–थ–चा–प–ध्व–नि–र–म–णी–य· सु–र–त म-हो-त्स-व-प-ट–ह–नि-ना-द·।

१ २ ४ ६ ८ ९ १० ११ १२ १४ १६ २ ३ ४ ६ ८ ९ १० ११ १२ १४ १६
।–।–ऽ–ऽ–ऽ–।–।–।–।–ऽ–ऽ, ऽ–। । ऽ–ऽ–।–।–।–। ऽ–ऽ,
व–न–वा–स–स्त्री–स्व–नि–त–वि–शे–ष क–स्य न चि–त्तं र–म–य–ति पुं–स ॥

विश्लोकः पञ्चमाष्टमौ । ४ । ४४ ॥

द्वादशग्रहणं नवमग्रहणं च निवृत्तम् । यत्र चतुर्षु पादेषु पञ्चमाष्टमौ लकारौ (।) तिष्ठत·, शेषं यथाप्राप्तम्, तन्मात्रासमकं 'विश्लोको' नाम । तत्रोदाहरणम्—

२ ४ ५ ६ ७ ८ १०. १२ १४ १६ २ ३ ४ ५ ६ ७ ८ १० ११ १२ १४ १६
ऽ–ऽ–।–।–।–।–ऽ ऽ–ऽ–ऽ, ऽ–।–।–।–।–।–।–ऽ–।–।–ऽ–ऽ,
भ्रा–त–र्गु–ण–र–हि–तं वि–श्लो–कं दु–र्ज–य–क–र–ण–क-द–र्थि–त–लो–कम् ।

२ ४ ५ ६ ७ ८ १० ११ १२ १४ १६ २ ४ ५ ६ ७ ८ १० ११ १२ १४ १६
ऽ–ऽ ।–।–।–।–ऽ– ।– । –ऽ–ऽ, ऽ–ऽ ।–।–।–। ऽ–।–।–ऽ–ऽ,
जा–तं म–हि–त–कु–ले–ऽप्य–वि–नी–तं मि–त्रं प–रि–ह–र सा–धु–वि–गी तम्॥

चित्रा नवमश्च । ४ । ४५ ॥

यस्य नवमो लकार (।) एवावशिष्यते चकारात्पञ्चमाष्टमौ च, तन्मात्रसमकं 'चित्रा' नाम । तत्रोदाहरणम्—

१ २ ४ ५ ६ ७ ८ ९ १० १२ १४ १६ २ ४ ५ ६ ७ ८ ९ १० ११ १२ १४ १६
।–। ऽ–।–। ।–।–।–।–ऽ–ऽ–ऽ, ऽ–ऽ ।–।–।–। ।–। ।–ऽ–ऽ–ऽ,
य–दि वा–ञ्छ–सि प–र–प–द–मा–रो–ढुं मै–त्रीं प–रि–ह–र स-ह व–नि-ता भि ।

२ ३ ४ ५ ६ ७ ८ ९ १० १२ १४ १६ २ ४. ५ ६.७. ८ ९.१० १२ १४ १६
ऽ–।–। ।–।–।–। ।–।–ऽ–ऽ–ऽ, ऽ–ऽ ।–।–। । ।–।–ऽ ऽ–ऽ
मु–ह्य–ति मु–नि–र–पि वि–ष–या–स–ङ्गा–च्चि-त्रा भ-व ति हि म-न–सो वृ-त्तिः ॥


'नवम '(पि०सू०४।४२) इत्यनुवर्तमानेऽपि पुनर्नवमग्रहणमुपचित्राप्रतिप्रसवार्थम्।

परयुक्तेनोपचित्रा । ४ । ४६ ॥

परयुक्तेन दशमेन सहैकीभूतेन नवमेन 'उपचित्रा' नाम भवति । पूर्वं लघुनियमेन लक्षणं प्रोक्तम् । इदं तु गुरुनियमेनोच्यते । तत्रोदाहरणम्—

---


१. 'तद्युगलाद्वानवासिका स्यात्' इति वृ० र०. २. 'जो लनावथाम्बुधे विश्लोकः' इति वृ० र०. ३ 'वाणाष्टनवसु यदि लश्चित्रा' इति वृ० र० ('चित्रा नाम च्छन्दश्चित्रं चेत्रयो वा यकरौ' इति च्छन्दोमञ्जर्यादिषूपलब्धं चित्रा चित्रं वा च्छन्दस्त्वन्यत्) ४. 'उपचित्रा नवमे परयुक्ते' इति वृ० रं० (अर्धसमवृत्तान्तर्गतोपचित्रनामकं छन्दस्त्वतोऽन्यत्.)




एमि' पादाकुलकम् । ४ । ४७ ॥

एषां पद्यानां मध्ये यं कंचिदपि चतुर्भि पादैः 'पादाकुलकं' नाम ।


मात्रासमश्लोकपादनाराचिकोपचित्राणां पादस्योदाहरणम्—



तथा विश्लोकोपचित्रामात्रासमश्लोकोपचित्राणां पादं 'पादाकुसकम्' । तत्रोदाहरणम्—



मात्रासमश्लोकस्यैकेन पादेन, द्वाभ्यामुपचित्राया , विश्लोकस्यैकेन 'पादाकुलकम्' । तत्रोदाहरणम्—



यथा पादाकुलकनाम्न श्लोकस्य पादेष्वस्थिरता तथेसर्थं ।

---

१ बहुगुड एक्क णिम्म णहि जेहा, पभ पभ लेक्कसह उत्तमरेहा । सुकइ कमिन्दह कण्ठहवलअं, सोरहमत्ता पाआकुलअम् ॥ इति प्रा० पि० सू० १।१०४

२ 'मात्रासमुक' इत्यधिक लि पु १ 'यदतीतहस्तविभिन्नलक्ष्मयुतैर्मात्रासमादिपादैः कल्पितम् । अनियतवृत्तपरिणामसहितं प्रथितं जगत्सु पादाकुलकम् ॥' इति ह० र०

उपचित्रापादेनैकेन, वानवासिकापादेन, पुनरुपचित्रापादाभ्यां पादाकुलकम् । तत्रोदाहरणम्—

१. २ ३ ४ ६ ७ ८ १०. ११ १२ १४ १६
।–।– ।–।–।–।–।–ऽ–।–।–ऽ–ऽ
प–रि–ह–त–स–र्वं–प–रि–अ–ह–लो–क

१ २ ३ ४. ६ ७ ८ ९ १० ११ १२ १४ १६
।–।–।–।–ऽ–।–।–।–।–।–।–ऽ–ऽ,
अ–ति–दि–न–व–र्धि–त-गु-रु-त-र-शो-कः ।

२. ३. ४ ६ ७ ८ १० ११ १२ १४ १६
ऽ–।–।–ऽ–।–।–ऽ–।–।–ऽ–ऽ,
दु·–ख–वि–व–र्धि–त–लो–च–न–वा–रिः

२ ४ ५ ६ ८ १० ११ १२ १४ १६
ऽ–ऽ–।–।–ऽ ऽ–। ।–ऽ–ऽ,
पा–दा–कु–ल–कं या–ति त–वा–रि. ॥

इति मात्रासमकाधिकारः ।

गीत्यार्या[1] लः । ४ । ४८ ॥

यत्र पादे द्विर्वसव. षोडश लकारा भवन्ति सा 'गीत्यार्या[2]' नाम जाति । 'ल' इत्यनुवर्तमाने पुनर्लग्रहणं द्विमात्रिकनिवृत्त्यर्थम् । तत्रोदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।
म–द–क–ल–ख–ग–कु–ल–क–ल–र–व–मु–ख–रि–णि

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।
वि–क–सि–त–स–र–सि–ज–प–रि–म–ल–सु–र–भि–णि ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११,१२ १३ १४ १७ १६
।–।–।–।–।–।–।–।–।–।–। ।–।–। ।–।
गि–रि–व–र–प–रि–स–र–स–र–सि म–ह–ति ख–लु

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
।–।–।–।–।–।–।–। ।–। ।–। ।–।–।–।,
र–ति–र–ति–श–य–मि–ह म–म ह्–दि वि–ल–स–ति ॥

सर्वलघुच्छन्दसि गीत्यार्याशब्दस्य प्रवेशयितुमशक्यत्वात्तन्नाम नोक्तम् ॥

---

१. 'द्विगुणितवसुलघुरचलधृतिः' इति नामान्तरं वृ० र०. २. 'चउमत्ता अट्ठगणा पुव्वद्धे, उत्तरद्ध होइ समरूआ । सो **खन्धआ** विआणहु पिङ्गल पभणेइ मुद्धि बहुसंभेआ ॥' इति प्रा० पि० सू० १।६३ इत्यनुसारेण स्कन्धकमित्यपि सज्ञान्तर भवेत्.

शिंखा विपर्यस्तार्धा । ४ । ४९ ॥

सैव गीत्यार्या विपर्यस्तार्धा यदा भवति तदा 'शिखा' इत्याख्यां लभते । अयमर्थ —यत्रार्धं सर्वलघु भवति, अर्धं च सर्वगुरु, इति ।

एव तस्या एव विन्यासभेदेन संज्ञाद्वयमाह—

लः पूर्वश्चेज्ज्योति' । ४ । ५० ॥

पूर्वार्धेऽपभाग सर्वलघुद्वात्रिंशाक्षरो (३२) भवति, उत्तरार्ध सर्वगुरु षोडश (१६)-गकारस्तदा 'ज्योति ' नाम शिखा भवति । तत्रोदाहरणम्—

```
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
।-।-।-।-।-।-।-।-। ।-।-।-।-।-।-।
य-दि मु-स-म-नु-प-म-म-प-र-म-मि-ह-प-सि

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२
।-।-।-। ।-।-।-। ।-।-।-।-।-।-।-।-।
प-रि-द-र यु-य-ति-पु र-वि-म-ति-श-य-मि-द ।

१ २ ३ ४ ५ ६ ७ ८
ऽ-ऽ-ऽ- -ऽ- - - ऽ
आ-रम-ज्यो-ति-र्यो-गा-भ्या-सा

९ १० ११ १२ १३ १४ १५ १६
ऽ-ऽ -ऽ- ऽ- ऽ-ऽ
दृ-श्या दु-स-च्छे-दं फु-ल्ला ॥
```

गश्चेत्सौम्या । ४ । ५१ ॥

तस्या एव शिखाया पूर्वार्धभाग सर्वगुरु षोडश (१६) गकारश्चेद्भवति, उत्तरार्ध द्वात्रिंश (३२) लकारो भवति तदा सौम्या' नाम शिखा भवति । तत्रोदाहरणम्—

```
१ २ ३ ४ ५ ६ ७ ८
ऽ- ऽ ऽ-ऽ ऽ-ऽ ऽ-
सौ-म्यां दृ-ष्टिं दे-हि मे-हा

९ १० ११ १२ १३ १४ १५ १६
ऽ-ऽ-ऽ- ऽ ऽ- ऽ-ऽ
दे-हे-ऽस्मा-क मा-सं मु-क्ता ।
```

---

१ मत्त अठाइस पढमे, बीए पत्तीस मत्ताइ । पभ पभ मन्से सहुआ सुद्धा सिखा विहाणेहु ॥' इति प्रा० पि० सू० १।१२७ उक्तशिखाच्छन्दस्त्वन्यत् २ 'मन्दउमइचसे ससारप्पसिवधम्मवारणवरुण । णीसुमअगतासइसेहरुसरुगभणुसरहुविमइरवीर ॥' इति प्रा० पि० सू० १।६४ इति सूत्रोक्तस्कन्धकभेदान्तर्गतशरभार्द्धं छन्दोनामान्तरम् ३ 'अनङ्गक्रीडा' इति नामान्तरमस्य वृ० र०

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
।–।–।–।–।–। ।– ।– ।–।–।–। ।– । ।–।,
श–श–ध–र–मु–खि मु–ख–मु–प–न–य म–म ह्–दि

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७.२८ २९ ३० ३१ ३२
।–।–।–।–।–।–।–।–।–। ।–।–।–।–।–।
म–न–सि–ज–रु–ज–म–प–ह–र ल–घु–त–र–मि–ह ॥

चूलीकैकोनत्रिंशदेकत्रिंशदन्ते ग् । ४ । ५२ ॥

'अर्ध' ग्रहणम् (पि० सू० ४।४९) अनुवर्तते । यत्र प्रथमेऽर्धे एकोनत्रिंश(२९)ल्लकारा भवति, द्वितीये चार्ध एकत्रिंशत् (३१), तयोश्चान्ते द्वौ (॥) लकाराद्युन्मूल्य प्रत्येकमेको गुरु· (ऽ) क्रियते, तत् '[1]चूलिका' नाम छन्द । 'अन्ते ग्' इति विशेषोपादानसामर्थ्यादन्येषा लघुत्वमुक्तं भवति । तेनाद्ये सप्तविंशति (२७)र्लघव , अन्ते गुरुरेको भवति । द्वितीयेऽप्येकोनत्रिंश (२९) ल्लघव , अन्ते गुरुश्चैक । तत्रोदाहरणम्—

१ २ ३ ४ ५ ६ ७, ८. ९ १० ११ १२ १३ १४
।–।–।–।–।–।–।–।–।–। ।–।–।–।,
र–ति–क–र–म–ल–य–म–रु–ति शु–भ–श–श–

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २९
।–।– ।–।–।–।–।–।–। ।–।–।–।–ऽ,
म–भि–ह–त–हिं–म–म–ह–सि म–धु–स–म–ये ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
।–।–।–। ।–।–। ।–।–।–। ।–।–।–। ।,
प्र–व–स–सि प–थि–क वि–र–हि–त क–थ–मि–ह तु

१७ १८ १९ २० २१.२२ २३ २४ २५ २६ २७ २८ २९ ३१
।–।–।–।–।–।–।–।–।–।–।–।–ऽ,
प–रि–ह्–त–यु–व–ति–र–ति–च–प–ल–त–या ॥

अन्यै पुनरन्यथैवेदं सूत्रमवीयते—'चूलिकार्धमेकोनत्रिंशदन्ते ग्' इति । तेषामुभयोश्चाप्यर्धयोरेकोनत्रिंशन्मात्रा गुर्वन्ता भवन्ति । तत्रोदाहरणम्—


१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२.१३ १४
।–।–।–।–।–।–।–।–।–।–।–।–।–।
घ–न–प–रि–म–ल–मि–ल–द–लि–कु–ल–मु–ख-

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २९
।–।–।–।–।–।–।–।–।–।–।–।–।–।,
रि–त–नि–खि–ल–क–म–ल–म–ल-य–प–व–ने ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
।–।–।–। ।–।–। ।–।– ।– । ।–।–।
ज–न–य–ति म-न–सि श–शि–मु–खि मु–द–म-

---

१. **'अतिरुचिरा'** इति सज्ञान्तरं वृत्तरत्नाकरादिषु.




'अथ ग्रहणादत्र पादव्यवस्था नास्ति ॥

इदानीं गणमात्राच्छन्दसां गुरुलघुसंख्यापरिज्ञानार्थमिदमाह—

सा ग् येन न समा लां ग्ल इति । ४ । ५३ ॥

सा गुरुसंख्या वेदितव्या । येन यावद्विरहरे । लां लघूनां मात्राणाम् । यमा समसंख्या ग्ले न स्यु । अपि तु न्यूनसंख्या एव । 'गल' इत्यक्षराण्यभिधीयन्ते तेषां गुरुलघुरूपत्वात् । अयमभिप्रायः—आर्यादिषु यत्र यावत्यो मात्रा उपदिश्यन्ते यथासंख्यं न पूर्यन्ते, सा तत्र गुरुसंख्या वेदितव्या । अपशिष्टा लघुसंख्या । तत्रायमुपयोग—यदा कश्चित्पृच्छति, चत्वारिंशदक्षरायामायां कति गुरवः संपद्यन्ते, कति वा लघव इति, तदा यत्पद्याद्यन्मात्रोपदिष्टयामायां मात्रा संख्यायां चत्वारिंशदक्षरसंख्या(४०)मपनीय तत्र येऽपशिष्यन्ते, तान् गुरूनुपदिशेत् । ते च सप्तदशैव(१७) । शेषांस्तु त्रयोविंशति(२३)लघूरूपानुपदिशेत् । तद्यथा—



---

१ 'कदाचित्' इति कस्तिकासामुद्रितपुस्तके २ अस्याभिप्राय स्फुटं प्रकाश्यते—पुरोदर्शितायामायायां कति गुरवो लघवश्च पतन्त इति दृष्टे सति पूर्वं तावदायायां मात्रागणना विधेया तन्मात्रासंख्यापिण्डीभूताङ्काश्च कुट्टयन पद्यादौ संस्थाप्याः पुनश्चस्या एव सर्वेषामक्षराणां गणनां विधाय तदक्षरसंख्यापिण्डीभूताङ्का मात्रासंख्या पिण्डीभूताङ्कानां समुखे संस्थाप्या ततो मात्रासंख्यापिण्डीभूताङ्केभ्योऽक्षरसंख्या पिण्डीभूताङ्कानपनयेत्, तत्र ये शेषाङ्का अवशिष्यन्ते तावत्संख्याकास्तस्यामायायां गुरवो भवन्ति पुनरक्षरसंख्याङ्कत एतदवशिष्टगुरुसंख्याङ्कानपनयेत्, तत्र यावन्तोऽङ्का अवशिष्यन्ते तावन्तो लघवो ज्ञायन्ते अनयैव रीत्या गणमात्राच्छन्दसां गुरुलघुज्ञानं भवति तद्रीतिर्यथा—

मा॰ सं॰ ङः अ॰ सं॰ ङ गु॰ सं॰ ङः अ॰ सं॰ ङ गु॰ सं॰ ङ ल॰ स॰ ङः
" ५७ - ४० = १७ " " ४० - १७ = २३ "

३१. ३२. ३३. ३४. ३५–३६. ३७–३८. ३९–४० ४१–४२.

। – । – । । – ऽ – ऽ – ऽ – ऽ

च – र – ति वि – मु – क्ता – हा – रं

(२२) (२३) (२४). (२५) (२६). (२७). (२८). (२९).

४३ ४४ ४५. ४६. ४७ ४८ ४९–५०. ५१ ५२–५३ ५४–५५ ५६–५७. मात्राङ्काः ।

। – । – । – । । – । – ऽ । – ऽ – ऽ – ऽ

म्र – त – मि – व भ – व – तो रि – पु – स्त्री – णाम् ॥

(३०) (३१) (३२) (३३). (३४). (३५) (३६) (३७) (३८) (३९). (४०). अक्षराङ्काः ।

इति श्रीभट्टहलायुधविरचितायां पिङ्गलच्छन्दोवृत्तौ चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

वृत्तम् । ५ । १ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामस्तद् 'वृत्तम्' वेदितव्यम् । तेन प्राक्तनं लौकिकं छन्दोजातं 'जातिः' इत्युच्यते । इत उत्तरं च 'वृत्तम्' । तथा चोक्तम्—

'पद्यं चतुष्पदं तच्च वृत्तं जातिरिति द्विधा ।'

गायत्र्यादौ छन्दसि वर्तत इति 'वृत्तम्' । तच्च स्थिरगुरुलघ्वक्षरविन्यासमिष्यते । पादेन संयोगात् 'पद्यम्' । यथा आर्यादिच्छन्दस्यपि पादव्यवस्था नास्तीति पादौ संयुक्तौ, वृत्ते पुनः पृथग्भवत इत्यर्थः । पादेन सयोगाभावात् । तथा चोक्तम्—

'एकदेशस्थिता जातिर्वृत्तं गुरुलघुस्थितम्' इति ॥

सममर्धसमं विषमं च । ५ । २ ॥

समसर्वावयवत्वात् 'समम्' । यस्य चत्वारः पादा एकलक्षणयुक्तास्तत् 'समं' वृत्तम् । शेषं च संज्ञानुरूपमेव । तत्रार्धे समे यस्य तत् 'अर्धसमम्' सर्वावयवेभ्यः । अर्धाभ्यां च विगतं समं यस्य तद् 'विषमम्' । एवं त्रिप्रकारमपि वृत्तजातमुक्तम् ॥

समं तावत्कृत्वः कृतमर्धसमम् । ५ । ३ ॥

'समम्' इति समवृत्तसंख्योच्यते । तयैव गुणितं 'तावत्कृत्व कृतम्' उच्यते । एतदुक्तं भवति—समवृत्तसंख्यागुणिते समवृत्तसंख्यायाः पिण्डे या संख्या निष्पद्यते तावत्संख्यमर्धसमं वेदितव्यम् । तत्र गायत्रे छन्दसि समवृत्तसंख्या चतु.षष्टि(६४)रष्टमा-

---

१. 'पादयोः सयोगौ तयोर्विरहात्' इति लिखितपुस्तके. २. 'तथा' इति लि. पु. ३. 'पादसंयोगयोरभावात्' इति लि. पु ४. 'स्थिरम्' इति लि. पु. ५. 'तत्रार्धे समं' इति लि. पु. ६. 'अपि' इति लि. पु. नास्ति. ७. 'तावदङ्कगुणितं' इति लि. पु. ८. 'इति' इति लि पु. अधिकम्. ९. 'समवृत्तपिण्डे' इति लि. पु.

ष्यामश्चिदा । तस्यां चतुःषष्टि(६४)संख्यैागुणितायामधस्तनमूर्तसंख्या सपद्यते—चत्वारि सहस्राणि, षण्णवतिश्च शतानि । अहतोऽपि (६४×६४)=४०९६ ॥

विषम च । ५ । ४ ॥

अर्धसम तावत्कृत्वाऽनन्तरं 'विषम' भवति । एतदुक्तं भवति—अर्धसमशतसंख्या (४०९६) अर्धसमशतसंख्यया(४०९६) एव गुणिता विषमशतसंख्या सपद्यते—एका कोटिः सप्तषष्टिश्च सहस्राणि सप्तशतसप्तत्रिंशत्सहस्राणि, द्वे शते, षोडशोत्तरे । अहतोऽपि (४०९६×४०९६)=१६७७७२१६ इति ॥

समसमाधसमोपचितमधसर्मं विषम च यथाक्रम समोपचित समाधसमाभ्यां चोपचितं वेदितव्यम् ॥

राश्यूनम् । ५ । ५ ॥

सत् विषम मूल (१६७७७२१६) अर्धसम (४०९६) वा राश्यूनम् (१६७७७२१६ –४०९६=१६७७३१२०) कर्तव्यम्। मूलराशि (४०९६) समुदायात् (१६७७७२१६) अपनेतव्य इति । कोटिरेका, सप्तषष्टिसहस्राणि, त्रिशतसप्तत्रिंशत्सहस्राणि, विंशत्युत्तरं शतं शुद्धविषममूलस्य संख्या। अहतः १६७७३१२०। चत्वारि सहस्राणि, द्वात्रिंशच्चेति शुद्धार्धसमसंख्या । (४०९६–६४)=४०३२ समसंक्षेपोऽत्र राश्यूनमिति ॥

ग्लिति सैमानी । ५ । ६ ॥

गकार(ऽ)लकारा(।)भ्यां यद्वृत्त समाप्यते तत् 'समानी' नाम । 'पादस्यानुष्टुब्वत्' (पि० सू० ५।९) इत्यत सूत्रात् सिंहावलोकितन्यायेनानुष्टुब्ग्रहणमनुवर्तते । सेनाद्यक्षर पादो यावद्विगकारलकारै पूर्यते तावतामेव ग्रहणम् । तत्रोदाहरणम्—

६

ऽ–।–ऽ– । ऽ–।–ऽ–। ऽ–।–ऽ–।–ऽ । ऽ–।
सा–स–वो–ऽपि वि–ब–मे–ण य–स्स–मा–न–तां न या–ति ।

ऽ–। ऽ– । –ऽ–।–ऽ–। ऽ–। ऽ–। –ऽ । –ऽ–।
त–स्य व–ह–मे–ध–र–स्य के–म तु–ल्य–ता धि–मे–स ॥

---

१ 'चतुःषष्टिसंख्यायां' इति लि पु २ 'अर्धसमसंख्या निष्पद्यते' इति लि पु ३ 'अर्धसमराशिर्मूलराशे' इति लि पु ४ 'शतमेकमिति विषममूलस्य संख्या' इति लि पु ५ 'अहत' इति लि पु नास्ति ६ अहतोऽपि ' इत्यधिकं लि पु ७ ' हारगबबंधुरेण सिद्धमहुअक्खरेण । बारहाहि मत्त जाण मल्लिआ सुछंदमाण ॥ इति प्रा० पि० सू० २।७१ इत्यनुसारेण मल्लिकाख्य नामान्तरम् ८ समाप्येत' इति कलिकातामुद्रितपुस्तके

अपि च ।

s ।-s ।-s-।-s-। s-।-s-।-s-।-s-।
ओं[1]न-मो ज-ना-र्द-ना-य पा-प-स[1]-घ-मो-च-ना-य ।
s-।-s-।-s-।-s-। s-।-s-।-s-।-s-।
दु-ष्ट-दै-त्य-म-र्द-ना-य पु-ण्ड-री-क-लो-च-ना-य ॥

लिगति प्रमाणी[2] । ५ । ७ ॥

लकार(।)गकारा(s)भ्या यद्वृत्तं समाप्यते[3] तत् 'प्रमाणी' नाम । 'जरौ लगौ'[4] इत्यपरे तत्रोदाहरणम्—

।-s-।-s-।-s- ।-s ।-s-।-s ।-s-।-s
स-रो-ज-यो-नि-र-म्ब-रे र-सा-त-ले त-था-च्यु-तः ।
।-s ।-s-।-s-।-s ।-s ।-s-।-s
त-व प्र-मा-ण-मी-क्षि-तुं क्ष-मौ न तौ व-भू-व-तु ॥

वितानमन्यत् । ५ । ८ ॥

आभ्या समानी-प्रमाणीभ्यामन्यदष्टाक्षरपादं छन्दो 'वितानं'[5] नाम । तत्रोदाहरणम्[6]—

s-s ।-। s-s ।-। s-s ।-।-s s ।-।
तूँ[7]-ष्णा त्य-ज ध-र्मं भ-ज पा-पे हृ-द-यं मा कु-रु ।
s-s ।-। s-s-।-।-s s-।-।
इ-ष्टा य-दि ल-क्ष्मी-स्त-व शि-ष्टा-न-नि-शं सं-श्र-य ॥

द्वितीयं च—

।-।-s s-। ।-s-s ।-।-s-s-।-।-s-s
हृं[8]-द-यं य-स्य वि-शा-लं ग-ग-ना-भो-ग-स-मा-नम् ।
।-।-s-s ।-।-s-s ।-।-s-s-।-। ।-s-s
ल-भ-ते-ऽसौ म-णि-चि-त्रं नृ-प-ति-र्मू-र्ध्नि वि-ता-नम् ॥

अन्यच्च—

s-s-।-s-।-s-।-s s-s-।-s-।-s-।-s
[10]कं[9]-ङ्का-ल-मा-ल-भा-रि-णं कं-द-र्प-द-र्प-हा-रि-णम् ।

---

१ 'पापबन्धमोचनाय' इति लिखितपुस्तके. २ 'लहू गुरू णिरन्तरा **पमाणि** अट्ठ अक्खरा ।' इति प्रा० पि० सू० २।६९. 'द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा । तदा निवेदयन्ति ता बुधा **नगस्वरूपिणीम्** ॥' इति श्रुतबोधानुसारेण नगस्वरूपिणीत्यपि नामान्तरम् ३. 'समाप्येत' इति क. का. मु पु ४. 'नाराचम्' इति कलिकातामुद्रिते ५ छन्दोमञ्जरीकारा ६. 'अत्र' इति क. का. पुस्तके. ७.–९ प्राकृतपिङ्गलानुसारेणात्र दोहाभेदान्तर्गत**करभच्छन्द** ८ 'वाश्रय' इति लि. पुस्तके. १०. '**नाराचकं** तरौ लगौ' इति छन्द कौस्तुभानुसारेणात्र नाराचकं छन्द·.

ऽ- -।-ऽ-। -ऽ-।-ऽ - -।- ।-ऽ-।-ऽ
सं-सा-र-ष-ग्ध-मो-ष-न पन्दा-म-हे शि-वो-च-नम् ॥

अपि च—

-ऽ ।-ऽ-। ऽ- ।- ऽ-ऽ-।- -।- -।-ऽ
सं-स्या स्म-रा-मि गु-न्द-रं ष-न्दो-प-मा-न-मा-न-नम् ।
ऽ-ऽ-।- -।-ऽ-।-ऽ ऽ-ऽ-।-ऽ-।-ऽ-।-ऽ
क-द-प-चा-प-म-हु-र- भ्रू-वि-भ्र-मो-प-शो-भि-तम् ॥

[अपि च]—

ऽ-।-।- ।।-ऽ-ऽ ऽ-।-।-ऽ-।।- -
अं-न्य-द-सो हि वि-सा-न मे-त-प-टे-न य-दु-पम् ।
-ऽ-।-।-ऽ-। ।-ऽ ऽ-। ।-ऽ-।-।- -ऽ
चि-त्र-प-दा-पि च भौ गौ ते-म ग-ता-र्य-मि-यं-तत् ॥

किं च 'वितानमन्यत्' इति ब्रुवन् सूत्रकारो वितानस्यानेकप्रकारतां दर्शयति । अन्यथा 'वितानं भा गौ' इत्येव ब्रूयात् ॥

पादस्यानुष्टुब्वक्त्रम् । ५ । ९ ॥

'पादस्य' इत्ययमधिकार आसप्तमाध्यायपरिसमाप्ते[1] । 'अनुष्टुब्वक्त्रम्' इति च प्राक् प्रतिपादेचतुष्टयरूपा पदचतुरूप्यात् (प्यम्)' (पि० सू० ५।२०) अधिकृत वेदितव्यम् ॥

न प्रथमात्सौ । ५ । १० ॥

प्रतिषेधार्थमिद सूत्रम् । अत्र पक्षत्रातौ पादस्य प्रथमादर्क्षराद्यं सगण-(।।ऽ) नगणौ (।।।) न कर्तव्यौ ॥

द्वितीयचतुर्थयो रक्ष । ५ । ११ ॥

द्वितीयचतुर्थयोश्च पादयो प्रथमाद्यं रेफो (ऽ।ऽ) न कर्तव्य इत्युपदेशः ॥

वान्यत् । ५ । १२ ॥

अन्येषां पञ्चां गणानां मध्ये यत्किंचिद् गणान्तरं प्रथमान्तरं कर्तव्यम् ॥

१–२ 'चित्रपदा यदि भौ गौ' इति छन्दःकौस्तुभानुसारेणात्र चित्रपदाख्य छन्द अन्यदपीह' इति लि पु १ 'पिदभ्यात्' इति क का मु पुस्तके 'एव' इति लि पु नास्ति ४ समाप्ते इति क का मु पुस्तके ५ प्रतिपादचतुष्टरूपा' इति क का मु पुस्तके नास्ति ६ 'वर्णात्' इति क का मु पुस्तके ७ 'द्वितीयचतुर्थयोश्च' इति लि पु नास्ति ८ 'रेफोऽपि' इति क का मु पुस्तके ९ कलिकातामुद्रिते तु 'सगण (।।ऽ), नगणान्त्या(।।।) मन्यन्मगणा (ऽऽऽ) वित्रिकपट्टमध्ये यत्किंचिन्निकान्तरं वा कर्तव्यम् ॥'

यं चतुर्थात् । ५ । १३ ॥

'य' इति लुप्तविभक्तिको निर्देश. । पादस्य चतुर्थादक्षरादूर्ध्वं यगणः (।ऽऽ) प्रयोक्तव्यः । सर्वेषामुदाहरणानि—

ल० यगणः यगण ल० ल० यगणः यगण गु०

। — । ऽ ऽ — । ऽ ऽ — । — । — । ऽ ऽ — । ऽ · ऽ — ऽ

नँ(१)वधारा(४)म्बुसंसि–क्त– व(१)सुधाग(४)न्धिनि श्वा–सम् ।

गु० जगण यगण गु० ल० तगणः यगण गु०

ऽ — । ऽ । — । ऽ ऽ — ऽ । — ऽ ऽ । — । ऽ ऽ — ऽ

कि(१)चिदुन्न(४)तघोणा–प्रं म(१)ही काम(४)यते व–क्रम् ॥

अन्यैरप्युक्तम्—

गु० भगण यगणः ल० ल० भगण यगण गु०

ऽ — ऽ । । — । ऽ ऽ — । । — ऽ ऽ ऽ — । ऽ ऽ — ऽ

नी(१)लोत्पल(४)वनेष्व–ध च(१)रन्त्यश्वा(४)रुसंरा–वा ।

गु० मगणः यगणः गु० ल० मगणः यगण गु०

ऽ — ऽ ऽ ऽ — । ऽ ऽ — । — ऽ ऽ ऽ — । ऽ ऽ — ऽ

रा(१)मा. कौशे(२)यसंवी –ता प्र(१)नृत्यैन्ती-च(४) काद–म्बा ॥

तथा—

गु० रगणः यगणः गु० गु० भगण यगणः गु०

ऽ — ऽ । ऽ — । ऽ ऽ — ऽ ऽ — ऽ । । — । ऽ ऽ — ऽ

दुर्(१)भाषिते(४)ऽपि सौभा–ग्यं प्रा(१)य प्रकु(४)रुते प्री–तिः ।

गु० रगणः यगणः ल० गु० मगणः यगण गु०

ऽ — ऽ । ऽ — । ऽ ऽ — । — ऽ ऽ ऽ — । ऽ ऽ — ऽ

मा(१)तुर्मनो(४)हरन्त्ये –व दौ(१)र्लालित्यो(४)क्तिभिर्बा–ला. ॥

इत्यादि ॥

---

१ 'अन्धेर्योऽनुष्टुभि ख्यातम्' इति प्रा० पि० सू० २।३३२. २. 'यकार. इति क. का. मु. पुस्तके. ३. 'उदाहरणम्' इति क. का पुस्तके. ४. पि० सू० ५।१० सूत्रस्योदाहरणम्. ५. 'वंसुधागन्ध' इति लि. पुस्तके. ६. पि० सू० ५।१३ इत्यस्योदाहरणम् १४. 'प्रनृत्यन्तश्च' इति क. मु पुस्तके. ८. पि० सू० ५।१९ इत्यस्योदाहरणम्. 'दुर्भाविते' इति लि. पुस्तके ।

पंथ्या युजो ज् । ५ । १४ ॥

'चतुर्थात्' (पि० सू० ५।१३) इति वर्तते । अत्र पदे युज (२,४) पादस्य चतुर्था दक्षरादूर्ध्वं जगणः (।ऽ।) प्रयुज्यते, तदुक्त 'पथ्या' नाम । 'य' (।ऽऽ) स्यापवादः । अत्रोदाहरणम्—

गु	तगण	यगण	ह	गु	मगण	यगण	ह
८ —	४ ४ । —	। ४ ४ —	।	८ —	४ ४ ४ —	। ८ । —	।

नि(१)त्य भीति(४)निपण्ण-स्य रा(१)ज्ञो राष्ट्र(४)न सीद-ति ।

ह	भगण	यगण	गु	गु	मगण	जगण	गु
। —	। ४ ४ —	। ४ ८ —	८	४ —	८ ४ ४ —	। ८ । —	४

न(१)हि पथ्या(४)धिनः का-ये जा(१)यन्ते व्या(४)धिवेद ना ॥

विपरीतैकीयम् । ५ । १५ ॥

ऐकठक्षणाद्विपरीता 'पथ्या' भवतीत्येक्षीयं मतम् अयुक्पादे चतुर्थादक्षरात् परतो अकारः कर्तव्य, युक्पादे य एवावतिष्ठते । अत्रोदाहरणम्—

गु	भगण	यगण	गु	गु	मगण	यगण	गु
४ —	। ४ ४ —	। ४ । —	८	४ —	४ ८ ४ —	। ४ ४ —	४

म(१)न्दराज्ञा(४)नुवर्ति- नी या(१)श्री स्यात्सा(४) गेहे ल-क्ष्मीः ।

गु	भगण	जगण	गु	ह	यगण	यगण	गु
४ —	। ४ ४ —	। ४ । —	४	। —	। ४ —	। ४ —	४

स्व(१)प्रभुत्वा(४)भिमानि-नी वि(१)परीत्वा(४)परिख्या ज्या ॥

चंपलायुजो न् । ५ । १६ ॥


अयुक् (१,३) पादस्य यदा चतुर्थादक्षरात्परं नकारो (।।।) भवति, युक्-(२,४) पादे य (।ऽऽ) एवावतिष्ठते तदा, चपला' नाम सानुष्टुभ्[8]। तत्रोदाहरणम्—

गु	भगण	नगण	गु	गु	भगण	यगण	गु
४ —	। ४ ४ —	। । । —	४	४ —	। ८ ४ —	। ४ ४ —	४

क्षी(१)यमाणा(४)मदय-ना य(१)केनिर्मा(४)यनासा-मा ।

---

१ युजोश्चतुर्थतो येन पथ्याषक्क प्रकीर्तितम् इति प्रा पि० सू० २।३१४ पथ्यायुजो ज' इति ङि पुस्तके. २ अकार' इति क पुस्तके ३ 'ओजमोर्जेन यादिषेस्वदेव विपरीतादि' इति छन्द कौस्तुभे ४ कलिकातामुद्रिते तु—'ऐकठक्ष णाद्विपरीतलक्षणा एक्षीयमते 'पथ्या' भवति । यथा— ५ स्थिरा' इति क पुस्तके ६ 'चपलाषक्कमयुजोर्नकारश्चेत्पयोराद्योः' इति छन्द कौस्तुभे ७ 'अक्षरात्' इति क पुस्तके नास्ति ८ 'अनुष्टुब्वक्त्रम् इति क पुस्तके ९ षक्क' इति क पुस्तके, ङि पुस्तके च



क(१)न्यका वा(४)क्यचप–ला ल(१)भंते धू(४)र्तसौभा–ग्यम् ॥


विपुला युग्मः सप्तमः । ५ । १७ ॥

अधिकारोऽयम् । 'य चतुर्थात्' (पि० सू० ५।१३) इत्यनेन सर्वत्र यकारे (।ऽऽ) कृते यदा युक् (२,४) पादे सप्तमो वर्णो लघुर्भवति, तदा 'विपुला' नामें सानुष्टुब् ॥


ननु पथ्यालक्षणेऽन्तर्भूतत्वात् पुनरुक्तमेतत् । नैवम्, विपुलावर्गस्येदानीमारभ्यमाणत्वात्तद्विनानुपपत्ते । युक् (२,४) पादे सप्तमेन लघुनावश्यमेव भवितव्यम् । प्रथमतृतीययोश्चैतावता यकारस्यापवादः । तथा च वक्ष्यति—'सँर्वत सैतवस्य' (पि० सू० ५।१८) इत्यादिना । पथ्यायां तु यकार (।ऽऽ) एवावतिष्ठते ॥

सर्वतः सैतवस्य । ५ । १८ ॥

सैतवस्याचार्यस्य मतेन युक्(२,४)पादे अयुक्(१,३) पादे च सप्तमो लकार(।)एवं कर्तव्य. । अत्रोदाहरणम्—



सै(१)तवेन(४)पथार्ण(७)वं ती(१)र्णो दश(४)रथात्म(७)जः ।



र(१)क्ष क्षय(४)करीं पु(७)न· प्र(१)तिज्ञा स्वे(४)न बाहु(७)ना ॥

भौ न्तौ च । ५ । १९ ॥

'सर्वत. सैतवस्य' (पि० सू० ५।१८) इति निवृत्तम् । 'चपलायुजो न्' (पि० सू० ५।१६) इत्येतस्मादिह[11]युग्ग्रहणमनुवर्तते । 'विपुला युग्ल. सप्तम.' (पि० सू० ५।१७) इति सर्वमेवानुवर्तनीयम्[12] । अयुक् (१,३) पादे यदा[13] चतुर्थादक्षरात्परतो यकारं (।ऽऽ) बाधित्वा


---


१ 'भवते' इति क पुस्तके. २. 'यस्या तसप्तमो युग्मे सा **युग्मविपुला**' इति छन्द कौस्तुभे युग्मविपुलेति नामान्तरम्. ३. 'प्राप्ते' इति क. पुस्तके. ४. 'सानुष्टुब्' इति क. पुस्तके नास्ति. ५. 'लक्षणान्तर्भूतत्वात्' इति क पुस्तके. ६. 'वदति' इति लि. पुस्तके. ७ लिखितपुस्तके सूत्रमत्रैतन्नास्ति. ८. 'सैतवस्याखिलेष्वपि' इति छन्द कौस्तुभे. ९. 'एव' इति नास्ति लि. पुस्तके. १०. 'तत्र' इति क. पुस्तके. ११. 'इत्यस्मात्' क. पुस्तके. १२. 'अनुवर्तते' इति क. पुस्तके. १३. 'तदा' इति लि. पुस्तके.

मकार (ऽ।।) रेफ (ऽ।ऽ) नकार (।।।) तकारा (ऽऽ।) विकल्पेन भवन्ति, तदासौ 'विपुला' नाम। तत्र मकारेण विपुलोदाहरणम्—



'अयुजि' (पि० सू० ५।१६) इति जातिपक्षे द्वयोरपि पादयोर्ग्रहणम्। समक्षिपक्षे पुनरेकस्य। एकपक्षे पुनः प्रथमस्य तृतीयस्य वा। तथा च महाकवीनां प्रयोगाः—





इत्यादि ॥

---

१ 'भेनाऽम्बितो माद्विपुला' इति छन्द कौस्तुभे २ 'दण्डधारी महीपति'
। क. पुस्तके.

इदानीं रेफ[1](ऽ।ऽ)विपुलोदाहरणम्—

गु० रगण रगण गु० ल० भगणः जगण गु०
ऽ—ऽ।ऽ—ऽ।ऽ—ऽ ।—ऽ।।—।ऽ।—ऽ
ल(१)क्ष्मीपतिं(४)लोकना(७)थं र(१)थाङ्गध(४)रमच्यु(७)तम् ।
गु० रगण रगण गु० ल० जगणः जगण गु०
ऽ—ऽ।ऽ—ऽ।ऽ—ऽ ।—।ऽ।—।ऽ।—ऽ
य(१)ज्ञेश्वरं(४)शार्ङ्गपा(७)णिं प्र(१)णमामि(४)त्रयीत(७)नुम् ॥

व्यक्तिपक्षे प्रथमे[3] पादे—

ल० रगण रगणः गु० गु० मगण जगण गु०
।—ऽ।ऽ—ऽ।ऽ—ऽ ऽ—ऽऽऽ—।ऽ।—ऽ
म(१)हाकविं(४)कालिन्दा(७)सं व(१)न्दे वाग्दे(४)वतां गु(७)रुम् ।
गु० मगण यगण ल० गु० जगण जगणः गु०
ऽ—ऽऽऽ—।ऽऽ—। ऽ—।ऽ।—।ऽ।—ऽ
य(१)ज्ज्ञाने वि(४)श्वमाभा(७)ति द(१)र्पणे प्र(४)तिबिम्ब(७)वत् ॥

तृतीये[4] पादे—

गु० जगण सगण गु० गु० तगणः जगणः गु०
ऽ—।ऽऽ—।।ऽ—ऽ ऽ—ऽऽ।—।ऽ।—ऽ
का(१)मिनीभिः(४)सह प्री(७)तिः क(१)स्मै नाम (४)न रोच(७)ते ।
ल० यगण रगण ल० गु० जगण जगण गु०
।—।ऽऽ—ऽ।ऽ—। ऽ—।ऽ।—।ऽ।—ऽ
य(१)दि न स्या(४)द्वारिवी(७)चि – च(१)ञ्चलं ह(४)तजीवि(७)तम् ॥


इदानीं नकार[5](।।।)विपुलोदाहरणम्—

गु० रगण नगणः गु० गु० यगणः जगण गु०
ऽ—ऽ।ऽ—।।।—ऽ ।—।ऽऽ—।ऽ।—ऽ
य(१)स्या विभा(४)ति विपु(७)ला म(१)न्मथस्था(४)नपिण्डि(७)का ।
गु० यगण नगण गु० गु० तगणः जगणः गु०
ऽ—।ऽऽ—।।।—ऽ ऽ—ऽऽ।—।ऽ।—ऽ
या(१)चतु ष(४)ष्टिचतु(७)रा सा(१)स्त्री स्यान्नृ(४)पवल्ल(७)भा ॥


---

१. 'इत्थमन्या रश्चतुर्थात्' इति छ कौ०. २. 'ईश्वरम्' इति क. पुस्तके. ३. 'प्रथमे पादे' इति लिखितपुस्तके नास्ति. 'वाग्देवतागुरुं' इति क. मु पु ४ 'तृतीयपादे' इति लि पुस्तके. ५. 'कस्य' इति लि. पुस्तके ६. 'नोऽम्बुधेश्चेन्नविपुला' इति छन्द कौस्तुभकारः. ७. 'कृतवल्लभा' इति लि. पुस्तके.


तथैव भारवि —




व्यक्तिपक्षे कालिदास —



तथा च—




इदानीं सकार(ऽऽ।) मिपुलोदाहरणम्—



इति जातिपक्षे ।

व्यक्तिपक्षे—



१–३–४ नकारविपुलोदाहरणानि २ 'वसते' इति किरातार्जुनीये ५ 'शङ्करं शरेखाधिवाननम्' इति शिशुपालवधे ६ 'इति जातिपक्षे' इति क पुस्तके नास्ति

ल० मगणः यगणः ल० गु० तगणः जगणः गु०

। — ऽ ऽ ऽ — । ऽ ऽ — । ऽ — ऽ ऽ । — । ऽ । — ऽ

दि(१)वा दीपा(४)इवाभा(७)न्ति य(१)स्याग्रे क(४)वयोऽप(७)रे ॥

तथान्येषामपि प्रयोगाः[1]—

गु० जगणः यगणः गु० गु० यगण जगण गु०

ऽ — । ऽ । — । ऽ ऽ — ऽ ऽ — । ऽ ऽ — । ऽ । — ऽ

लो(१)कवत्प्र(४)तिपत्त(७)व्यो लौ(१)किकोऽर्थ (४)परीक्ष(७)कैः ।

गु० मगणः तगण. ल० ल० यगण जगणः गु०

ऽ — ऽ । । — ऽ ऽ । — । ऽ ऽ — । । ऽ । — ऽ ऽ

लो(१)कव्यव(४)हारं प्र(७)ति स(१)दृशौ वा(४)लपण्डि(७)तौ ॥

इदानीं चकाराकृष्टं मैकार(ऽऽऽ)विपुलोदाहरणम्[2]—

गु० मगणः मगणः गु० गु० यगण. जगण. गु०

ऽ — ऽ । । — ऽ · ऽ ऽ — ऽ ऽ — । ऽ ऽ — । ऽ । — ऽ

स(१)र्वातिरि(४)क्तं लाव(७)ण्यं बि(१)भ्रती चा(४)रुविभ्र(७)मा ।

गु० रगणः मगणः ल० गु० मगणः जगणः गु०

ऽ — ऽ । ऽ — ऽ ऽ ऽ — । ऽ — ऽ ऽ ऽ — । ऽ । — ऽ

स्त्री(१)लोकस्रु(४)ष्टिस्त्वन्यै(७)व नि·(१)सामान्य(४)स्य वेध(७)सः ॥

व्यक्तिपक्षे श्रीकालिदास.—

ल० रगण. मगणः गु० ल० यगण. जगणः गु०

। — ऽ । ऽ — ऽ · ऽ · ऽ — ऽ । — । ऽ ऽ — । ऽ · । — ऽ

म(१)नोभिरा(४)मा. शृण्व(७)न्तौ र(१)थनेमि(४)स्वनोन्मु(७)खैः ।

गु० यगण यगण गु० ल० मगणः जगणः गु०

ऽ — । ऽ ऽ — । · ऽ ऽ — ऽ । — ऽ · ऽ · ऽ — । · ऽ · । — ऽ

ष(१)ड्जसंवा(४)दिनी. के(७)का द्वि(१)धाभिन्ना.(४)शिखण्डि(७)भिः ॥

ल० रगण मगण गु० गु० तगणः जगण गु०

। — ऽ · । ऽ — ऽ · ऽ ऽ — ऽ ऽ — ऽ ऽ । — । ऽ । — ऽ

अ(१)थ प्रदो(४)षे दोष(७)ज्ञः सं(१)वेशाय(४)विशांप(७)तिम् ।

गु० तगणः यगणः गु० ल० यगणः जगण गु०


ऽ — ऽ ऽ · । — । ऽ ऽ — ऽ । — । ऽ ऽ — । ऽ । — ऽ


सू(१)नुः सून्(४)तवाक्स(७)ष्टु – र्वि(१)ससर्जो(४)र्जितश्रि(७)यम् ॥


---


१. 'प्रयोगा' इति लि. पुस्तके. २. एते विपुलाभेदाश्छन्द कौस्तुभादौ नोपलभ्यन्ते.

तृतीयेपादे—












सैकारेणा(।।S)पि क्वचिद्विपुला दृश्यते । यथा—





[1]सङ्कीर्णाद्य विपुलाप्रकारा दृश्यन्ते । तथा च मारविलोकम्—





---

१ 'तृतीये पादे' इति लि पुस्तके अनन्यजानेर्मेसासीत्' इति लि पुस्तके. अनन्यजानेः सैवासीद् यस्माज्जाया' इति मुद्रिते रघुवंशे २ —१ 'यकारेण' इति लि स्तके एते विपुलाभेदास्छन्दःकौस्तुभादौ नोपलभ्यन्ते ४ 'च' इति लि पुस्तके ५ 'मृसेनापि सुराज्ञना ' इति लि पुस्तके ६ भेदा इति लि पुस्तके ७ 'कृत्स्नम्' ति क पु

इत्यादयो विपुलाविकल्पा संकीर्णाश्च कोटिशः[1] काव्येषु दृश्यन्ते । सर्वासां विपुलानां चतुर्थो[2] वर्ण प्रायेण गुरुर्भवतीत्याम्नाय. ॥

अत[3] परं विषमवृत्तान्याह—

प्रतिपादं चतुर्वृद्ध्या पद[4]चतुरूर्ध्वम् । ५ । २० ॥

चतुर्णामक्षराणा वृद्धिश्चतुर्वृद्धि । अनुष्टुभ पादादूर्ध्वं प्रतिपादं चतुरक्षरवृद्ध्या यद्वृत्तं निष्पद्यते[5] तत् 'पदचतुरूर्ध्वं' नाम । तत्रोदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८.
तं[6] स्या क टा क्ष वि क्षे पै

१ २. ३ ४ ५ ६ ७ ८ ९ १० ११ १२
क म्पि त त नु[8] कु टि लै र ति दी र्घै ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६.
त क्ष क द ष्ट इ वे न्द्रि य शू न्य क्ष त चै त न्य

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०.
प द च तु रू र्ध्वं न च ल ति पु रु ष प त ति स ह सै व॥

अत्र गुरुलघुविभागो नेष्यते ॥

गावन्त[9]आपीडः । ५ । २१ ॥

र्गकारौ(ऽऽ) द्वावन्ते चेद्भवतश्चतुर्णामपि पादाना तत् पदचतुरूर्ध्वं 'आपीड'संज्ञकं भवति । अन्ते गुरुद्वयग्रहणादत्र शेषाणा लघुत्वमभ्यनुज्ञातं सूत्रकारेणेति मन्यामहे । तत्रोदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८
। — । — । — । — । — । — ऽ — ऽ
कु सु मि त स ह का रे

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२
। — । — । — । — । — । — । — । — ऽ — ऽ
हं[10] त हि म म हि म शु चि श शा ङ्के ।

---

१. 'अनुकोटिश' इति क पुस्तके २ 'चतुर्थ' इति लि. पु नास्ति. ३. एषावतरणिका क पुस्तके नास्ति ४. 'आद्य पादोऽष्टभिर्वर्णैस्ततोऽन्ये चतुरक्षरैः क्रमाद्वृद्धा. । पादा यस्य द्वितीयाद्या षट्पञ्चाशद्वर्णा यत्र तदिह विबुधजनैरुक्तं **पदचतुरूर्ध्वं** नाम वृत्तम् ॥' इति छन्द कौस्तुभकार . ५ 'यस्या.' इति लि पुस्तके. ६. 'क्षयिततनु' इति लि. पुस्तके ७. '**आपीड** इदमेवान्त्यौ वर्णौ चेद्गौ' इति छन्दःकौस्तुभकार ८ 'चतुर्णामपि पादानामन्ते द्वौ गकारौ भवत.' इति लि. पुस्तके. ९. 'आपीडसज्ञं' इति लि. पुस्तके. १०. 'हित' इति लि. पुस्तके.

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
।–।–।–।–।–।–।–।–।–।–।–।–।–।–ऽ–ऽ
वि क सि त क म ल स र सि म धु स म ये ऽस्मिन्

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०
।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–ऽ
प्र व स सि प यि क ह त क म दि म ष ति त व षि प सि ॥

गावादौ चेत्प्रत्यापीडः । ५ । २२ ॥

गकारो(ऽऽ) द्वावेवादौ चेद्भवतश्चतुर्णामपि पादानां तदा तत् पदचतुरूर्ध्वं 'प्रत्यापीड'-संज्ञं भवति । अत्रापि पूर्ववच्छेषाणां लघुत्वमेव । तत्रोदाहरणम्—

१ २ ३ ४ ५ ६ ७
ऽ – ।–।–।–।–।–
वि त्त म म र म य ति

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२
ऽ – ऽ – ।–।–।–।–।–।–।–।–।–।–
का न्त व न मि द मु प गि रि न दि।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
ऽ – ऽ – ।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–
कू ज न्म धु क र के ल र व ह त ज न धु ति

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०
ऽ – ऽ – ।–
पुं स्के कि ल मु ख रि त मु र मि कु मु म चि त त रु त ति॥

प्रत्यापीडो गावादौ च । ५ । २३ ॥

चकारोऽन्त इति समुच्चयार्थः । तस्यैव पदचतुरूर्ध्वंसान्ते आदौ च यदि गकारौ(ऽऽ) भवतस्तदा 'प्रत्यापीड' एव भवति । तत्रोदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८
ऽ – ऽ – ।–।–।–।–ऽ–ऽ
का न्ता व द न स रो ज

---

१ अय भेदश्छन्द कौस्तुभ-रत्नाकरादिषु नोपलभ्यते २ 'द्वौ पादादौ इति लि पुस्तके ३–४ अपि' इति लि पुस्तके नास्ति ५. कुलकलरवझङ्कृतयति इति लि पुस्तके ६ अय भेदश्छन्द कौस्तुभ–रत्नाकरादिषु नोपलभ्यते ७ 'तदापि' इति लि पुस्तके ८ एव' इति लि पुस्तके नास्ति ९ तस्य' इति लि पुस्तके

१ २ ३ ४ ५ ६ ७ ८ ९ १०. ११ १२
ऽ–ऽ–।–।–।–।–।–।–।–।–ऽ–ऽ
ह्रं घं न सु र भि म धु र सा द्ध्यम्।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
ऽ–ऽ–।–।–।–।–।–।–।–।–।–।–।–ऽ–ऽ
पा तुं र ह सि स त त म भि ल प ति म नो मे
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०.
ऽ–ऽ–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–ऽ–ऽ
किं चि न्मु कु लि त न य न म ति तं र म णि त र म णी यम्॥

तदेवं द्विप्रकार प्रत्यापीडो भवति ॥

प्रथमस्य विपर्यासे मञ्जरीलवल्यमृतधाराः[3]। ५। २४ ॥

आपीडग्रहणं निवृत्तम्। तेनैव समं लघ्वक्षराभ्यनुज्ञानं च। तदेव पदचतुरूर्ध्वं प्रथमस्य[4] विपर्यासे मञ्जरी-लवली-अमृतधाराभिधानं भवति। प्रथमस्य[5] पादस्य द्वितीयेन[6] विपर्यासे 'मञ्जरी'। प्रथमस्य तृतीयेन विपर्यासे 'लवली'। प्रथमस्य चतुर्थेन विपर्यासे 'अमृतधारा' ॥

तत्र मञ्जर्युदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२
ज न य ति म ह तीं प्री तिं ह द ये
१ २ ३ ४ ५ ६ ७ ८
का मि ना चू त म ञ्ज री।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२. १३ १४ १५. १६.
मि ल द लि च क्र च ञ्चु प रि चु म्बि त के स रा
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६. १७ १८ १९. २०.
को म ल म ल य वा त प रि न र्ति त त रु शि ख रँ स्थि ता ॥

लवल्युदाहरणम्—

१. २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४. १५ १६.
वि र ह वि धु र हू ण का ङ्क ना क पो लो प मं
१ २ ३. ४ ५. ६ ७ ८ ९. १० ११. १२
र्प रि ण ति ध र पी त पा ण्डु च्छ वि।

---

१. 'अविरत' इति क पुस्तके. २. '**कलिका**' इति नामान्तर छन्द कौस्तुभवृत्तरत्नाकरादौ ३. 'अथादिना। क्रमात्पादेन चेत्पादा द्वितीयाद्यास्त्रयस्तदा। **कलिका लवली** प्रोक्तामृतधारा च सूरिभि ॥' इति छन्द कौस्तुभकार. ४. 'तत्पदचतुरूर्ध्वं' इति लि. पुस्तके ५. 'प्रथमस्य–भवति' इति लि पुस्तके नास्ति. ६. 'प्रथमस्य द्वितीयस्य' इति लि पुस्तके ७. 'शिरसि' इति लि पुस्तके. ८. 'कपोलावदातपरिणति अल्पपीतपाण्डुच्छवि' इति लि पुस्तके.

१ १ १ ॥ ५ (० ८
स य सी फ स नि दा पे

१ २ २ ॥ ५ (० ८ ९ १ ११ १२ ११ ११ १५ १(१७ १८ १९ २
भे य ति ज ग ति हि म क र शी त ल म ति सा दृ ष्ण ह रम् ॥

अमृतधारोदाहरणम्—

१ २ १ ॥ ५ (० ८ ९ १ ११ १२ ११ ११ १५ १(१७ १८ १९ २
प रि या ब्ज सि क र्ण र सा य मं स स त म गृ त धा रा मि

१ २ १ ॥ ५ (० ८ ९ १ ११ १२
य हि दि वा प र मा न न्द र सम् ।

१ २ १ ॥ ५ (० ८ ९ १ ११ १२ ११ ११ १५ १(
चे त सा पु ष र ती ष र पा णी म गृ ह्य म यीं

१ २ १ ॥ ५ (७ ८
त त्र ब्य गु ण मू प णम् ॥

केचिदापीडादिष्वपि पादविषयासे सति मञ्जयादिनामानीच्छन्ति ॥

इति पदचतुरूप्याधिकार ।

उद्वृतामेकत' सजौ सलौ, नसौ जगौ, भनौ जलौ ग्, सजौ सजौ ग् । ५ । २५ ॥

'पाद–' (पि॰सू॰५।९) इति प्रकृतमनुवर्तते । यत्र प्रथमे पादे सकार(।।ऽ)मकार(ऽऽऽ)सकार(।।ऽ)र(।)कारैर्दशाक्षराणि भवन्ति, द्वितीये पादे नकार(।।।)सकार(।।ऽ)-जकार(।ऽ।)ग(ऽ)कारैर्दश एव तृतीये पादे भकार(ऽ।।)नकार(।।।)मकार(ऽऽ।)सकार(।)-ग(ऽ)कारैरेकादश एव चतुर्थे पादे सकार(।।ऽ)नकार(।ऽ।)सकार(।।ऽ)मकार(ऽऽ।)ग(ऽ)कारैस्त्रयोदश एवं, सदृत्तम् 'उद्वृता' नाम । तत्रादाहरणम्—

सजौ सजौ गुरुश्च
। । ऽ—। । —। । । ।
मृ–ग–लो–च–ना स–धि–मु–खी च
(१)-(२)-(३)-(४)-(५)-(६)-(७)-(८) (९)-(१०)

---

१ जयति हिमशीतल खण्डवत्स्वादु तृष्णाप(ह)रं सुन्दरम्' इति लि पुस्तके २ 'यदि इति लि पुस्तके ३ 'प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यनन्तरे । यदय भनजलगा स्युरथो सजसा जगौ प्रमदवतीयमुद्वृता ॥, 'प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यमन्तरे । यदय च भनभगाः स्युरथो सजसा जगौ भवतीयमुद्वृता ॥ इति प्रा॰ पि॰ सू॰ २।१२४, १२२ एव च प्राकृतपिङ्गले लक्षणद्वयमुक्तमुद्वृतायाः ४ 'एव' इति लि पुस्तके नास्ति

नगण सगणः जगणः गु०

। । ।—। ऽ । ऽ । ऽ ।—ऽ

रु–चि–र–द–श–ना नि–त–म्बि–नी ।

(१) (२) (३) (४) (५) (६) (७) (८) (९) (१०)

भगण नगण जगण ल० गु०

ऽ । ।— । । ।— । ऽ ।— ।—ऽ

हं–स–ल—लि–त–ग—म–ना ल—ल–ना

(१) (२) (३) (४) (५) (६) (७) (८) (९) (१०) (११)

सगण जगण सगणः जगण गु०

। । ऽ—। ऽ । —। ऽ ।—ऽ

प–रि–णी—य–ते य—दि भ–वे—त्कु–लो–द्भ—ता ॥

(१) (२) (३) (४) (५) (६) (७) (८) (९) (१०) (११) (१२) (१३)

यत्र सूत्रे गकारो(ऽ) लकारो(।) वा श्रूयते, तत्र तेनैव वृत्तस्य पाद परिसमाप्यते 'उद्भताम्' इति कर्मविभक्तिश्रवणात् पठेदित्यध्याहार्यम् । 'एकत ' इति प्रथमं पा द्वितीयेन सहाविलम्बेन पठेदित्यर्थ । 'उपस्थितप्रचुपितं पृथगाद्यम्'(पि०सू०५।२८ इत्यतः ।सिंहावलोकितन्यायेन 'आद्य'ग्रहणमनुवर्तनीयम् । तेनाद्यमेव पादमेकत पठेत् । 'एकत.' इति ल्यब्लोपे पञ्चमी ॥

तृतीयस्य सौरभकं रनौ भ्गौ । ५ । २६ ॥

'तृतीयस्य' इति ग्रहणात्तस्या उद्भताया एवान्ये त्रयः पादा गृह्यन्ते । तृतीयपादे व विशेष । तृतीये पादे रेफ(ऽ।ऽ)नकार(।।।)भकार(ऽ।।)ग(ऽ)कारैर्दशाक्षराणि भवन्ति तत् 'सौरभकं' नाम । तन्नोदाहरणम्—

सगण जगण सगण ल० नगण सगण जगण गु०

। । ऽ—। ऽ । । । ऽ—। । । ऽ—। ऽ । —ऽ

वि–नि–वा–रि–तोऽपि न–य–ने– न त–द–पि कि–मि–हा–ग–तो भ–वान् ।

(१) (२) (३) (४) (५) (६) (७) (८) (९) (१०) (१) (२) (३) (४) (५) (६) (७) (८) (९) (१०)

रगण नगण भगण गु० सगण जगण सगण जगण गु०

ऽ । ऽ—। । । ऽ । । ऽ । । ऽ—। ऽ । —। । ऽ—। ऽ । —ऽ

ए–त–दे–व त–व सौ–र–भ–कं य–दु–दी–रि–ता–र्थ–म–पि ना–व–बु–ध्य–ते ।


(१)(२)(३)(४)(५)(६)(७) (८)(९)(१०) (१) (२) ( ) (४) (५) (६) (७) (८)(९)(१०)(११)(१२)(१३)

---

१ 'त्रयमुद्भतासदृशमेव पदमिह तृतीयमन्यथा । जायते रनभगैर्ग्रथितं कथयन्ति सौरभकमेतदीदृशम् ॥' इति प्रा० पि० सू० २।३२७. २. 'एव' इति लि पुस्तके नास्ति ३ 'उद्भताया यदा तृतीयपादे रगणनगणभगण [।], इत्येते भवन्ति तदा 'सौरभकं' नाम' इति लि. पुस्तके.

ललित नौ सौ । ५ । २७ ॥

तस्या एव उद्गतायास्तृतीयपादस्थाने यदा नौ(।। ।।)सौ(।ऽ।ऽ) भवतस्तदा 'ललितं' नाम वृत्तम्। तत्रोदाहरणम्—



उपस्थितप्रचुपित पृथगाद्य म्सौ ज्मौ गौ, स्नौ ज्रौ ग्, नौ स्, नौ न् ज्यौ । ५ । २८ ॥

यत्र प्रथमे पादे मकार(ऽऽऽ)सकार(।।ऽ)जकार(।ऽ।)भकारा(ऽ।।) गकारौ (ऽऽ) च भवत , द्वितीये पादे सकार(।।ऽ)नकार(।।।)जकार(।ऽ।)रेफा(ऽ।ऽ) गकार(ऽ)श्च, तृतीये नकारौ(।।। ।।।)सकार(।।ऽ)श्च, चतुर्थे त्रयो नकारा(।।। ।।। ।।।) जकार(।ऽ।)यकारौ(।ऽऽ) च तत् 'उपस्थितप्रचुपित' नाम वृत्त भवति । तत्रोदाहरणम्—

---

१ नयुग सकारयुगल च भवति चरणे तृतीयके । तदुदीरितमुपमतिभि र्ललित यदि शेषमस्य सकल यशोदृशा ॥' इति प्रा॰ पि॰ सू॰ २।३२९

२ तस्यैवोद्गतातृतीयपादस्य स्थाने यदा नौ सौ भवतस्तदा ललित नाम छन्द' इति लि पुस्तके ३ 'उदारं इति लि पुस्तके ४ 'गुणोत्तरं' इति लि पुस्तके

५. म्सौ ज्मौ गौ प्रथमाङ्घ्रिरीर्ष्यते खलु यस्मिन्मितय सनजरगास्त्रया मनौ स । अथ ननननुतजय प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥ इति छन्द'कौस्तुभकार

६ यत्र प्रथमे पादे मगण्यसगण्यजगणमगण [।] गकारौ च भवत , द्वितीये पादे सगणनगणजगण्य[र] गण [।] न (ग)कारश्च तृतीये नगणौ सगणश्च, चतुर्थे त्रयो नगण्या जगणयगणौ च तदुपस्थितप्रचुपित नाम वृत्त भवति' इति लि पुस्तके

७ 'पादे' इति क पुस्तके नास्ति

मगण सगणः जगणः भगणः गु० गु०

ऽ ऽ ऽ — । । ऽ — । ऽ । — ऽ । । — ऽ — ऽ

रा–मा का—म–क–रे—णु–का मृ—गा–य– त—ने—त्रा

(१) (२) (३) (४)(५)(६) (७)(८) (९) (१०)(११)(१२) (१३) (१४)

सगण नगणः जगणः रगण- गु•

। । ऽ । । । । ऽ । — ऽ । ऽ — ऽ

हृ–द–यं ह–र–ति प–यो–ध—रा– व– न—म्रा ।

(१)(२)(३) (४)(५)(६) (७)(८)(९) (१०)(११)(१२)(१३)

नगण नगण सगणः

। । । — । । । — । । ऽ

इ–य–म—ति–श–य—सु–भ–गा

(१)(२)(३) (४)(५) (६) (७)(८)(९)

नगणः नगण नगण जगण यगण

। । । — । । । — । । । — । ऽ । — । • ऽ ऽ

व–हु–वि—ध–नि–धु—व–न–कु—श–ला ल —लि ता ङ्गी ॥

(१)(२)(३) (४)(५)(६) (७)(८)(९) (१०)(११)(१२) (१३)(१४)(१५)

'पृथगाद्यम्' इति उद्धृतामेकत पठेत्' (पि० सू० ५।२५) इत्यनुवृत्तिनिरासार्थम्[1] । अत्र तृतीयपादव्यवस्था सकारस्य[2] विभज्य पाठलिङ्गात् ॥

वर्द्धमानं[3] नौ स्नौ[4] नसौ[5] । ५ । २९ ॥

'तृतीयस्य[6]' (पि० सू० ५।२६) इत्यनुवर्तते । तस्मिन्नुपस्थितप्रचुपिते तृतीयस्य पादस्य स्थाने यदा नकारौ (।।। ।।।)सकार(।।ऽ)नकारौ(।।।)पुनर्[6]नकार(।।।)सकारौ(ऽ।।) च भवतस्तदा 'वर्द्धमान' नाम वृत्तं भवति । तत्रोदाहरणम्—

मगण सगण जगण भगण गु० गु०

ऽ ऽ ऽ । । ऽ । ऽ । ऽ । ऽ ऽ ऽ

बिम्बोष्ठी क–ठि–नो—न्न–त–स्त—ना– व– न—ता–ङ्गी

(१)(२)(३) (४)(५)(६) (७)(८)(९) (१०)(११)(१२) (१३)(१४)

सगण नगण जगण रगण गु०


। । ऽ — । । । — । ऽ । — ऽ । ऽ — ऽ

ह–रि–णी —शि–शु–न—य–ना नि—त–म्ब–गु—र्वी ।

(१)(२)(३) (४)(५)(६) (७)(८)(९) (१०)(११)(१२)(१३)

---

१ 'शङ्कानिरासार्थम्' इति लि पुस्तके २ 'स्नौ' इति सूत्रस्थपाठदेहे नकारात्सकारं दूरीकृत्येत्यर्थं ३ '**वर्द्धमानं** तृतीयश्चेन्ननसैर्ननसैरिह' इति छन्द कौस्तुभकार•. ४. 'तृतीयस्येति वर्तते ।' इति लि पुस्तके ५ लिखितपुस्तके सर्वत्रापि 'नगणौ सगणनगणौ' इत्यादि ६ 'पुन.' इति लि पुस्तके नास्ति.



शुद्धविराड्रूपम तज्रा । ५ । ३० ॥

तस्मिन्नेव उपस्थितप्रचुपिते यदा तृतीयस्य पादस्य स्थाने तकारे(ऽऽ।)जकार(।ऽ।)-रेफा(ऽ।ऽ) भवन्ति तदा 'शुद्धविराड्रूपम' नाम वृत्त भवति । तत्रोदाहरणम्—

उपस्थितप्रचुपितादीनामग्रि प्रवेशयितु न शक्यन्ते संज्ञा, इति नोक्ताः ॥

अर्द्धे । ५ । ३१ ॥

पूर्वसूत्रावधीनि छन्दांस्युक्तानि । इदानीं नियमेनोच्यन्ते । 'अर्द्धे' इत्यधिकारोऽयमाध्यायपरिसमाप्ते । यदित ऊर्ध्वमनुक्रमिष्याम , अर्द्धे एवं तद्वेदितव्यम् ॥

---

१ 'तस्मिन्नेव शुद्धविराजपमम्' इति छन्द कौस्तुभकार २ 'अस्मिमेव' इति छि पुस्तके ३ पादस्य' इति छि पुस्तके नास्ति ४ सगण ज[ग]ण रगणा' इति छि पुस्तके

[1]उपचित्रकं सौ सलौ ग्, भौ भ्गौ ग् । ५ । ३२ ॥

यस्य प्रथमे पादे [2]सकारा(।।S ।।S।।S)स्त्रय·, लकार(।)गकारौ(S) च क्रमेण, द्वितीये [3]भकारास्त्रयो(S।।.S।।.S।।) गकारौ(SS) च भवत , तत् 'उपचित्रकं' नाम वृत्तम् । अर्द्धशब्दस्य समग्रविभागवचनत्वाद्वितीयमप्यर्द्धं तादृशमेव । तत्रोदाहरणम्—

सगण सगण सगण ल० गु०

। । S — । । S — । । S — ।—S

उ–प–चि—त्र–क–म—त्र वि–रा—ज–ते

(१)(२)(३) (४)(५)(६) (७)(८)(९) (१०)(११)

भगण: भगण भगण· गु० गु०

S । ।—S । ।—S । ।—S S

चू–त–व—नं कु–सु—मै–र्वि–क–स–द्भि ।

(१)(२)(३) (४)(५)(६) (७)(८)(९)(१०)(११)

सगण सगण सगण ल० गु०

। । S—। । S—। । S—।—S

प–र–पु–ष्ट–वि–घु–ष्ट–म–नो–ह–र

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

भगण भगण भगण: गु० गु०

S · । ।—S । ।—S । ।—S—S

म–न्म–थ–के–लि–नि–के–त–न–मे–तत् ॥

(१) (२) (३) (४) (५) (६) (७)(८)(९)(१०)(११)

[4]द्रुतमध्या भौ भ्गौ ग्, नजौ ज्यौ । ५ । ३३ ॥

यस्य प्रथमे पादे त्रयो भकारा (S।। S।। S।।) गकारौ(S S) च, द्वितीये नकार (।।।)जकारौ(।S।)जकार(।S।)यकारौ(।SS) च, तद् 'द्रुतमध्या' नाम वृत्तम् । अत्रापि प्रथमद्वितीयाविव तृतीयचतुर्थौ पादौ । तत्रोदाहरणम्—

भगण भगण· भगण: गु० गु०


S । । S । ।—S । ।—S—S


य–द्य–पि शी–घ्र–ग–ति–र्मृ–दु–गा–मी


(१)(२) (३) (४)(५)(६) (७)(८) (९)(१०)(११)

---

१ 'विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकाद्युपचित्रम्' इति प्रा० पि० सू० २।३११ । २ 'सगणा ' इति लि. पुस्तके ३ 'भगणा ' इति लि पुस्तके. ४. 'भत्रयभोजगतं गुरुकौ चेत् युजि च नजौ ज्ययुतौ द्रुतमध्या' इति छन्द:-कौस्तुभकार:.











वेगवती सौ सगौ, मौ भगौ ग् । ५ । ३४ ॥

यस्य प्रथमे पादे प्रथम सकारात् (॥ऽ॥ऽ॥ऽ) गकार(ऽ)श्चैक, द्वितीये भकारात्परो ऽ॥ ऽ॥ ऽ॥) गकारो(ऽऽ) च भवत तत् वेगवती[1] नाम वृत्तम् । तस्योदाहरणम्—









---

१ विषमे प्रथमाक्षरहीन दोषकृतमेव वेगवती स्यात् इति प्रा० पि० सू० २।१११ २ 'सगणा इति लि पुस्तके ३ 'भगणा' इति लि पुस्तके ४ 'वृत्त भवति' इति लि पुस्तके ५. 'तत्र इति लि पुस्तके नास्ति ।

[1]भद्रविराट् त्जौ गौं, [2]म्सौ ज्गौ ग् । ५ । ३५ ॥

यस्य प्रथमे पादे तकार(ऽऽ।)जकारौ(।ऽ।) रेफ(ऽ।ऽ)गकारौ(ऽ) च, द्वितीये मकार-(ऽऽऽ) सकार (॥ऽ) जकारा (।ऽ।) गकारौ (ऽऽ) च, तद् वृत्तं 'भद्रविराट्' नाम । तत्रोदाहरणम्—

तगणः जगण रगण गु०

ऽ ऽ ।—। ऽ ।—ऽ । ऽ—ऽ

य-त्पा-द-त-ले च-का-स्ति च-क्रं

(१) (२) (३) (४) (५)(६) (७) (८) (९)(१०)

मगण सगण जगण गु० गु०

ऽ ऽ ऽ । । ऽ । ऽ ।— ऽ ऽ

हृ-स्ते वा कु-लि-शं स-रो-रु- हं वा ।

(१)(२)(३) (४) (५)(६) (७)(८)(९)(१०)(११)

तगण मगण रगण गु०

ऽ ऽ ।—। ऽ ।—ऽ । ऽ—ऽ

रा-जा ज-ग-दे-क-च-क्र-व-र्ती

(१) (२)(३) (४)(५) (६)(७) (८) (९)(१०)

मगण सगण नगण गु० गु०

ऽ ऽ ऽ—। । ऽ । ऽ ।—ऽ ऽ

स्या-च्छं भ-द्र-वि-राट् स-म-श्नु-ते ऽसौ ॥

(१) (२) (३) (४) (५) (६) (७)(८)(९)(१०)(११)


अस्यौपच्छन्दसिकान्त पातित्वेऽपि विशेषसज्ञार्थमर्द्धसमाधिकारे पाठ ॥

[3]केतुमती सजौ सगौ, भ्रौ न्गौ ग् । ५ । ३६ ॥

यस्य प्रथमे पादे सँकार(॥ऽ)जकारौ(।ऽ।) सकार(॥ऽ)गकारौ(ऽ) च, द्वितीये भकार(ऽ॥)रेफ(ऽ।ऽ)नकारा(।॥) गकारौ(ऽऽ) च, तत् 'केतुमती' नाम वृत्तं भवति । तत्रोदाहरणम्—


---

१. 'ओजे तपरौ जरौ गुरुश्चेत् म्सौ ज्गौ ग् **भद्रविराड्** भवेदनोजे' इति छन्द कौस्तुभकार . २. 'तगणजगणौ रगणगुरू च, द्वितीये मगणसगणजगणा गकारौ च भवतस्तद्वृत्तं 'भद्रविराट् नाम ।' इति लि. पुस्तके क पुस्तके 'वृत्तं' इति नास्ति. ३ 'विषमे सजौ सगुरुयुक्तौ **केतुमती** समे भरनगाद्र.' इति छन्दःकौस्तुभकार . ४. 'सगणजगणौ, सगणगकारौ च, द्वितीये भगणरगणौ नगणो गकारौ च भवतस्तद्वृत्तं—'इति लि. पुस्तके. ५, 'तत्र' इति लि पुस्तके नास्ति.



आख्यानकी तौ जगौ ग्, जतौ जगौ ग् । ५ । ३७ ॥

यस्य प्रथमे पादे तैकारौ(ऽऽ।.ऽऽ।) जकारो(।ऽ।) गकारौ(ऽऽ) च, द्वितीये जकार (।ऽ।) तकारौ(ऽऽ।) जकार(।ऽ।) गकारौ(ऽऽ) च, तत् 'आख्यानकी' नाम वृत्तम् । तत्रोदाहरणम्—



---

१ 'अख्यानिकी' इति कलिकातामुद्रितपुस्तके पाठः । एव वृत्तावपि तत्र । 'आख्यानकी तौ जगुरू गमोजे जतावनोने जगुरू गुरुश्चेत्' इति छन्दःकौस्तुभकारः उपजातिचतुर्दशभेदान्तर्गतप्राकृतपिङ्गलोक्तमद्राख्यदशमभेदरूपत्वात् 'भद्रा' इत्यपरं नाम २ 'तगणौ जगण्यौ गकारौ च, द्वितीये जगणतगणौ जगणो गकारौ च भवत्यत्रोदाहृतम्— इति लि पुस्तके ३ 'तत्र' इति लि पुस्तके नास्ति

तगणः तगण जगणः गु० गु०

ऽ । ऽ । । ऽ । । ऽ । ऽ । ऽ—ऽ

आ–ख्या–न–की च स्म–र–ज–न्मे[1]–वा–र्ता-

(१) (२) (३) (४) (५) (६) (७) (८) (९) (१०)(११)

जगणः तगणः जगण गु० गु०

। ऽ । । ऽ । । । ऽ । । ऽ । ऽ—ऽ

म–हो–त्स–व–स्या–भ्र–व[2]–णे क–ण–न्ती ॥

(१) (२) (३) (४) (५) (६) (७) (८)(९)(१०)(११)

आख्यानकी वार्ताहारिकोच्यते ॥

विपरीत[3]ाख्यानकी जतौ जगौ ग्, तौ जगौ ग् । ५ । ३८ ॥

यस्य प्रथमे पादे ज[4]कार(।ऽ।)तकारौ(ऽऽ।) जकारो(।ऽ।) गकारौ(ऽऽ) च, द्वितीये तकारौ(ऽऽ।.ऽऽ) जकारो(।ऽ।) गकारौ(ऽऽ) च, तद् 'विपरीताख्यानकी' नाम वृत्तम् । तत्रोदाहरणम्—

जगणः तगण जगणः गु० गु०

। ऽ । । ऽ ऽ । । ऽ । ऽ—ऽ

अ–लं त–वा–ली–क–व–चो–भि–रे–भिः

(१) (२) (३) (४) (५) (६) (७) (८) (९) (१०)(११)

तगणः तगण जगणः गु० गु०

ऽ ऽ । ऽ ऽ । । ऽ । ऽ—ऽ

स्वा–र्थं प्रि–ये सा–ध–य का–र्यं–म–न्यत् ।

(१) (२) (३) (४)(५) (६) (७) (८) (९)(१०) (११)

जगणः तगणः जगणः गु० गु०


। ऽ । ऽ ऽ । । ऽ । ऽ ऽ

क–थं क–था–व[5]–र्ण–न–कौ–तु–कं स्या-

(१)(२)(३) (४) (५) (६) (७) (८) (९)(१०)(११)

---

१ 'जन्मपाश' इति क मु पुस्तके. २. 'आश्रवणे' इति क. मु. पु. । 'यात्रा-महोत्सवस्य श्रवणे क्वणन्ती' इति लिखितोदाहरणपुस्तके ३ 'विपरीताख्यानिकी इति क. मु पु. 'जतौ जगौ गो विषमे समे तौ जगौ ग एषा **विपरीत**पूर्वा' इति छन्दः-कौस्तुभकारः. प्राकृतपिङ्गलोक्तोपजातिचतुर्दशभेदान्तर्गत**हंसी**नामकपञ्चमभेदरूपत्वात्पञ्चमोऽयं भेद उपजातेः, अतो '**हंसी**' इति नामान्तरम्. ४. 'जगणतगणौ जगणौ गकारौ च, द्वितीये तगणौ जगणौ गकारौ च भवतस्तद्वृत्तं—'इति लि. पुस्तके. ५. 'कथाकर्णनकौतुकं स्यात्' इति लि. पुस्तके.




दाक्ष्यान–की षे–द्वि–प–री–त–वृ–त्ति

(१)(२)(३) (४)(५)(६) (७)(८)(९)(१०)(११)

एतयोर्यं वक्ष्यमाणोपजात्यन्तगतत्वेऽपि विक्षेपसंज्ञार्थमत्रसमाधिकारे पाठः ॥


हरिणप्लुता सौ सलौ ग्, न्मौ भ्रौ । ५ । ३९ ॥

अस्य प्रथमे पादे सैकाराश्चत्वारो (।।ऽ।।ऽ ।।ऽ) सकार(।)मकारौ(ऽ) च, द्वितीये नकार(।।।)मकारौ(ऽ।।) मकार(ऽ।।)रेफौ(ऽ।ऽ) च, तद् वृत्तं 'हरिणप्लुता'नाम । तत्रोदाहरणम्–




स–व मु–ख न–रा–धि–प वि–द्वि–षां

(१)(२)(३) (४)(५)(६) (७)(८)(९) (१०)(११)




मे–ध–वि–ध–र्षि–त–के–सु–ह–षी–ध–साम् ।

(१) (२) (३) (४) (५) (६) (७)(८) (९) (१०)(११)(१२)



र–ण–भू–मि–प–रा–क्षु–ख–व–र्म–नां

(१)(२)(३)(४)(५)(६) (७)(८)(९) (१०)(११)



भ–व–ति धी–ध्र–ग–ति–ह्–रि–ण–प्ल ता ॥

(१)(२)(३) (४)(५)(६) (७)(८)(९)(१०)(११)(१२)

अपरवक्त्रं नौ रौ लौ ग्, न्जौ ज्रौ । ५ । ४० ॥

अस्य प्रथमे पादे नैकारौ(।।। ।।।) रेफ(ऽ।ऽ)लकार(।)गकारा(ऽ) च, द्वितीये नकार-

---

१ 'च' इति छि. पुस्तके नास्ति २ अयुजि प्रथमेन विवर्जितो द्रुतविलम्बिततो हरिणप्लुता' इति प्रा० पि० सू० २।१।१५ ३ अत्र सगणा लकारमकारौ च द्वितीये नगणभगणौ भगणरगणौ च भवतस्तद्वृत्त' इति छि पुस्तके ४ 'तत्र' इति छि पुस्तके नास्ति ५ मदविसर्जितहेतिलघीयसाम्' इति छि पुस्तके ६ अयुजि ननरला गुरु समे यदपरवक्त्रमिद नजौ जरौ' इति प्रा० पि० सू० २।१।१८ ७ 'नगणौ रगणलकारौ गकारश्च, द्वितीये नगणजगणौ जगणरगणौ च भवत' इति छि पुस्तके

(।।।)जकारौ(।ऽ।) जकार(ऽ।ऽ।)रेफौ(ऽ।ऽ) च, तद्वृत्तम् 'अपरवक्त्रं' नाम । तत्रोदाह-रणम्—

नगणः नगण रगण ल० गु०

। । ।—। । ।—ऽ । ऽ—ऽ—ऽ

स-कृ-द-पि कृ-प-णे-न च-क्षु-षा

(१) (२)(३) (४) (५) (६) (७)(८) (९) (१०)(११)

नगण जगण जगणः रगण.

। । ।—। ऽ ।—। ऽ ।—ऽ । ऽ

न-र-व-र प-श्य-ति-य-स्त-वा-न-नम् ।

(१)(२)(३)(४)(५) (६) (७) (८) (९)(१०)(११)(१२)

नगणः नगण रगण ल०गु०

।०। ।—। । ।—ऽ । ऽ— ।—ऽ

न पु-न-र-प-र-व-क्त्र-मी-क्ष-ते

(१)(२)(३)(४)(५)(६) (७) (८) (९)(१०)(११)

नगण जगण जगण रगण

। । ।—। ऽ ।—। ऽ ।—ऽ । ऽ

स हि सु-खि-तो-ऽर्थि-ज-न-स्त-था-वि-ध. ॥

(१)(२)(३) (४) (५) (६) (७)(८) (९)(१०)(११)(१२)

अस्य वैतालीयान्तर्गतत्वेऽपि विशेषसंज्ञार्थमिहोपन्यास. ॥

पुष्पिताग्रा नौ र्यौ, न्जौ जरौ ग् । ५ । ४१ ॥

यस्य प्रथमे पादे नैकारौ(।।। ।।।) रेफ(ऽ।ऽ)यकारौ(।ऽऽ)च, द्वितीये नकार(।।।) जकारौ (।ऽ।)जकार(।ऽ।)रेफौ(ऽ।ऽ) गकार(ऽ)श्च, तद्वृत्तं 'पुष्पिताग्रा' नाम । तत्रोदाहरणम्—

नगणः नगण रगण यगण

। । ।—। । ।—ऽ । ऽ—। ऽ ऽ

स-म-सि-त-द-श-ना मृ-गा-य-ता-क्षी,

(१)(२) (३) (४) (५)(६) (७)(८) (९)(१०)(११)(१२)

नगणः जगण जगण रगण गु०


। । ।—। ऽ ।—। ऽ ।— ऽ । ऽ—ऽ

सि-त-सु-भ-गा प्रि-य-वा-दि-नी वि-द-ग्धा ।

(१) (२)(३) (४) (५) (६) (७) (८) (९)(१०)(११)(१२)(१३)

---

१ 'तत्र' इति लि पुस्तके नास्ति २ 'अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च **पुष्पिताग्रा**' इति प्रा० पि० सू० २।३०८ ३. 'यस्य प्रथमे नगणौ रगणयगणौ च द्वितीये नगणजगणौ जगणरगणौ गकारश्च भवति तद्वृत्तं—' इति लि. पुस्तके. ४. 'तत्र' इति लि. पु. नास्ति.



इयमप्यौपच्छन्दसकान्तगता विशेषसंज्ञापनार्थमत्रोच्यते ॥

यैवमती जौ जौं, ज्रौ ज्रौ ग् । ५ । ४२ ॥

यस्य प्रथमे पादे रेफै(ऽ।ऽ)जकारौ(ऽ।ऽ) भूयोऽपि रेफ(ऽ।ऽ)जकारौ(ऽ।) भवत, द्वितीये जकार(ऽ।)रेफौ(ऽ।ऽ) पुनर्जकार(ऽ।)रेफौ(ऽ।ऽ) गुरु(ऽ)श्च, तदुक्त 'यवमती' नाम । अत्र संप्रदायास्वादम्यवस्या । यथोदाहरणम्—



---

१ 'इय-'इत्यादि क्ति पु नास्ति २ 'परावसी' इत्यपि नामान्तरं श्रीहृष्यमसे ३ 'रगणजगणौ भूयोऽपि रगणनगणौ भवतः, द्वितीये जगणरगणौ भूयोऽपि जगणरगणौ गकारश्च तदुक्त' इति क्ति पुस्तके ४ 'अत्र' इति क्ति पु. नास्ति ५ 'तत्र' इति क्ति पु नास्ति ६ 'तथा च यस्या' इति क्ति पु०

यवान्विता[1] यवमतीत्यर्थः ॥

शिखैकोनत्रिंदशदेकत्रिंदशदन्ते ग् । ५ । ४३ ॥

यस्य[2] प्रथमे पादे एकोनत्रिंशद्(२९) अक्षराणि, द्वितीये च एकत्रिंशत् (३१), द्वयोरपि (१. २) पादयोरन्ते प्रत्येकं गुरु (ऽ), तद्वृत्तं 'शिखा' नाम । 'अर्धे' (पि० सू० ५।३१) इत्यधिकाराद्द्वितीयमप्यर्धं तादृशमेव । 'अन्ते ग्' इति नियमार्थमेतत् । अन्ते एव गुरुर्नान्यत्र । तेन अयुक्(१ ३)पादे अष्टाविंशति(२८)रक्षराणि लघूनि, अन्ते गुरु (१) रेक । युक्(२.४)पादे त्रिंश(३०)लघव·,अन्ते गुरु(१)श्च । तत्र[3] उदाहरणम्—

गु०
ऽ
[4]अभिमतवकुलकुसुमघनपरिमलमिलदलिमुखरितहरिति मधौ
(२९)

गु०
ऽ
सहचरमलयपवनरयतरलितसरसिजरजसि शयँतरणिवितते[5] ।
(३१).

गु०
ऽ
विकसितविविधकुसुमसुलभसुरभिशरमदनिहंतसकलजने[6]
(२९).

गु०
ऽ
ज्वलयति मम हृदयमविरतमिह सुतनु तव विरहदहनविषमशिखा ॥
(३१)

खंञ्जा महत्ययुजीति । ५ । ४४ ॥

---

१. 'यवान्वितेति' इति लि. पु०. २ पिङ्गलसूत्र (४।४९) प्राकृतपिङ्गलसूत्र-(१।१२६) बोधित'**शिखा**'छन्दस्त्वसाद्भिन्नमेव. ३. 'यस्य प्रथमे पादे एकान्नत्रिंशदन्ते ग् यस्य प्रथमे पादे एकान्नत्रिंशदक्षराणि भवन्ति, द्वितीये च एकत्रिंशद् द्वयोरपि पादयोरन्ते च प्रत्येकं गकारस्तद्वृत्तं शिखानाम' इति लि. पुस्तके. ४ 'तेनायुक्पादेऽष्टाविंशतिर्लघव., अन्ते गुरुश्चैक , युक्पादे त्रिंशल्लघवो गुरुश्चान्ते भवति ।' इति लि. पुस्तके ५. 'तत्र' इति लि. पु. नास्ति ६. 'अभिनव' इति लि. पुस्तके ७ 'मनसि शयवितते' ति लि. पुस्तके, लिखितोदाहरणपुस्तके च ८. 'सुरभि' इति लि. पुस्तके त्रुटितं प्रतिभाति. ९. 'निहित' इति क. मु. पुस्तके १०. 'प्राकृतपिङ्गलसूत्र-(१।१२४)बोधित **'खञ्जा'** छन्दस्त्वसाद्भिन्नमेव. **खजा'** इति नामान्तर वृत्तरत्नाकरे.

इयमेव शिखा पूर्वोक्ते सप्तदशे पादे अयुजि(१ ३) सति पादस्येत्यादितरस्मिंश्चे युजि(२ ४) सति 'गजा' नाम [1]छन्दो भवति[2] । अयमर्थ —एकत्रिंशदक्षरो विषमः[3] पाद कर्तव्य[4] । एकोनत्रिंशद(२९)क्षरश्च समः पाद । शेष यथाप्राप्तमेव । तत्रोदाहरणम्—

ग
⏜
अपगतपनविंशददशदिशि हृतमनदशि परिगतकुणकपिलकलमे
(११)
ग
⏜
प्रविकस्वेंदसमकुसुमपनपरिमलसुरभितमरुति शरदि समये ।
(११)
ग
⏜
ε
शुचिशशिमहसि विहतसरसिरुहि मुदितमधुलिहि विमलितपरिवेषे
(११)
ग
⏜
ε
क्षिमपरमिह कमलमुखि मुखमनुभवति मम हृदयकमलमधुना ॥
(११)

भद्रसमवृत्ताधिकारो निवृत्त ।

इति भट्टहलायुधविरचितायां छन्दोवृत्तौ पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

यतिर्विच्छेद ॥ ६ । १ ॥

विच्छिद्यते विभज्यते पदपाटोऽस्मिन्निति विच्छेदो विश्रामस्थान स चैं यतिरित्युच्यते । नन्वत्र शास्त्रे यतिशब्देन व्यवहारादर्शनान्निरर्थक संज्ञाकरणम् । नैष दोष । यतिरिर्सागमादिप्याचार्यपारम्पर्यमागता संज्ञेय तनुमध्यादिवत्[7] । तस्यां शिष्यव्युत्पत्त्य

---

१ 'च' इति लि पु नास्ति २ 'छन्दो भवति' इति लि पु नास्ति ३ विषमपाद' इति लि पुस्तके ४ 'प्रविकसितसमकुसुमसम' इति क मु पुस्तके प्रविकसदशनकुसुम' इति लि पुस्तके ५ 'सा यतिरुच्यते' इति लि पुस्तके ६ 'यतिरित्येवमादिराचार्यपरम्परागता' इति लि पुस्तके ७ 'तस्माद्' इति लि पुस्तके.

र्थमर्थकथनम्[1] 'यतिर्विच्छेदः' इति। अस्ति च लोके शास्त्रान्तरेषु[2] च यतिसंज्ञाव्यवहारः। अपि च[3] 'यतेः' इत्यधिकार आसप्तमाध्यायपरिसमाप्तेः समुद्रेन्द्रियरसादिनिर्देशेषूपपतिष्ठते। समुद्रादिशब्दाः साकाङ्क्षत्वात् 'यतिः' इत्यनेनैवं संबध्यन्ते। यतिशब्दस्याधिकरणव्युत्पत्त्या समुद्राद्यवच्छिन्नेष्वक्षरेषु यतेः कर्तव्येत्यर्थः सिध्यति। तत्रैषा[6] यत्युपदेशोपनिषद्भवति।

'यतेः सर्वत्र पादान्ते श्लोकार्द्धे तु विशेषतः।
समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके॥
क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत्।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ॥
पूर्वान्तवत्स्वरे सन्धौ क्वचिदेव परादिवत्।
द्रष्टव्यो यतिचिन्तायां यणादेशः परादिवत्॥
नित्ये प्राक्पदसंबन्धाश्चादयः प्राक्पदान्तवत्।
परेण नित्यसम्बन्धाः प्रादयश्च परादिवत्'॥

'यतिः सर्वत्र पादान्ते' इत्यस्योदाहरणम्—'विशुद्धज्ञानदेहाय' इत्यादि। तस्यैव प्रत्युदाहरणम्—

'नमस्तस्मै महादेवाय शशाङ्कार्धधारिणे' इत्यादि।

'श्लोकार्धे तु विशेषतः' इत्यत्र संधिकार्याभाव[10] स्पष्टविभक्तिकत्वं च विशेषः। तत्रोदाहरणं यथा—

'नमस्यामि सदोद्भूतमिन्धनीकृतमन्मथम्।
ईश्वराख्यं परं ज्योतिरज्ञानतिमिरापहम्॥'

अत्र 'ईश्वराख्यम्' इत्यस्य पूर्वमकारेण सयोगो न कर्तव्यः। समासे प्रत्युदाहरणं [यथा]—

'सुरासुरशिरोरत्नस्फुरत्किरणमञ्जरी-।
पिञ्जरीकृतपादाब्जद्वन्द्वं वन्दामहे शिवम्॥'

---

१. 'कथनं' इति लि. पुस्तके. २. 'शास्त्रे च व्यवहारः' इति लि. पुस्तके. ३. 'अयं यतिरिति अधिकार' इति लि. पुस्तके ४. 'समुद्रेन्द्रियरसादिषु' इति लि. पुस्तके. 'समुद्रेन्द्रियरसादित्यादिषु' इति च क मुद्रितपुस्तके. ५. 'एव' इति लि. पुस्तके नास्ति. ६. 'अत्रैषा' इति क. मुद्रितपुस्तके. ७ 'प्राक्पदसबद्धा.' इति लि. पुस्तके. ८. 'नित्यसबद्धा' इति लि. पुस्तके. ९. 'इत्येवमादि' इति क. मु. पुस्तके. १०. 'सधिकार्याभावात्, स्पष्टविभक्तिकत्वाच्च इति क. मु. पुस्तके.

'समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके' तत्र श्रूयमाणविभक्त्यन्त व्यक्तविभक्तिकम्[1] समासान्तभूतविभक्त्यन्तमव्यक्तविभक्तिकम्। तत्रोदाहरण[2] यथा]—

'यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु' इत्यादि।

'व्यक्ताव्यक्तविभक्तिके' इति 'यतिः सर्वत्र पादान्ते' इत्यनेन संबध्यते। तत्रो दाहरणम्—

'वशीकृतजगत्काल कण्ठेकाल नमाम्यहम्।
महाकाल कलाशेषशशिखेलाशिरोमणिम्॥'

अपि च।

'नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे॥'
'क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत्।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ॥'

तत्रोदाहरणम्—

'पयात सखचामी,—करकटकवटे विष्टशीतेतरांशौ' इत्यादि। तथा—'कूज स्कोयष्टिश्रेष्ठा,—इक्षुगुल्मस्तुव प्रान्तकान्तारदेशा' इत्यादि। तथा—'हासो इत्था प्रसंवा,—इनमपि तुलिता,—श्रीन्द्रसारद्विपोऽसौ' इत्यादि। तथा—'वैरिणानां स योषा,—रितस्त्रिरक्तचां चाननानां पतुणाम्' इत्यादि। तथा—'सौधे पानीयमाहा दयति[3] र्द मद्दिप पक्षपाती पृथव" इत्यादि। समुद्रादाविति किम्। पदमध्ये यतिः पादान्ते मा भूत्। तथया—'प्रणमत मथव घश्लेशनाशाय नारा —यणचरणसरोजद्वन्द्व मानन्दहेतुम्' इत्यादि।

पूर्वोत्तरभागयोरेकाक्षरत्ये तु यतिर्विपद्यते। तत्रोदाहरणम्—

'एतस्या ग,—ण्डतटममल गाहते चन्द्रकक्षाम्' इत्यादि। 'एतस्या रा,—त्रि मुमुक्षु मिद पूर्णचन्द्रप्रकाशम्।' इत्यादि। तथा—'सुरासुरशिरोनिघृष्टचरणारविन्द शिव' इत्यादि।

'पूर्वान्तवत्स्वर संधौ क्वचिदेव परादिवत्'। अस्यार्थ—योऽय पूर्वपरयोरेकादेश स्वरसंधौ विधीयते स क्वचित्पूर्वस्यान्तवद्भवति क्वचित्परस्यादिवत्[4]। तथा च पाणिने सरणम्— अन्तादिवच्च' (पा० सू० ६।१।८५)। तत्र पूर्वान्तवद्भावे उदाहरणम्— 'स्यादस्यानोपगतयमुनासंगमेवामिरामा'। जम्भारातीभकुम्भोद्भवमिव दधतः इत्यादि।

---

१ 'सतत्रव्यक्तविभक्तिकम्, समासान्तभूतमव्यक्तविभक्तिकम्' इति लि पुस्तके
२ 'तत्रोमयोरुदाहरणम्' इति लि पुस्तके　३ 'तत्र' इति लि पुस्तके नास्ति
४ 'द्विपोऽस्य' इति लि पुस्तके　५. 'पक्षे' (?) इति क मु पुस्तके　६ 'हि' इति लि पुस्तके　७ 'तत्र' इति लि पु नास्ति　८ एतदुदाहरण लि पु नास्ति.
९ 'आदिवद्भवति' इति लि पुस्तके　१० 'पाणिनिसारणम्' इति लि पुस्तके

तथा[1]—

'दिक्कालाद्यनवच्छिन्ना-नन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय[2] नमः शान्ताय तेजसे ॥' इत्यादि ।

परादिवद्भावे उदाहरणम्—

'स्कन्धं विन्ध्याद्रिबुद्धया, निकषति महिष-स्याहितोऽसून्[3]हार्षीत्' इत्यादि ।
'शूलं शूलं तु गाढं प्रहर हरहृपीकेशिकेशोऽपि वक्रश्चक्रेणाकारि कि नैः[4]' इत्यादि ।
तत्र हि स्वरस्य परादिवद्भावे व्यञ्जनमपि तद्भक्त्वात्तदादिवद्भवति ।
'यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ' इत्यन्तादिवद्भावविधावपि संवध्यते । तेन
'अस्या वक्त्राब्जमवजितपू-र्णेन्दुशोभं विभाति' इत्येवंविधा यतिर्न भवति ।
'यणादेशः परादिवत्' तत्रोदाहरणम्—

'विततघनतुषारक्षोदशुभ्राशुपूर्वा-
स्वविरलपदमालां श्यामलामुल्लिखन्त[6]' इत्यादि ।

'नित्यं प्राक्पदसंवन्धाश्चादय. प्राक्पदान्तवत्' तेभ्य. पूर्वा यतिर्न कर्तव्येत्यर्थ ।
तत्रोदाहरणम्—

'स्वादु स्वच्छं च[7] हिमसलिलं प्रीतये कस्य न स्यात्' इत्यादि ।
नित्यं प्राक्पदसंवन्धा इति किम् । अन्येषा पूर्वपदान्तवद्भावो माभूत् । तद् यथा—
'मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्या' इत्यादि ।
तथा[9]—'इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे' इत्यादि ।
'परेण नित्यसवन्धा. प्रादयश्च परादिवत्' तेभ्यः परा यतिर्न भवतीत्यर्थ ।
तत्रोदाहरणम्—

'दु खं मेऽप-क्षिपति[11] हृदये दुःसहस्त्वद्वियोग.' इत्यादि ।
परेण नित्यसवन्धा इति किम् । कर्मप्रवचनीयेभ्यः परापि यतिर्यथा[13] स्यात् इति,
तत्रोदाहरणम्—

'प्रियं प्रतिस्फुरत्पादे मन्दायन्ते नखत्विषं[13] ।'
'श्रेयासि वहुविघ्नानि भवन्ति महतामपि' इत्यादि ।

---

१ 'तथा' इति क मु पुस्तके नास्ति २. 'स्वसंवित्स्वेकमानाय' इति लि पुस्तके. ३ 'अस्तं प्रयास्यन्' इति लि. पुस्तके ४ 'किं न' इति क मु पुस्तके । 'के ते' इति च लि पुस्तके ५ 'इत्यस्य' इति लि पुस्तके ६ 'उल्लिखन्तम्' इति लि. पुस्तके. ७. 'स्वादु स्वच्छं सलिलमपि च' इति क मु पुस्तके ८ 'इति' इति लि पुस्तके. ९ 'तथा' इति लि पुस्तके नास्ति. १० 'तत्र' इति लि पुस्तके नास्ति ११. 'प्र-क्षिपति' क. मु. पुस्तके. १२. 'यतिः' इति लि पुस्तके नास्ति १३. 'न खल्विति' इति क. मु. पुस्तके.

अथ तु चादीनां प्रादीनां चैकाक्षरत्वेनैकाक्षराणामेव पादान्ते यतोषन्तादिवद्भाव ष्यते । नत्वनेकाक्षैराणां पदमध्ये यतौ । तत्र हि पदमध्येऽपि चामीकरादिष्विव तेरम्यनुज्ञातत्वात् तत्र चादीनामुदाहरणम्—

'प्रस्तावेशादपि च मधुनो विस्मृतभ्रूविलासम्' इति ।

प्रादीनामुदाहरणम्—

'द्वारास्तब्धप्रमोद हसितमिव परिस्पष्टमाशंसे सखीमि ' इत्यादि ।

न पर्यन्तोऽस्ति वृत्तानां प्रस्तारगणनाविधौ ।
पूर्वाचार्यैरुक्तेभ्योऽस्त्यत्रिह किंचिदिहोच्यते ॥

(उक्तायाम्) एकाक्षरायाम्—

श्रीच्छन्दः—श्री सा ।

श्र गो ॥ प्रा॰ पिं॰ सू॰ २।१॥

(अत्युक्तायाम्) यक्षरायाम्—

कामच्छन्दः—दीहा वीहा ।

कामो रामो ॥ प्र॰ पिं॰ सू॰ २।४॥

('स्त्री इति नामान्तरं कामस्य च्छन्द कौस्तुभादौ ।)

मधुच्छन्दः—सहु झुमा ।

महु झुम ॥ प्रा॰ पिं॰ सू॰ २।६ ॥

महीछन्दः—छगो जहीं ।

मही कही ॥ प्रा॰ पिं॰ सू॰ २।८ ॥

सारच्छन्दः—साद एह ।

गो वि रेह ॥ प्रा॰ पिं॰ सू॰ २।१०॥

(मध्यायाम्) त्र्यक्षरायाम्—

वालीच्छन्दः—वाली ए जाणीए ।

गो कम्मो तिव्वणो ॥ प्रा॰ पिं॰ सू॰ २।१२ ॥

---

१ 'चैकाक्षरत्वेन' इति लि पुस्तके नास्ति २ 'अनेकाक्षराणां वा' इत्यधिकं क मु पुस्तके ३ 'न त्वेकाक्षराणाम्' इति क मु पुस्तके ४ 'पदमध्ययतौ' इति लि पुस्तके ५ 'इति' इति लि पुस्तके नास्ति 'परिस्पष्टमाशंसेसखीमि ' इति क मु पुस्तके ६ प्रस्तारगणना त्वष्टमाध्याये प्रपञ्चयिष्यते, अत्र तु श्रीमता भगवता पिङ्गलाचार्येण गायत्र्याद्युष्णिक्पर्यन्तच्छन्दोऽनुसारीणि वृत्तानि, दण्डकप्रस्तारयत्र प्रदर्शिता नवूक्त्यादिच्छन्दःपद्धकानुसारीणि वृत्तानि । तानि च्छन्दांसि प्राकृतपिङ्गलच्छन्द कौस्तुभप्रस्तारेभ्योपलब्धानि प्रदर्श्यन्ते । यथा—७ 'पूर्वाचार्यैरुक्त वृत्तमिह' इति क मु पुस्तके

('**नारी**' इति नामान्तरं **ताल्या**श्छन्दःकौस्तुभादौ ।)
प्रियाच्छन्दः—हे **पिए** लेक्खिए ।
अक्खरे तिण्णि रे ॥ प्रा० पिं० सू० २।१४ ॥
('**मृगी**' इति नामान्तरं **प्रिया**याश्छन्दःकौस्तुभादौ ।)
शशीच्छन्दः—**ससी** यो जणीयो ।
फणीन्दो भणीओ ॥ प्रा० पिं० सू० २।१६ ॥
रमणच्छन्दः—सगणो **रमणो** ।
सहिओ कहिओ ॥ प्रा० पिं० सू० २।१८ ॥
पञ्चालच्छन्दः—तक्कार जं दिट्ठ ।
पञ्चाल उक्किट्ठ ॥ प्रा० पिं० सू० २।२० ॥
मृगेन्द्रच्छन्दः—णरेन्द्र ठवेहु ।
मिएन्द करेहु ॥ प्रा० पिं० सू० २।२२ ॥
मन्दरच्छन्दः—भो जहि सो सहि ।
मन्दर सुन्दर ॥ प्रा० पिं० सू० २।२४ ॥
कमलच्छन्दः—**कमल** पभण ।
सुमुहि णगण ॥ प्रा० पिं० सू० २।२६ ॥

(प्रतिष्ठायाम्) चतुरक्षरायाम्—

तीर्णाच्छन्दः—चारी हारा इट्ठा कारा ।
वीए कण्णा जाणे **तिण्णा** ॥ प्रा० पिं० सू० २।२८ ॥
('**कन्या**' इति नामान्तरं **तीर्णा**यारछन्द कौस्तुभादौ ।)
घारीच्छन्दः—वण्ण चारि मुद्धि **घारि** ।
विण्णि हार दो स सार ॥ प्रा० पिं० सू० २।३० ॥
नगाणीच्छन्दः—पओहरो गुरुत्तरो ।
नगाणिआ स जाणिआ ॥ प्रा० पिं० सू० २।३२ ॥
सतीच्छन्द.—'**नगी** सती ॥'
इत्यधिकं छन्द कौस्तुभादाद्युपलभ्यते । प्राकृतपिङ्गलवृत्तरत्नाकरादौ 'तु' न ।

(सुप्रतिष्ठायाम्) पञ्चाक्षरायाम्—

संमोहाच्छन्दः—**संमोहा**रूअ दिट्ठो सो भूअम् ।
बे कण्णा हारा भूअत्तासारा ॥ प्रा० पिं० सू० २।३४ ॥
('**पङ्क्तिः**' इति नामान्तर **संमोहा**ख्यच्छन्दस)


---

१. 'तत्र गायत्र्या छन्दसि वृत्तम्' इति लि. पुस्तके । अत्र त्वेकमेव वृत्तं दर्शि
शाङ्गधपिङ्गलच्छन्द.कौस्तुभादावुपलब्धानि वृत्तानि प्रदर्श्यन्ते यथा—

तत्र गायत्रे छन्दसि यत्तम्—

तनुमध्यौ त्यौ ॥ ६ । २ ॥

यस्य पादे तकार (ऽऽ।) यकारौ (।ऽऽ) तत् 'तनुमध्या' नाम यत्तम् । तेषो दाहरणम्—



---

१ षडक्षरचतुष्पादार्यागायत्रीच्छन्दस प्रस्तारे क्रियमाणे षट्पञ्चाशदधिकशतमेदा जायन्ते तत्र त्रयोदशोऽय भेद, प्राकृतपिङ्गले नाय वर्णितः २ 'तगणयगणौ भवतः' इति लि पुस्तके ३ 'तत्र' इति लि पुस्तके नास्ति ४ 'त्रिगभीर' इति लि पुस्तके ।

हारीच्छन्दः—आइहि भन्ते हारे मुञ्जुत्ते ।

मज्झेठ्ठगणो हारी अच्छन्दो ॥ प्रा० पिं० सू० २।१६ ॥

('हारीतयन्ध' इति नामान्तरं हारी च्छन्दस)

हसच्छन्द'—पिङ्गलदिट्ठो मह इ सिट्ठो ।

कण्णइ दिग्गो हस मुणिज्जो ॥ प्रा० पिं० सू० २।३८ ॥

('पङ्क्तिः' इति नामान्तरं हसस्य छन्द कौस्तुभादौ, छन्दोमञ्जर्यां म)

यमकच्छन्दः—सुणिअगण सरसुगुण ।

सरह गण जमअ भण ॥ प्रा० पिं० सू० २।४० ॥

विद्युघकच्छन्दः—'रो लगौ यदा स्याद्विद्युघकः' ।

प्रियाच्छन्द'—'सल्गे प्रिया' इत्यधिक छन्द कौस्तुभरत्नाकरादावुपलभ्यते न प्राकृतपिङ्गले ॥

शेषाच्छन्दः— बारहा मत्ता अ कण्णा सीआ होवम् ।

हारा छक्का पन्धो सेसा राआ छन्दो' ॥ प्रा० पिं० सू० २।४२॥

('शेषराज' इत्यपि नामान्तरं रविदासमते, 'विद्युल्लेखा' इति च नामान्तरं यत्त रत्नाकरादौ शेषाख्यच्छन्दसः) ।

तिलकाच्छन्द'— पिअ तिल्ल मुअं सगणेण सुअम् ।


छअ वण्ण पमो कल अट्ठ धमो ॥ प्रा० पिं० सू० २।४४॥

(रविदासमते 'तिल्ला, मद्र' इति नामान्तरे तिलकाच्छन्दस)

विज्जोहाच्छन्दः—'अक्खरा से छआ पाअ पाअ ठिआ ।

मत्त पञ्च ठुआ विण्णि ओहागणा' ॥ प्रा० पिं० सू० २। ४६ ॥

('विमोहा' इति नामान्तरं पाणीभूषणे, 'चल्लरी' इति छन्द कौस्तुभादौ विज्जो हाख्यच्छन्दस)।




अत्र तु पादान्ते विशेषेण विश्रामः कर्तव्य इत्याम्नायः ॥

(उष्णिहि)

कुमारललिता ज्सौ ग् ॥ ६ । ३ ॥

यस्य पादे जकार (।ऽ।) सकारौ (॥ऽ) गकारः (ऽ) श्च तद्वृत्तं 'कुमारललिता' नाम। त्रिभिश्चतुर्भिश्च यत्युपदेशं वर्णयन्ति । तत्रोदाहरणम्—



---

१. 'उर्वीपतिभोग्या' इति लि पुस्तके २ अत्र त्वेकमेव वृत्तं दर्शितम्, प्राकृतपिङ्गलच्छन्द कौस्तुभप्रभृतिग्रन्थोपलब्धानि वृत्तानि प्रदर्श्यन्ते यथा— ३. 'जगण-सगणौ गकारश्च भवति इति लि पुस्तके ४ 'तत्र' इति लि पुस्तके नास्ति

चतुरंसाच्छन्दः—'ठउ **चउरंसा** फणिवइभासा ।
दिअवरकण्णो फुल रसवण्णो ॥' प्रा० पिं० सू० २।४८ ॥
('**शशिवदना, चण्डरसा, चतुर्वर्णा**' इति नामान्तराणि छन्दःकौस्तुभादौ **चतुरंसा**ख्यच्छन्दसः) ।

मन्थानच्छन्दः—'कामावआरेण अद्धेण पाएण ।
मत्ता दहा सुद्ध **मन्थान** सो मुद्ध ॥' प्रा० पिं० सू० २।५१ ॥


शङ्खनारीच्छन्दः—'खडावण्णवद्धो भुअङ्गापअद्धो ।
पआ पाअ चारी कही **संखणारी** ॥' प्रा० पिं० सू० २।५३ ॥
('**सोमराजी, शङ्खधारी**' इति नामान्तरे छन्दःकौस्तुभादौ **शङ्खनार्या**ख्यच्छन्दसः) ।

मालतीच्छन्दः—'धअं सरवीअ मणीगुण तीय ।
दई लहु अन्त स **मालइ** कन्त ॥' प्रा० पिं० सू० २।५५ ॥
('**सुमालतिका**' इति नामान्तर वाणीभूषणे **मालत्या**ख्यच्छन्दस) ।

दमनकच्छन्दः—'दिअवर किअ भणहि सुपिअ ।
दमणअ गुणि फणिवइ भणि ॥' प्रा० पिं० सू० २।५७ ॥

वसुमतीच्छन्दः—'त्सौ चेद्वसुमती' इत्यधिकं छन्द कौस्तुभादौ ।

अत्र केचिद् द्वाभ्यां (२) पञ्चमि (५) श्च यतिमिच्छन्ति । तत्रोदाहरणम्—



इ-न्द(२)व-द-न-प-द्म(५)　प्रि-ये(२) स-ख वि-भा-ति(५),



इ-ह (२),प्र-ज-ति मु-ग्धे (५)　म-मो(२)प्र-म-र-तां मे (५) ॥

(अनुष्टुभि)

माणवकाक्रीडितक भ्तौ ल्गौ ॥ ६ । ४ ॥

यस्य पादे मैकार (ऽ॥) सकारौ (ऽऽ।) लकार (।) गकारौ (ऽ) च तत् 'माणवकाक्रीडितैक' नाम वृत्तम् ॥ तत्रोदाहरणम्—

---

१ 'तत्र' इति लि पुस्तके नास्ति　२ —'अत्र तु चत्वार्येव वृत्तानि दर्शितानि परंतु प्राकृतपिङ्गलच्छन्द कौस्तुभप्रभृतिच्छन्दोग्रन्थेष्वन्यान्यपि छन्दांस्युपलभ्यन्ते । यथा—' इति लि पुस्तके　३ 'मगणतगणौ, इति लि पुस्तके　४ 'माणवकाक्रीडितं' नाम लि पुस्तके—'माणयकम्' इति नामान्तरं छन्द'कौस्तुभवृत्तरत्नाकरादौ॥

समानिकाच्छन्द'—'चारि हार किज्जही तिण्णि गच्च दिज्जही ।
सत्त अक्खरा ठिआ सा समाणिआ पिआ ॥ प्रा पिं सू० २।५९ ॥

सुधासच्छन्द —'भणउ सुधासउ लहु सुविसेसनु ।
रचि चउमत्तह मगणह अन्तह ॥ प्रा० पिं० सू० २।६१ ॥

करहञ्जीच्छन्दः—'चरण गण विप्प पढम लह थप्प ।
जगण तसु अन्त सुणह करहच्च ॥ प्रा० पिं० सू० २।६३ ॥

शीर्षाच्छन्दः—'सत्ता दीहा जाणेही कण्णा वी गो माणेही ।
चउहाहा मत्ताणा सीसारूअं छन्दाणा ॥' प्रा० पिं० सू० २।६५॥

मधुमतीच्छन्दः—'ननगा मधुमती ॥

मदलेखाच्छन्द'— म सगौ मदलेखा ॥

चूडामणिच्छन्दः— चूडामणिस्त्रमगा' ॥'

हंसमालाच्छन्दः— सरगा हसमाला ॥

मधुमत्यादीनि चत्वारि वृत्तानि छन्द कौस्तुमादावेवोपलभ्यन्ते, न प्राकृतपिङ्गले

वुल्लाच्छन्द'—'तरलणअमि तुगो पढमगणसुरंगो ।
मगणजुअलअदो गुरुजुअलपरिओ ॥' प्रा० पिं० सू० २।७३ ॥

भगणः तगण ल० गु० भगण. तगण. ल० गु०
ऽ । ।—ऽ ऽ । —।—ऽ ऽ । ।—ऽ — ऽ ।—।—ऽ
माणव–का(४)क्रीडि–त–कं, (४)यः कुरु–ते,(४)वृद्ध–व–याः ।
भगण तगण ल० गु० भगण· तगणः ल० गु०
ऽ । ।— ऽ ऽ । —। ऽ ऽ । ।—ऽ ऽ । —।—ऽ
हास्यम–सौ(४),याति ज–ने, (४) भिक्षुरि–व,(४)व्रीच–प–ल. ॥
अत्र चतुर्भि (४) श्चतुर्भिश्च यतिरित्यान्नायः ॥

चित्रपदा भौ गौ ॥ ६ । ५ ॥

यस्य पादे भौकारौ (ऽ॥ · ऽ॥) गकारौ (ऽ ऽ) च भवतस्तत् 'चित्रपदा' नाम वृत्त ।
तत्रोदाहरणम्—

भगण. भगण गु० गु० भगण भगण गु० गु०
ऽ । ।—ऽ । ।—ऽ ऽ ऽ । ।— ऽ । । ऽ ऽ
यस्य मु–खे प्रिय–वा–णी चेतसि सज्जन–ता–च ।
भगण भगण गु० गु० भगण. भगण गु० गु०
ऽ । ।—ऽ । ।—ऽ—ऽ ऽ । ।—ऽ । । ऽ—ऽ
चित्रप–दा पि च लक्ष्मी—स्तं पुरु–षं न ज–हा–ति ॥

विद्युन्माला भौ गौ ॥ ६ । ६ ॥

---

१ लिखितपुस्तके पञ्चमं षष्ठं च सूत्रे चित्रपदाविद्युन्मालालक्षणात्मके चतुर्थपञ्चमत्वेन सवृत्ति सोदाहरणं च वर्तेते । माणवकाक्रीडितलक्षणात्माकसूत्रं च षष्ठत्वेन निर्दिष्टम् । उक्ताष्टाक्षरप्रस्तारभेदाना मध्ये पञ्चपञ्चाशत्तमो (५५) भेद**श्चित्रपदे**ति नाम्ना प्रसिद्धः । **'वितान'** इति नामान्तर **चित्रपदायाः** 'वितानमन्यत्' पिं० सू० ५।८ इति रीत्या. २. 'भगणौ' इति लि. पुस्तके.

कमलच्छन्दः—'पढम गण विप्पओ विहु तह णरेंदओ ।
गुरुसहित अन्तिणा **कमल** एम भत्तिणा ॥' प्रा० पिं० सू० २।७५॥

पद्ममालाच्छन्दः—'**पद्ममाला** च रौ गौ'
सुचन्द्राभाच्छन्दः—'**सुचन्द्राभा** यूरौ गूलौ' } (छन्द कौस्तुभादौ ॥)
सुविलासाच्छन्दः—'**सुविलासा** सरौ गूलौ हि'

गजगतिच्छन्दः—'नभलगा **गजगतिः**' (छन्दोमञ्जर्याम्)

अचलच्छन्दः—'वसुल**मचल**मिति'
कमलच्छन्दः—'**कमल**मिति पञ्चलम्'
अञ्चलच्छन्दः—'रगणयुत**मञ्चल**म्' } (क्वचित्)
लताछन्दः—'रौ यलौ गुरु स्याल्लता
अत्र पादान्ते यतिः ।

यस्य पादे मैकारौ (ऽऽऽ,ऽऽऽ) गकारौ (ऽ.ऽ) च तद् 'विद्युन्मौक्ष' नाम वृत्तम् ॥ तत्रोदाहरणम्—

मगणः मगणः गु गु
ऽ ऽ ऽ—ऽ ऽ ऽ ऽ ऽ—ऽ
विद्युन्मा—ला(४),मोक्षान् मो—गान्

मगणः मगण गु गु
ऽ ऽ ऽ—ऽ ऽ ऽ—ऽ—ऽ
मुक्त्वा मु—क्तौ(४) यम कु—र्यात् ।

मगणः मगणः गु गु
ऽ ऽ ऽ— ऽ ऽ ऽ—ऽ—ऽ
ध्यानोत्प—न्न (४),नि सा—मा—न्य

मगणः मगणः गु गु
ऽ ऽ ऽ—ऽ ऽ ऽ—ऽ—ऽ
सौख्य भो—(४) फुषधा—का—हेत् ॥

अत्रैं चतुर्भि (४) चतुर्भिश्च मतिरिसाम्नाय ॥

हंसरुत भौ गौ ॥६ । ७ ॥]

यस्य पादे मगण (ऽऽऽ) नगणौ (।।।) गकारौ (ऽ.ऽ) च भवतीत्यत् 'हंसरुत' नाम ॥ तत्रोदाहरणम्—

मगण नगणः गु गु मगणः मगणः गु गु
ऽ ऽ ऽ—। । ।—ऽ ऽ ऽ ऽ ऽ—। ।।ऽ—ऽ —ऽ
लावण्य वपुषि का—न्ते लोकाती—समति—सौ—म्यम् ।

मगणः नगणः गु गु नगण मगणः गु गु
ऽ ऽ ऽ—। । ।—ऽ—ऽ ऽ ऽ ऽ—। । ।—ऽ—ऽ
नैष्ठुर्यं मनसि य—ते हैमिन्य किमिति य—स्ते ॥

---

१ 'मगणौ गकारौ च भवत ' लि पुस्तके २ उक्ताक्षरप्रस्तारे सर्वगुर्वात्मक आद्यो भेदो 'विद्युन्माला' इति नाम्ना प्रसिद्ध विज्जुमाला भत्ता सोला पाए कण्णा चारि सोला । एम्व चारी पाआ भत्ती खत्ती विम्हू राआ ॥ प्रा० पिं० सू० २।६७ । विद्युल्लेखा इति नामान्तरम् एतदतिरिक्तानि 'समानिका-प्रमाणिका-वितान-नाराचक'-प्रभृतीनि षड्वन्दांसि पञ्चमाध्याये समाख्येयानि ३ लि पुस्तके इत्त' इति नास्ति । ४ चतुर्भिश्चतुर्भिर्यतिरित्युपदेश' इति लि पुस्तके ५ उक्ताक्षरप्रस्तारभेदेषु सप्तपञ्चाशत्तमो भेदो (५७) 'हंसरुत' इति नाम्ना प्रसिद्धः लिखितपुस्तकेऽस्य सूत्रस्य संख्या नवमत्वेन, भुजगशिशुसुतावलक्षणात्मकस्याग्रिमसूत्रस्य चाष्टमत्वेन निर्देश' । ६ 'गकारद्वय च भवति इति लि पुस्तके

(वृहत्याम्)

---

१ अत्र तु द्वावेव भेदो संदर्शितौ परन्तु **प्राकृतपिङ्गलच्छन्दःकौस्तुभप्रभृति**-ग्रन्थेष्वूपलब्धा भेदाः प्रकाश्यन्ते यथा—

महालक्ष्मीच्छन्दः—'दिट्ठ जोहा गणा तिण्णिआ णाअराएण जा विण्णिआ ।
मासअद्धेण पाअ ट्ठिअ जाण मुद्धे **महालच्छिअम्** ॥'
प्रा० २।७७ ॥

सारङ्गिकाच्छन्दः—'दिअवर कण्णो सअणं पअ पण मत्तागणणम् ।
सुरमुणिमत्ता लहिअ सहि **सरगिक्का** कहिअम् ॥'
प्रा० २।७९ ॥

'**सारसा, शार्ङ्गिका**' इत्यपि नामान्तरे **सारङ्गिकाया**· (क्वचित्)।

पाइत्ताच्छन्दः—'कुन्तीपुत्ताजुअ लहिअ तीए विप्पो धुअ कहिअम् ।
अन्ते हारो जह जणिअ **पाइत्ता**रूअ उ कहिअम्॥प्रा० २।८१

'**कुसुमवती, पवित्रा**' इति नामान्तरे **पाइत्ता**ख्यस्य ।

कमलच्छन्दः—'सरसगणरमणिआ दिअगणजुअ पलिआ ।
गुरु धरिअ पइपनु दहकलअ **कमलनु** ॥' प्रा० २।८३ ॥

'**कमला**' इत्यपि च नामान्तरे **कमलस्य** (क्वचित्)।

विम्वच्छन्दः—'रइअ फणि **विम्व** एसो गुरुजुअल सव्वसेसो ।
सिरहि दिअ मज्झ राओ गुणह गुणि एसहाओ ॥' प्रा० २।८५

'**विम्बा**' इति नामान्तरं क्वचित्। वाणीभूषणे तु गणभेदेन **विम्वलक्षणमुक्तम्**

तोमरच्छन्दः—'जसु आइ हत्थ विआण तह व पओहर जाण ।
पभणेइ णाअणरिन्द इम माणु **तोमरछन्द** ॥' प्रा० २।८७ ॥

पामालीच्छन्दः—'णाआराआ जप्पे सारा ए चारी कण्णा हन्ते हाराए ।
अट्ठादाहा मत्ता पाआए **रूआमाली** छन्दा जम्पीए ।
प्रा० २।८९ ॥

'**रूपामाला**' इति नामान्तर **रूपामाल्याः** क्वचित् ॥

मणिमध्यच्छन्दः—'स्यान्मणिमध्यं चेद्भमसा· ।' छन्द कौस्तुभे ।

स्निग्धाच्छन्दः—'**स्निग्धा** स्याद्भममा यत्र हराननयुगैर्यतिः ।' (श्रीकृष्ण)

भुजङ्गसंगताच्छन्दः—'सजरैर्भुजङ्गसंगता ।' छन्द कौस्तुभे ।

भद्रिकाच्छन्दः—'भद्रिका भवति रो नरौ' वृत्तरत्नाकरे.

लताच्छन्दः—'रो यलौ गुरु स्याल्लता' क्वचित् ।

वीरलक्ष्मीच्छन्दः—'वीरलक्ष्मीरियं रत्रया' क्वचित् ।

कुसुमिताच्छन्दः—कुसुमिता नरौ रो यदा । (क्वचित्) ।

भुजगशिशुसुता नौ म् ॥ ६ । ७ ॥

यस्य पादे नैकारौ (।।। ।।।) मकार (ऽऽऽ) च भवति तत् 'भुजगशिशुसुता' नाम वृत्तम् ॥ तत्रोदाहरणम्—

मगणः	मगणः	मगणः	मगण	मगणः	मगणः
ऽ ऽ ऽ	ऽ ऽ ऽ	ऽ ऽ ऽ	ऽ ऽ ऽ	ऽ ऽ ऽ	ऽ ऽ ऽ
हसम-धिकत-रं,(७)रम्या			विकच—कुवल—यं(७),श्यामा ।		
मगणः	मगणः	मगणः	मगणः	मगणः	मगणः
ऽ ऽ ऽ	ऽ ऽ ऽ	ऽ ऽ ऽ	ऽ ऽ ऽ	ऽ ऽ ऽ	ऽ ऽ ऽ
र-म-य-ति हृद-यं(७)यूनां			भुजग-शिशु-सु-ता,(७)नारी ॥		

यकगतिरित्यर्थः ॥ शिशुशब्दस्य सार्थकत्वादन्यैरप्युक्तम् ।

अभ्यसता नु तरणीगतिवक्रभावा-
न्मूलिवा फणिशिशो भवतापराधा । इति
सप्तभिर्द्वाभ्यां च यतिरित्याम्नाय ॥

हलमुखीर्नौ स् ॥ ६ । ८ ॥

यस्य पादे रेफ (ऽ।ऽ) नकार (।।।) सकारा (।।ऽ) भवन्ति तद्वृत्तं 'हलमुखी' तत्रोदाहरणम्—

रगणः	नगणः	सगणः	रगण	नगणः	सगणः
ऽ । ऽ —	। । ।—	। । ऽ	ऽ । ऽ	। । ।	। । ऽ
गण्डयो (३) -रतिश-यकृद्य, (६) यन्मुख, (३) प्रकट-दशनम् (६) ॥					
रगणः	नगणः	सगणः	रगण	नगणः	सगणः
ऽ । ऽ —	। । ।—	। । ऽ	ऽ । ऽ —	। । ।—	। । ऽ
आयतं,(३) कलह-निरतं (६) तां प्रिय, (३) त्यज हल-मुखीम् (६) ॥					

त्रिभि पड्भिश्च यतिरित्याम्नाय ।

---

१ चतुष्पादापबृहतीपादषट्कीभूतानां नवाक्षराणां प्रस्तारे क्रियमाणे द्वादशाधिक पञ्चशतभेदा (५१२) भवन्ति । तत्र (६४) चतुःषष्टितमोऽस्य भेदो 'भुजगशिशुभृता' इति नाम्ना प्रसिद्धः, अस्या एव 'भुजगशिशुभृता', 'भुजगशिशुयुता' 'भुजगशिशुधृता', 'भुजगशिशुसुता' इति नामान्तराणि छन्दःकौस्तुभादौ लभ्यन्ते । २ 'नगणौ मगणश्च लि पु २ उक्तनवाक्षरप्रस्तारस्यैकपञ्चाशदधिकद्विशततमोऽस्य भेदो (२५१) 'हलमुखी' ति नाम्ना ह्यात ॥ कलिकातामुद्रिते प्राचीनपुस्तके हलमुखीलक्षणसूत्रस्यास्मात् सूत्रात् प्रथम निर्देश । भ्रममूलोऽत्र समावेश इति ज्ञायते । ४ 'तद् हलमुखी नाम । उदाहरणम्' लि पुस्तके ।

(पङ्क्तौ)

शुद्धविराड् मसौ जगौ ॥ ६ । ९ ॥

यस्य पादे मकार (ऽऽऽ) सकार (॥ऽ।) जकार (।ऽ।) गकारा (ऽ) भवन्ति तद्वृत्तं 'शुद्धविराड्' नाम ॥ तत्रोदाहरणम्—

मगण	सगण	जगण	गु०	मगण	सगण	जगण	गु०
ऽ ऽ ऽ—। । ऽ—। ऽ ।—ऽ				ऽ ऽ ऽ—। । ऽ—। ऽ ।—ऽ			

विश्वं ति-ष्ठ-ति कु-क्षिकोट-रे वक्षे य-स्य स र-स्वती स-दा ।

मगण	सगण	जगण	गु०	मगण	सगण	जगण	गु०
ऽ ऽ ऽ—। । ऽ—। ऽ ।—ऽ				ऽ ऽ ऽ—। । ऽ—। ऽ ।ऽ—ऽ			

अस्मद्गं-शपिता-महो गु-रुर् ब्रह्मा शु-द्धविराद् पुनातु नः ॥

अत्र पादान्ते यतिः ॥

---

१ —**पङ्क्तिच्छन्दः**पादघटकीभूतानां दशाक्षराणां प्रस्तारे क्रियमाणे चतुर्विंशत्यधिकसहस्रभेदा (१०२४) जायन्ते तेष्वत्र षडेव भेदाः प्रदर्शिता सन्ति. परंतु प्राकृतपिङ्गलच्छन्द कौस्तुभादिग्रन्थेषूपलभ्यमाना भेदा अपि प्रदर्श्यन्ते । यथा—

सारवतीच्छन्दः—'दीह लहूजुअ दीहलहू **सारवई** धुअ छन्द कहू ।
अन्त पओहर ठाउ धआ चोदहमत्तविरामकआ ॥'
प्रा० २।९५ ॥

'**हारवती**' इत्यपि नामान्तरं **सारवत्याः** ।

सुषमाच्छन्दः—'कण्णो पढमो हत्थो जुअलो कण्णो तिअलो हत्थो पअलो ।
सोला कलआ छक्का वलआ एसा **सुसमा** दिट्ठासुसमा' ॥
प्रा० २।९७ ॥

अमृतगतिच्छन्दः—'दिअवर हार पअलिआ पुण वि तह ट्ठिअ करिआ ।
वसुलहु वे गुरुसहिआ **अमिअगई**, धुअ कहिआ ॥'
प्रा० २।९९ ॥

'**त्वरितगतिः**,**अमृततिलका**,**अमृतगतिका**'इति नामान्तराणि **अमृतगतेः**

मनोरमाच्छन्दः—'नरजगैर्भवेन्मनोरमा ।' छन्द कौस्तुभे ।

पथ्याच्छन्दः—'रो यजौ च **पथ्या** गुरूत्तरा ।' क्वचित् ।

दीपकमालाच्छन्दः—'**दीपकमाला** भो मजौ गुरु ।' क्वचित् ।

हंसीच्छन्दः—'**हंसी** मभनगयुता ।' वृत्तरत्नाकरपरिशिष्टे ।

---

२. उक्तदशाक्षरप्रस्तारस्य पञ्चचत्वारिंशदुत्तरत्रिशततमोऽयं भेदः (३४५) '**शुद्धविराट्**' नाम्ना प्रसिद्ध । '**विराट्**' इत्यपि नामान्तरं क्वचित् । ३. 'मसौ ज्गौ इति लि. पुस्तके ४. 'मगणसगणजगणगकारा भवन्ति लि. पुस्तके । ५. 'वः' लि. पुस्तके.

पैणवो भौ यूगौ ॥ ६ । १० ॥

यस्य पादे मकार (sss) नकार (।।।) मकार (।ss) गकारा (s) भवन्ति तद्वृत्तं 'पणवो' नाम ॥ तत्रोदाहरणम्—

मगण। मगण। मगण। गु मगण। मगण। मगण। गु

s s s—।। ।—। s s—s s । s—।। ।—। s s—s

मीमांसा-रस (५)म-सृत पी-त्वा शास्त्रोक्ति पट्व(५)रि-तरा मा-ति ।

मगण। मगण। मगण। गु मगण। मगण। मगण। गु

s s s—।। ।—। s s—s s ु ु—।। ।—। s s—

एव सं-सदि(५)वि-दुषां म-ध्ये जस्यामो मय-(५),प-णव म-स्वात् ॥

अत्र पञ्चभिः पञ्चभिर्यतिरित्याम्नायः ॥

रुक्मवती भ्मौ स्गौ ॥ ६ । ११ ॥

यस्य पादे भेफ्चर (sU) भकार (sss) सकार (।।s) गकारा (s) भवन्ति तद्वृत्तं 'रुक्मवती' नाम ॥ तत्रोदाहरणम्—

मयण। मगण। सगण गु मगण मगण। सगण गु

s । ।—s s s—। । s—s s । ।—s s s—।। —s

पादत-ले पद्मो-दरगौ-रे राजति यस्या ऊ-र्ध्वगरे-खा ।

मगण। मगण। सगण। गु मगण। मगण। सगण गु

s । ।—s s s—। । s—s s । ।—s s s—। । s—s

सा भव-ति स्त्री रु-क्ष्म वु-क्का रुक्मव-ती सोमा-रयवती च ॥

मैयूरसारिणी जौ गौं ॥ ६ । १२ ॥

यस्य पादे रेफ (sIs) जकारौ (Isl) रेफ (sIs) गकारौ(s)च तद्वृत्तं 'मयूरसारिणी नाम ॥ तत्रोदाहरणम्—

---

१ उक्तदशाक्षरप्रस्तारस्यैकविंशत्यधिकशततमोऽस्य भेद (१२१) 'पणव' नाम्ना ख्यात । 'प्रणव' इत्यपि नामान्तरम् । २ मगणनगणमगणगकारा' इति पुस्तके । ३ उक्तदशाक्षरप्रस्तारस्य नवनवत्यधिकशततमोऽस्य भेदो (१९९) 'रुक्मवती' नाम्ना प्रसिद्ध । अस्या नामान्तराणि यथा—'रूपवती' इति छन्दोमञ्जरी, 'विलास'कस्मित्, 'चम्पकमाला' प्राकृतपिङ्गले । तल्लक्षणं यथा—

'हार ठवीजे काहळवुजे कुन्तिभपुत्ता एगुरुत्ता ।
हत्थ करीजे हार ठवीजे चम्पकमाला छन्द कहीजे ॥ प्र २।९३॥

पादान्ते यति ॥ ४ मगणमगणसगणगकारा' इति पुस्तके ५. उक्तदशाक्षरप्रस्तारस्येकसप्तत्यधिकशततमोय भेदो 'मयूरसारिणीनाम्ना' प्रसिद्ध । ६ रगणजगणौ रमणगकारौ च भवत' इति पुस्तके

रगणः जगण रगण गु० रगणः जगण रगण गु०

s । s— । s । —s s । —s s । ·s— । s । —s । ·s—s

या वना–न्तराण्यु–पै ति र–न्तुं या भु–ज–ङ्ग भोग–मुक्तचि–त्ता ।

s । s— । s । —s । s—s s ·। s— । s । —s ·। ·s—

या द्रुतं प्रयाति सन्नतां–सा ता मयू–रसारि–णीं विज–ह्यात् ॥

अत्र पादान्ते यति. ॥

मत्ता मभौ सगौ ॥ ६ । १३ ॥

यस्य पादे मकार (sss) भकार (s।।) सकार (।।s) गकारां (s) तद्वृत्तं 'मत्ता'नाम । तत्रोदाहरणम्—

मगण भगण सगण· गु० मगण भगण· सगणः गु०

s s s—s । । —। । s— s s·s·s—s ।।—। । s—s

स्वैरोल्ला–पैः(४),श्रुति–पटुपे– यैर् (६) गीतज्ञी–डा(४)सुर–तविशे–षैः (६)।

मगणः मगण सगण गु० मगण मगण सगण गु०

s s s—s · । ।—। । s—s s s s—s · । ।—। । s—s

वासागा–रे(४)कृत–सुरता–नां (६) मत्ता ना–री(४)रम–यति–चे–त्त (६) ॥

चतुर्भिः षड्भिश्च यतिरित्याम्नाय. ॥

उपस्थिता तजौ जगौ ॥ ६ । १४ ॥

यस्य पादे तकार (ss।) जकारौ (।s।), जकार (।s।) गकारौ (s) च तद्वृत्तं 'उपस्थिता' नाम । तत्रोदाहरणम्—

तगण जगण जगण गु० तगण जगण जगण गु०

s s । —। s । —। s । —s s s · । —। s । —s । । —s


एषा(२)ज–गदेक–मनोह–रा (८),कन्या(२)क–नकोज्ज्व–लदीधि–ति. (८) ।

---

१. 'सक्तचित्ता' लि पुस्तके. २. उक्तदशाक्षरप्रस्तारस्यैकचत्वारिंशाधिकद्विशततमोऽयं भेदो (२४१) **'मत्ता'** नाम्ना प्रसिद्धः । ३. 'मगणभगणसगणगकारा' लि. पुस्तके । ४. उक्तदशाक्षरप्रस्तारस्य पञ्चषष्ट्यधिकत्रिशततमोऽयं भेद. (३६५) **'उपस्थिता'** नाम्ना प्रसिद्ध. । प्राकृतपिङ्गलादिषु **'संयुता' 'संयुतका'** इति नामान्तरम् । तल्लक्षणं यथा—

'जसु आइ हत्थ विआणिओ तह वे पओहर जाणिओ ।
गुरु अन्त पिङ्गलजम्पिओ सहि छन्द **संजुत** थप्पिओ ॥ २।९१ ॥'

५. 'तगणजगणौ जगणगकारौ च भवत.' इति लि. पुस्तके.



लक्ष्मी(२) रि–व दान–व–सूद–न(८),पुष्पै(२)र्ने–रनाथ–मुपस्थि–ता (८) ॥

अत्र द्वाभ्यामष्टभिश्च यतिरित्याम्नायः ॥

(त्रिष्टुभि)

इन्द्रवज्रा तौ जगौ ग् ॥ ६ । १५ ॥

---

१ त्रिष्टुप्पादषटकीभूतानामेकादशाक्षराणां प्रस्तारे कृतेऽष्टसप्तत्यधिका द्वि शतसमेदा (२०४८) आयन्ते तेषु द्वादश भेदा एवात्र निर्दिष्टा परं प्राकृतपिङ्गल–छन्दःकौस्तुभप्रभृतिग्रन्थेषूपलब्धा बहवो भेदा प्रकाश्यन्ते यथा— २ उक्तैकाद शाक्षरप्रस्तारस्य सप्तपञ्चाशदधिकत्रिशततमोऽयं (३५७) भेद 'इन्द्रवज्रा' इति नाम्ना प्रसिद्धः । एतल्लक्षणं प्राकृतपिङ्गले यथा—

'दिज्जे सभाराजुअला पएसु अन्ते परेन्दो गुरुजुग्गसेसम् ।
जम्पे फणिन्दा धुअ 'इन्दवज्जा' मत्ता दहा अट्ठ समा सुसव्वा ॥' (२।११५)

वम्बुच्छन्दः—'पीअसरूअह एक्क करीअे तिण्णि भआगअ सत्त भणीजे ।
सोलह मत्तह पाअ ठवीजे गुग्गुरु अन्तहि वम्बु कहीजे ॥'
प्रा० २।१०१

सुमुखीच्छन्दः—'दिअवर हार लहुजुअला वलअ परिट्ठिअ हत्थअला ।
पअ कल चोद्दह वम्प अही कइवर जाणइ सो सुमुखी ॥'
प्रा० २।१०२

दमनकच्छन्दः—'दिअवरजुअ लहुजुअल पअ पअ पअलिअवलअम् ।
चउपद चउवसुकलअं दमणअ फणि मण लक्खिअम् ॥'
प्रा० २।१०९

मालतीच्छन्दः— कुन्तीपुत्ता पआ दिण्णा आणीआ
अन्ते कन्ता एक्का हारा माणीआ ।
पाआ पाआ मत्ता दिट्ठा जाईसा
मालत्तीच्छन्दा जम्पन्ता माएसा ॥ प्रा० २।११३

अनुकूलाच्छन्दः—'स्यादनुकूला मतनगगायैस् ।
अस्या एवानुकूलाया 'मौक्तिकमाला' इति वृत्तरत्नाकरे 'श्रीः' इति वृत्तसारे च नामान्तरे

मोटनकच्छन्दः—'स्यान्मोटनक तजजाश्च लगौ ॥'

भद्रिकाच्छन्दः— ननरलगुरुभिस्तु भद्रिका ॥' छन्दःकौस्तुभादौ

उपस्थितताच्छन्दः—'उपस्थितमिद ज सलगौ ग ॥' वृत्तसारप्रभृतिषु

यस्य पादे तकारौ (ऽऽ।०ऽऽ।) जकार (।ऽ।) गकारौ (ऽ) गकार (ऽ) श्च, तद्वृत्तं 'इन्द्रवज्रा' नाम । तत्रोदाहरणम्—

तगण तगण जगण गु० गु० तगण तगण जगण गु० गु०

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ ऽ ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

यस्यां त्रि-षट्सप्त-ममक्ष-रं स्याद् ह्रस्वं सु-जङ्घे न-वमं च-त-द्वत् ।

तगण तगण जगण गु० गु० तगण तगण जगण गु० गु०

ऽ ऽ ·।—ऽ । ।—। ऽ ऽ—ऽ—ऽ ऽ·ऽ·।—ऽ ऽ ·।—। ऽ ।—ऽ—ऽ

गत्या वि-लक्षी कृ-तहंस-का-न्ते तामिन्द्र-वज्रां ब्रु-वते क-वी-न्द्राः ॥

अपि च—

तगण तगण जगण गु० गु० तगण तगण जगण गु० गु०

ऽ ऽ ।—ऽ ऽ ·।—। ऽ ।—ऽ ऽ । ऽ ऽ—। ऽ ।—। ऽ ।—ऽ-ऽ

ये दुष्ट-दैत्या इ-ह भूमि-लो-के द्वेषं व्य-धुर्गो-द्वि-जदेव-स-ङ्घे ।

तगण तगण जगण गु० गु० तगण तगण जगण गु० गु०

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ ऽ ऽ ऽ ।—। ऽ ।—। ऽ ।—ऽ—ऽ

तानिन्द्र-वज्राद-पि दारु-णा-ज्ञान् व्याजीव-यद्य स-ततं न-म-स्ते ॥

तथा—

तगण तगण जगण गु० गु० तगण तगण जगण गु० गु०

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

[२]गोब्राह्म-णस्त्री-ब्र-तिभिर्वि-रु-द्ध मोहात्क-रोत्यल्प-मतिर्नृ- पो यः ।

---

१. 'तगणौ जगणौ गकारौ च भवत ' लि पुस्तके. २. 'गोब्राह्मणस्त्री' इत्यादि पद्यमेकमेवोदाहृतं लि. पुस्तके.

'शिखण्डितम्' इति नामान्तरम् **उपस्थित**च्छन्दसः छन्द कौस्तुभादौ.

उपस्थिताच्छन्दः—'तजौ जगौ गुरुणेय**मुपस्थिता** स्यात् ॥' छन्द कौस्तुभादौ

सान्द्रपदच्छन्दः—'**सान्द्रपदं** भतौ नगलघुभिश्च ॥' छन्दःकौस्तुभादौ.

चन्द्रिकाच्छन्दः—'ननगगलगगै**श्चन्द्रिका** स्यात् ॥' वृत्तसारे.

मेरुरूपाच्छन्दः—'म सो गुरुयुग्मं **मेरुरूपा** ।' वृत्तसारे

वन्दिताच्छन्दः—'नरगजा गुरुर्व**न्दिता** मता ॥' वृत्तसारे


धारावलिकाच्छन्दः—'तो भो जलौ गुरुर्ध**ारावलिका** ॥' वृत्तसारे

उपचित्रच्छन्दः—**उपचित्र**मिदं ससमा लगौ ॥' वृत्तरत्नाकरे.

कुपुरुषजनिताच्छन्दः—'**कुपुरुषजनिता** ननौ रगौ ग· ॥' वृ० र० परि·

अनवसिताच्छन्दः—'**अनवसिता** न्यौ भ्गौ गुरुरन्ते ॥' वृत्तरत्नाकरे.

विध्वङ्कमालाच्छन्दः—'**विध्वङ्कमाला** भवेत्तौ तगौ ग. ॥' वृ० र० परि०




पादान्ते यतिः ॥

उपेन्द्रवज्रा जतौ जगौ ग् ॥ ६ । १६ ॥

यस्य पादे अकौर (।ऽ।) तकार (ऽऽ।) अकारा (।ऽ।) गकारौ (ऽ ऽ) च, तद्वृत्तम् 'उपेन्द्रवज्रा' नाम ॥ तत्रोदाहरणम्—





अत्र पादान्ते यतिः ॥


आद्यन्तावुपजातयः ॥ ६ । १७ ॥

आद्यन्तौ'-इति अनन्तरोक्तौ इन्द्रवज्रोपेन्द्रवज्रयो पादार्धाद्द । तौ यदा विकल्पेन यथेष्टं भवतस्तदा 'उपजातयं' प्रस्तारवैचनाद्यचतुर्दशप्रकारा आयन्ते ॥ तत्रोदाहरणम्-

इन्द्रवज्रा



इन्द्रवज्रा



---

१ उक्तैकादशाक्षरप्रस्तारस्याष्टपञ्चाशदधिकत्रिशततमोऽय (३५८) भेद 'उपेन्द्रवज्रा' इति नाम्ना प्रसिद्धः । एतल्लक्षणं प्राकृतपिङ्गले यथा—

णरेन्द एक्का तमणा सुसज्जा पओहरा कण्णगणा मुणिज्जा ।
उविंदवज्जा फणिराअदिट्ठा पढन्ति छेआ सुहवण्णसट्ठा ॥ (२।११७।)

२ भगणतगणौ जगणौ गकारौ च भवत 'इति लि पुस्तके ३ 'पादाद्यन्तौ' लि पुस्तके ४ उपजातयश्च प्रस्तारगम्या चतुर्दश भवन्ति तत्रामलक्षणमोदाहरणादीनि प्रदर्श्यन्ते यथा—(अत्रोदाहरणान्यग्रिमपृष्ठे द्रष्टव्यानि) ५ प्रस्तारवशात्' लि पुस्तके ६ प्रयोज्यते व्यवहारकाले' इति लि पुस्तके

उपेन्द्रवज्रा

जगणः तगण जगणः गु० गु०

। ऽ । —ऽ ऽ । —। ऽ । —ऽ—ऽ

अत प्र–यत्नः प्र–थमं वि–धे–यो नृपेण पुंरत्न–परीक्ष–णा–य ॥

---

१ 'प्रथमो' लि. पुस्तके. २. 'परीक्षणायां' लि पुस्तके.

'कीर्ति (१) वाणी (२) माला (३) शाला (४) हंसी (५) माया (६) जाया (७) बाला (८) आर्द्रा (९) भद्रा (१०) प्रेमा (११) रामा (१२) वृद्धि (१३) ऋद्धि (१४) स्तासां नामानि (प्रा० पि० सू० २।१२२)

(१) कीर्तिः—

यथा—

'उपेन्द्रवज्रा'

जगण तगण जगण गु० गु०

ऽ ऽ । —ऽ ऽ । —। ऽ । —ऽ—ऽ

स मानु–षीं मेरु–सख पि–तृ–णां कन्या कु–लस्य स्थि–तये स्थि–ति–ज्ञः ।

'इन्द्रवज्रा'

तगण तगण जगण गु० गु०

ऽ ऽ । —ऽ ऽ । —। ऽ । —ऽ—ऽ

मेना मु–नीनाम–पि मान–नी–याम् आत्मानु–रूपा वि–धिनोप–ये–मे ॥

(कुमारसं० १।१८॥)

'इन्द्रवज्रा'

जगण तगण जगण गु० गु०

ऽ ऽ । —ऽ ऽ । —। ऽ । —ऽ—ऽ

(२) वाणी—

यथा—

इन्द्रवज्रा

तगण तगण जगण गु० गु०

ऽ ऽ । —ऽ ऽ । —। ऽ । —ऽ—ऽ

य पूर–यन्कीच–करन्ध्र–भा–गान् दरीमु–खोत्थेन–समीर–णे–न

इन्द्रवज्रा

तगण तगण जगण गु० गु०

ऽ ऽ । —ऽ ऽ । —। ऽ । —ऽ—ऽ

उद्गास्य–तामिच्छ–ति किन्न–रा–णां तानप्र–दायित्व–मिवोप–ग–न्तुम् ॥

(कुमारसं० १।८॥)

(३) माला—

8342P592

यथा—

उपेन्द्रवज्रा

जगण॰ तगण॰ जगण॰ गु गु॰

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

कपोल—कण्डूः क—रिभिर्वि—नेतु

उपेन्द्रवज्रा

जगण॰ तगण॰ जगण॰ गु गु

। ऽ ।—ऽ ऽ ।—। ऽ ऽ— —ऽ

विधेः—सानां स—रलद्रु—मा—णाम् ।

इन्द्रवज्रा

तगण॰ तगण॰ जगण॰ गु गु

ऽ ऽ ।— ऽ ।—। ऽ ।—ऽ—ऽ

यत्र द्रु—तक्षीर—सभा प्र—सू—त सानूनि गन्ध॰ सु—रभीक— रो— धि ॥

उपेन्द्रवज्रा

तगण॰ तगण॰ जगण॰ गु गु

ऽ ऽ ।— ऽ ।—। ऽ ।—ऽ—ऽ

(कुमारसं॰ १।९ ॥)

इन्द्रवज्रा

तगण॰ तगण॰ जगण॰ गु गु

ऽ ऽ ।— ऽ ।—। ऽ ।—ऽ—ऽ

(४) शाला—

यथा—

इन्द्रवज्रा

तगण॰ तगण॰ जगण॰ गु गु

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

उद्वेज—यद्भद्रु—शिपार्ष्णि—भा—गान् मार्गे शि—लीमूत—हिमेऽपि य—त्र ।

इन्द्रवज्रा

तगण॰ तगण॰ जगण॰ गु गु

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

उपेन्द्रवज्रा

जगण॰ तगण॰ जगण॰ गु गु

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

न द्रुव—द्भ्रोणि—पयोध—रा—तौ भिन्दन्ति मन्दां ग—तिमम्ब—मु—द्यम ॥

(कुमारसं॰ १।११ ॥)

(५) हंसी—

यथा—

उपेन्द्रवज्रा

जगण॰ तगण॰ जगण॰ गु गु

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

पद द्रु—पारण्डु—विपौत—र—कं यस्मिन्—दृष्टापि हतद्वि—पा—नाम् ।

इन्द्रवज्रा

तगण॰ तगण॰ जगण॰ गु गु

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—

उपेन्द्रवज्रा इन्द्रवज्रा

जगण तगण जगण गु० गु० तगण तगण जगण गु० गु०

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

विदन्ति मार्गं न खर-न्ध्र-मु-क्ति-र्मुक्ताफ-लैः केस-रिणा कि-रा-ताः ॥

(कुमारस० १।६॥)

'विपरीताख्यानिकी—' (पिं० सू० ५।४८) इत्यनुसारेण 'विपरीताख्यानिः इति नामान्तर हंसीच्छन्दस ।

(६) माया—

यथा—

उपेन्द्रवज्रा उपेन्द्रवज्रा

जगण तगणः जगण गु० गु० जगणः तगण जगण गु० गु०

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

प्रसीद विश्राम्य-तु वीर-व-ज्रं शरैर्म-दीयैः क-तम. सु-रा-रिं ।

उपेन्द्रवज्रा इन्द्रवज्रा

जगज तगण जगणः गु० गु० तगण तगण जगण गु० गु०

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

बिभेतु मोघीक्र-तबाहु-वीर्यं स्त्रीभ्योऽपि कोपस्फु-रिताध-राभ्य ॥

(कुमारस० ३।९॥)

(७) जाया—

यथा—

इन्द्रवज्रा उपेन्द्रवज्रा

तगण तगण जगण गु० गु० जगण तगण जगण गु० गु०

ऽ ऽ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

कालक्र-मेणाथ तयो. प्र-वृ-त्ते स्वरूप-योग्ये सु-रतप्र-स-ङ्गे ।

उपेन्द्रवज्रा इन्द्रवज्रा

जगण तगण जगण गु० गु० जगण तगण जगण गु० गु०

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

मनोर-मं यौव-नमुद्व-ह-न्त्या गर्भोऽभ-वद्भूध-रराज-प-त्न्या ॥

(कुमारस० १।१९॥)

(८) बाला—

इन्द्रवज्रा

तगणः तगणः जगणः गु गु

य सव-धैसाः प-रिफल्य व-स्तं

इन्द्रवज्रा

जगणः तगणः जगणः गु॰ गु

मेरौ स्थि-ते दोग्ध-रि दोह-द-क्षे ।

इन्द्रवज्रा

तगणः तगणः जगणः गु गु

मास्यन्ति रत्नानि महौष-धी-श्च

इन्द्रवज्रा

तगणः तगणः जगणः गु॰ गु

पृथूप-दिष्टां दु-दुहुर्ष-रि-त्रीम् ॥

(कुमारसं० १।२ ॥)

(९) आर्द्रा—

यथा—

उपेन्द्रवज्रा

जगणः तगणः जगणः गु गु

दिवाकर- रात्रिञ्च-रौ यो गु-हा-सु

इन्द्रवज्रा

तगणः तगणः जगणः गु गु

लीन दि-वामीव-मिषा-न्ध-का-रम् ।

इन्द्रवज्रा

तगणः तगणः जगणः गु गु

क्षुब्धेऽपि नून श- रण्य प्र- प-न्ने

उपेन्द्रवज्रा

जगणः तगणः जगणः गु गु

ममस्व-मुष्मि- न्रसां स-हा-य ॥

(कुमारसं० १।१२॥)

(१०) मञ्जा—

यथा—

इन्द्रवज्रा

तगणः तगणः जगणः गु गु

अस्त्युत्त-रस्यां दि- शि देव-ता-त्मा हिमाल-यो नाम नगाधि-रा-जः ।

उपेन्द्रवज्रा

जगणः तगणः जगणः गु गु

इन्द्रवज्रा | उपेन्द्रवज्रा

तगण तगण जगणः गु० गु० | जगण तगणः जगण गु० गु०

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

पूर्वाप–रौ तोय–निधी व–गा–ह्य स्थितः पृ–थिव्या इ–व मान–द–ण्डः ॥

(कुमारसं० १।१॥)

'आख्यानिकी–' (पिं० सू० ५।३७) इत्यनुसारेण 'आख्यानिकी' इति नामान्भद्राच्छन्दस ।

(११) प्रेमा—

यथा—

उपेन्द्रवज्रा | उपेन्द्रवज्रा

जगण तगण जगण गु० गु० | जगण तगण जगण गु० गु०

। ऽ ।–ऽ ऽ ।–। ऽ ।—ऽ—ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

अनन्त–रत्नप्र–भवस्य य–स्य हिमं न सौभाग्य–विलोपि जा–तम् ।

इन्द्रवज्रा | उपेन्द्रवज्रा

तगण तगणः जगण गु० गु० | जगण तगणः जगण गु० गु०

ऽ ऽ ।—ऽ ऽ ।–। ऽ ।—ऽ—ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

एको हि दोषो गु–णसंनि–पा–ते निमज्ज–तीन्दो. कि–रणेष्वि–वा–ङ्क. ॥

(कुमारसं० १।३॥)

(१२) रामा—

यथा—

इन्द्रवज्रा | इन्द्रवज्रा

तगण तगण जगणः गु० गु० | तगण तगण जगण गु० गु०

ऽ ऽ ।–ऽ ऽ ।–। ऽ ।—ऽ—ऽ | ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ—ऽ

यश्चाप्स–रोविभ्र–म मण्ड–ना–नां संपाद–यित्रीं शि–खरैर्बि–भ–र्ति ।

उपेन्द्रवज्रा | उपेन्द्रवज्रा

जगण तगण जगणः गु० गु० | जगण तगणः जगण गु० गु०

। ऽ ।–ऽ ऽ ।–। ऽ ।—ऽ—ऽ | । ऽ ।—ऽ ऽ ।–। ऽ ।—ऽ—ऽ

वलाह–कच्छेद–विभक्त–रा–गाम् अकाल–संध्यामि–व धातु–म–त्ताम् ॥

(कुमारसं० १।४॥)

(१३) ऋद्धि —

यथा—

इन्द्रवज्रा　　इन्द्रवज्रा

तगण तगण जगण गु गु　तगण तगण जगण गु गु

प्रसभ-दिक्पांसु-विविक्त-वा-तं शङ्कस-नानन्त-रपुष्प-वृ-ष्टि ।

उपेन्द्रवज्रा　　उपेन्द्रवज्रा

जगण तगण जगण गु गु　जगण तगण जगण गु गु

शरीरि-णां स्याव-रजह-मा-नां सुखाय तत्त्व-म-दिन ध-भू-ष ॥

(कुमारसं० १।२३॥)

(१४) वृद्धि —

यथा—

इन्द्रवज्रा　　उपेन्द्रवज्रा

तगण तगण जगण गु गु　जगण तगण जगण गु गु

यत्रांशु-काक्षेप-विलम्बि-ता-नां यत्पृष्ठ-मा किंपु-रुषाङ्ग-ना-नाम् ।

उपेन्द्रवज्रा　　उपेन्द्रवज्रा

जगण तगण जगण गु गु　जगण तगण जगण गु गु

दरीषु-हङ्कार-विलम्बि-वि-म्बा-स्तिरस्क-रिष्णो अ-उदा म-ध-न्ति ॥

(कुमारसं० १।१४)

एवमन्यान्यप्युपजात्युदाहरणानि कुमारसंभवादिकाव्येषु द्रष्टव्यानि । समवृत्तप्रस्ता वेऽपि[1] प्रसङ्गानुपयोगीनामुपन्यासो लाघवार्थं । केचिदिह सूत्र न्यायोपलक्षणपरं व्याच क्षते । तेन वंशस्थ-इन्द्रवंशापादयोरपि संकरानुपेन्द्रजातयो भवन्ति । शालिनी-भोगीं-पादयो, अन्येषामपि स्वल्पभेदानां प्रयोगानुसारेणोपजातयो ज्ञेयाः ।

---

१ क. ग पुस्तके 'अपि' नास्ति । २ अत्र वंशस्थेन्द्रवंशयोरपि प्रस्तारे कृते चतु र्दशधा उपजातयो भवन्ति तासां स्वरूपोदाहरणानीनि यथाक्रम प्रकाश्यन्ते, यथा—

प्रथमो भेदः—

यथा—

इन्द्रवशा — वंशस्थम्

तगण तगण जगण रगणः — जगण तगणः जगण रगणः

ऽ ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ — । ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ

किं ब्रूथ रे व्योम-चरा म-हासुरा — स्मरारि-सूनुप्र-तिपक्ष-वर्तिनः ।

वशस्थम् — वंशस्थम्

जगणः तगण जगण रगणः — जगण तगणः जगणः रगणः

। ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ — । ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ

मदीय-वाणग्र-णवेद-ना हि सा-धुना क-थं विस्मृ-तिगोच-रीकृता ॥

(कुमारसं० १५।४० ॥)

द्वितीयो भेदः—

यथा—

वंशस्थम् — इन्द्रवंशा

जगणः तगण जगण रगणः — तगणः तगणः जगण रगणः

। ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ — ऽ ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ

पुरोग-तं दैत्य-चमूम-हार्णवं दृष्ट्वाभि-तश्चुक्षु-भिरे म-हा-सुराः ।

वंशस्थम् — वंशस्थम्

जगण तगणः जगण रगण — जगणः तगणः जगण रगणः

। ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ — । ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ

स्मरारि-सूनोर्न-यनैक-कोणके मसुर्भ-टास्तस्य-रणेऽव-हेलया ॥

(कुमारसं० १५।४९ ॥)

तृतीयो भेदः—

यथा—

इन्द्रवंशा — इन्द्रवंशा

तगण तगणः जगण रगण — तगणः तगणः जगण रगणः

ऽ ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ — ऽ ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ

निम्नाः प्र-देशाः स्थ-लतासु-पागमन् निम्नत्व-मुच्चैर-पि सर्व-तश्च ते ।

वंशस्थम् वंशस्थम्

जतग। तयग। जगग। रयग। जतग। तयग। जगग। रयग।

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

तुरङ्ग-मार्गा म-चतां सु-रै क्षता रथैर्ग-जेन्द्रै प-रित स-मीकृता ॥

(कुमारसं० १४।४३ ॥)

चतुर्थो भेद —

यथा—

वंशस्थम् वंशस्थम्

जगग। तगग। जयग। रयग। जयग। तगग। जयग। रगग

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ । ऽ ।— ऽ ।—। ऽ ।—ऽ । ऽ

परस्-रं वज्र-धरस्य सैनिका द्विपोऽपि योद्धु प्र-वरोद्ध-तायुधा ॥

इन्द्रवज्रा वंशस्थम्

तगग। तयग। जगग रगग। जयग। तयग। जयग। रगग।

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

वैताळि-कै र्धावि-तमान-सत्कमा-भिधान-मीयुर्वि-जयैषि-णो रणे ॥

(कु० सं० १५।५२॥)

पञ्चमो भेद—

यथा—

इन्द्रवज्रा वंशस्थम्

तगग। तयग। जगग। रगग। जगग। तयग। जयग। रगग

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

कर्णीर-तास्या र-विदत्त-दृष्टय समेत्य सर्वे सु-र-सिद्धि-पः पुरः ।

इन्द्रवज्रा वंशस्थम्

तगग। तगग। जयग। रगग। जतग। तयग। जयग रगग।

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ । ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

श्रावः स्र-रेण भ-यणान्त-शालिना मिषो द-दन्त क-रुणेन निर्ययु ॥

(कु० सं० १५।२४ ॥)

षष्ठो भेद.—

यथा—

इन्द्रवंशा — तगण तगण जगण रगण
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

इन्द्रवंशा — तगण तगण जगण रगण
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

अभ्याज-तोऽभ्याग-ततूर्ण-तर्णका—न्निर्याण-हस्तस्य पुरो दु-धुक्षत ।

इन्द्रवंशा — तगण तगण जगणः रगण
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

वशस्थम् — जगण तगण जगण रगण
। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

वर्गाद्र-वां हुंकृ-तिचारु निर्यती- मरिर्म-वोरैक्ष-त गोम-तल्लिकाम् ॥
(शिशुपा० १२।४१)

सप्तमो भेद —

यथा—

वंशस्थम् — जगणः तगण जगण रगण
। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

इन्द्रवंशा — तगण तगण जगणः रगण
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

न जाम-दग्न्य. क्ष-यकाल-रात्रिकृत् स क्षत्रियाणा समराय वल्गति ।

इन्द्रवंशा — तगण तगण जगणः रगणः
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।-ऽ । ऽ

वंशस्थम् — जगण तगण जगण रगण
। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

येन त्रि-लोकीसु-भटेन-तेन ते कुतोऽव-काशी स-ह विग्र-हग्रहे ॥
(कु० सं० १५।३७ ॥)

अष्टमो भेद —

यथा—

वंशस्थम् — जगणः तगण जगण रगण
। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

वंशस्थम् — जगण तगण जगण रगण
। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

निवार्य-माणैर-भितोऽनु-यायिभि-र्ग्रहीतु-कामैरि-व तं मु-हुर्मुहु ।

वंशस्थम् इन्द्रवंशा

जतौ तजौ जगौ रगौ तजौ जगौ जगौ रगौ

ऽ । ऽ ऽ । ऽ । ऽ । । ऽ ऽ । ऽ । ऽ । ऽ ।

अपाति गृध्रैर्–मिमौलि चाकुले–र्भविष्य—देतन्म–रणोप–देशिमि ॥

(कु० सं० १५।२९ ॥)

नवमो भेद—

यथा—

इन्द्रवंशा वंशस्थम्

तगण तगण जगण रगण जतौ तजौ जगौ रगौ

ऽ ऽ । ऽ । । ऽ । ऽ । ऽ ऽ । ऽ । ऽ । ऽ ।

स्रातं स्व–रैं रम्य–सुरद्र–पुन्नदै–रपत्य—कानां क–नकस्य–क्षीरजः ।

वंशस्थम् इन्द्रवंशा

जतौ तजौ जगौ रगौ तगण तगण जगण रगण

। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ ऽ । ऽ । ऽ । ऽ ।

गतं वि–गन्तान् प्र–स्थरै स–मीरणै–र्दाहभ्र–म भूरि वभार भूयसा ॥

(कु० सं० १४।२० ॥)

दशमो भेद—

यथा—

वंशस्थम् इन्द्रवंशा

जतौ तजौ जगौ रगौ तगण तगण जगण रगण

। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ ऽ । ऽ । ऽ । ऽ ।

नितान्त–मुत्तुङ्ग–तरङ्ग–हेपिते–रहाम–दानद्वि–पमूंहि–तै शतै ।

वंशस्थम् इन्द्रवंशा

जतौ तजौ जगौ रगौ तगण तगण जगण रगण

। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ ऽ । ऽ । ऽ । ऽ ।

चलद्ध–जस्पन्द–ननेमि–नि स्वने–व्यामूषि–रच्छ्वास–मयाकु–ष्ठं नभ ॥

(कुमारसं० १४।४० ॥)

एकादशो भेदः—

यथा—

इन्द्रवंशा — तगण तगण जगण रगण
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

इन्द्रवंशा — तगण तगण जगण रगण
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

श्रुत्वेति वाचं वि-यतो ग-रीयसीं क्रोधाद-हंकार-परो म-हासुरः ।

वशस्थम् — जगण तगण जगण रगण
। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

इन्द्रवंशा — नगण तगणः जगणः रगणः
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

प्रकम्पि-ताशेष-जगन्त्र-योऽपि स-ना-कम्प-तोच्चैर्दि-वमभ्य-धाच्च सः ॥
(कु० सं० १५।३८ ॥)

द्वादशो भेदः-

यथा—

वंशस्था — जगणः तगण जगण रगण
। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

वंशस्था — जगण तगण जगणः रगण
। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

कटुस्व-रै प्राल-पथाम्ब-रस्थिता शिशोर्ब-लात्पङ्क्दि-नजात-कस्य किम् ।

इन्द्रवशा — तगणः तगण जगण रगण
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

इन्द्रवंशा — तगण तगण जगणः रगण
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

श्वान प्र-मत्ता इ-व कार्ति-के निशि स्वैरं व-नान्ते मृ-गधूर्त-का इव ॥
(कुमारस० १५।४१॥)

त्रयोदशो भेद —

यथा—

इन्द्रवशा — तगण तगण जगण रगण
ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

वंशस्थम् — जगण तगण जगणः रगण
। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

पद्मै-र-नन्वीत-वधूमु-खद्युतो गता न हंसै श्रि-यमात-पत्रजाम् ।

सेया शालिनीवातोर्मीपादयोरन्येषामपि स्वस्वभेदानां प्रयोगानुसारेणोपजातयो ज्ञेया ।

दोधकं भौ भ्गौ ग् ॥ ६ । १८ ॥

यस्य पादे भगणौ (ऽ॥,ऽ॥,ऽ॥) गकारौ (ऽ,ऽ) च भवतस्तद् 'दोधकं' नाम वृत्तम् । तत्रोदाहरणम्—

इन्द्रवंशा इन्द्रवज्रा

तगणः तगणः जगणः रगणः तगणः तगणः जगणः रगणः

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

धूरेऽम-बन्मोज-बलस्य गच्छत शैलोप-मातीव-गजस्य निम्नगा ।

(शिशुपा० १२।६१ ऽ)

चतुर्थपादो भेद—
यथा—

वंशस्थम् इन्द्रवंशा

जगणः तगणः जगणः रगणः तगणः तगणः जगणः रगणः

। ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

महाम्ब-मूनाम-पिपा स-मन्ततः सैनश्च सद्य सु-तरामु-दायुधा ।

इन्द्रवंशा इन्द्रवज्रा

तगणः तगणः जगणः रगणः तगणः तगणः जगणः रगणः

ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ ऽ ऽ ।—ऽ ऽ ।—। ऽ ।—ऽ । ऽ

वस्पुर्वि-मन्नद्रि-तिपास-सेकुले वसाम्र-मद्वारि यद्वि प्र-कोष्ठके ॥

(कुमारसं० १५।६॥)

१ 'तथा' इति पुस्तके २ तुल्यसंख्यकवर्णपादयोरेवोपजातित्वमिति न विमर्शः, किंतु मिश्रसंख्यकवर्णपादयोरपि ।

यथा—

"राम कमलदलपूर्णेंदु रघुवरं सीतापतिं सुन्दरं
कारुण्यं करुणामय गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥"

इति पद्ये त्रिंशदक्षरपादकेन (१९) शार्दूलविक्रीडितेन सहैकविंशत्यक्षरपादकस्य राजतस्य पादद्वयेन मिश्रणादुपजातित्वम् । एवमेवानुष्टुब्वृत्तयोरपि संकरादुपजाति ३ प्रयोगानुसारेणोपजातयो ज्ञेया.' इति पुस्तकान्तरस्य पाठः. ४ 'मत्तरणयो' इति कस्मिंश्चित्पुस्तके ५. एकैकाक्षरप्रसारसंभवचत्वारिंशदधिकचतुःशततमो (४१९) भेदो 'दोधक' इति नाम्ना प्रसिद्धः.

मगण मगणः मगणः गु० गु० मगणः मगणः भगणः गु० गु०

ऽ।।—ऽ।।—ऽ।।—ऽ—ऽ ऽ।।—ऽ।।—ऽ।।—ऽ—ऽ

दोधक-मर्थवि-रोधक-मु-मं स्त्री-चप-लं युधि क्रातर-चि-त्तम् ।

मगण मगणः मगणः गु० गु० मगणः मगणः मगणः गु० गु०

ऽ।।—ऽ।।—ऽ।।—ऽ—ऽ ऽ।।—ऽ।।—ऽ।।—ऽ—ऽ

स्वार्थप-रं मति-हीनम-मा-त्यं मुञ्चति यो नृप-तिः स सु-खी स्यात् ॥

अत्र पादान्ते यतिः । दोग्धीति दोधकः । केनाप्युपायेन राजानं दोग्धि ।

शालिनी मौतौ त्गौ ग् समुद्रऋषयः ॥ ६ । १९ ॥

यस्य पादे मगणतगणौ, (ऽऽऽ. ऽऽ।) तगणो, (ऽऽ।) गकारौ (ऽ,ऽ) च भवतस्तद्वृत्तं 'शालिनी' नाम । चतुर्षु, सप्तसु [च] यतिः । तत्रोदाहरणम्—

मगण तगणः तगणः गु० गु० मगण तगणः तगणः गु० गु०

ऽ ऽ ऽ—ऽ ऽ ।—ऽ ऽ ।—ऽ—ऽ ऽ ऽ ऽ—ऽ ऽ ।—ऽ ऽ ।—ऽ—ऽ

शस्त्रस्या-मा(४)स्निग्ध-मुग्धाय-ता-क्षी(७) पीनश्रो-णि(४)र्दक्षि-णावर्त-ना-भिः(७)।

